काशिका वृत्ति टीका

पदमञ्जरी (व्याकरणम्)

पत्राणि २०३

नं०४-घ-च
काशिकावृत्तिटीका
पदमञ्जरी (व्याकरणम्)
पत्राणि २०३

नोट :— pages No. 65 to 120 Missing.

नं. ४

६

रु॰ प॰ १

श्रीगणेशाय नमः ॥ एकाचो द्वे प्रथमस्य ॥ ॥ इह यद्यपि स्वार्थत्वे संभवति षाष्ठ्यां एकमप्युक्तं विधेयकार्यं विना नोद्देश्यो निर्दिष्टत्वात् संभवति च स्वार्थत्वं तथापि लि
टि धातोरित्यादौ विधेयानिर्देशेन वैयर्थ्यप्रसंगात् न्याय मते कुटिलिका यास्वाप्वित्केवलो विधिः नापि शेष इत्यादिवल्लक्षणं चाधिकारश्चेत् तथा हि सति
सर्वेषामेव शब्दानां प्रथमस्यैकाचो नेन द्विर्वचने मित्वं लिटि धातोरित्यादि वैयर्थ्यं स्यात् धातोर्लिट्येव लिटि धातोरेवेति नियमार्थत्वे वैयर्थ्यमिति चेन्न विधिनि
यमसंभवे विधेर्विज्ञायमानत्वात् अस्य हि पारार्थ्येन च स्वभावि नियतात्वेनो विधित्वं तथाप्येवराणि नयुक्तं अतः परार्थ्यमेवायं तत्रापि न परिभाषा द्वेयं विनिर्दि
धीयमानं प्रथमस्यैकाचो द्वे इति तत्रापि इति एवं हि सर्वस्य द्वे इत्यत्रैवास्य मायाहुतिरिति तत्रैव एकाचः प्रथमस्येति वाच्ये स्यात् लिटि धातोरित्यादिकं च सिद्धेयानि
र्देशाद्वैयर्थ्यमापद्यते अतः पारिशेष्यात् स्वरितत्वाच्चाधिकार एवायमिति निष्कर्षमाह एकाच इति चेति अधिकारोऽयमिति वक्ष्यमाणे पृथक् स्वरितत्व प्रदर्शनार्थमे

॥श्रीगणेशाय नमः ॥ ॥एकाचो द्वे प्रथमस्य ॥ ॥एकाच इति च द्वे इति च प्रथमस्येति च त्रितयमधिकृतं वेदितव्यं इत उत्तरं
यद्वक्ष्यामः प्राक् संप्रसारणविधानात्तत्र एकाचः प्रथमस्य द्वे भवत इत्येवं तद्वेदितव्यं वक्ष्यति लिटि धातोरनभ्यासस्येति तत्र ॥ श्रीः ॥ ॥

॥श्री॥ ॥श्री॥ ॥छ॥ ॥छ॥ ॥

वमुक्तं एतत्त्रितयमिति तस्य प्रयोजनं पत्रपद्ये सिद्धं तत्र तस्य संबंधः यथाऽजादेर्द्वितीयस्ये त्यत्र एकाचो द्वे इति उभे अभ्यस्तमित्यत्र द्वे इति लिटि धातोरि
त्यादौ सर्वसंबध्यते इत उत्तरमिति अनंतरोक्तस्यैव विवरणं प्राक् संप्रसारणापिधानादिति । तत आरभ्य तु नास्य संबंधो विधेयांतरनिर्देशात् स्वरिते कृते
नाधिकार इति वा आरभ्मानात् सामान्येनोक्तमुदाहरणं निष्पन्दयिष्यति । वक्ष्यतीति । अत्र यदि धातोरेकाच इति सामानाधिकरण्येन संबंधः स्यात्तर्हि
प्रभृतीनामेव स्यात् न जागर्त्यादीनां प्रथमग्रहणं चानर्थकं स्यात् नह्येकाचो धातोर्नाद्वितीयादिरेकाचस्ति न च प्रथमस्य धातोरिति संबंधः तथा हि
सति धातुपाठे प्रथमपठितस्य भवतेरेव स्यान्नतत्र भवति ग्रहणमेव कर्तव्यं स्यात् अथैकाचो धातोः प्रथमस्यावयवस्येति संबंधः तदप्युक्तं सह नि
र्दिष्टयोः सामानाधिकरण्यस्य न्यायतः प्राप्तस्य त्यागायोगादतो वैयधिकरण्येन संबंध इत्याह ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ राम॰
१

धातोरवयवस्येति। द्वितीयस्य चेति। यद्यप्यत्र द्वितीयग्रहणं नास्ति तथापि लिटि धातोरित्यत्राप्यधिकृतमस्ति तस्य वार्थः प्रदर्श्यत इति नासंगतं किंचि
त् जजागारेत्यादौ तिमुक्ते ततयाक्रमेणोदाहरणानि। एकाच इति यद्यप्येतत्सुब्वचः स्यात्तदा धातोरित्यनेन सामानाधिकरण्ये पचेटियायम्आरे
त्यादावेवस्याद्वैयधिकरण्ये तु पपाचेत्यादिषु भवद्द्वित्वं पि द्विर्वचनमन्यात्रस्येव स्यात्तत्रश्च हलादिशेषः शर्पूर्वाः खयः लिघम्पा सस्रो भयेषामित्याद्य
नुपपन्नं स्यात् एकग्रहणं चानर्थकं प्रथमस्याच इति विशेषणादेकस्य च धातोरनेकप्रथमाजसंभवाद्वचः सेकत्वं विवक्षिष्यते किमेकग्रहणं
नतस्माद्बहुब्रीहिरयं तदाह एकाच इति बहुब्रीहिनिर्देश इति। बहुब्रीहिणाविवक्षितस्यार्थस्य घतिपादनं बहुब्रीहेस्त्वुदाहरणं बहुब्रीहिनिर्दे
शः॥ विग्रहप्रदर्शने विस्पष्टप्रतिपत्त्यर्थं। यदि बहुब्रीहिनिर्देशस्ततो बहुब्रीहेरन्यपदार्थप्रधानत्वाद्यथा चित्रगुरानीयतामित्युक्ते पस्यानागवः

धातोरवयवस्यानभ्यासस्य प्रथमस्याजादेर्धातोर्द्वितीयस्य चैकाचो द्वे भवतः। जजागार पपाच ययाच उचाय आरएकाच इति ब
हुब्रीहिनिर्देशः। एकः अच् यस्य सोयमेकाजिति तत्रावयवेन विग्रहः समुदायः समासार्थः। अभ्यंतरश्च समुदायेवयवो भवतीति सा
कस्यैव द्विर्वचनं भवति॥ १ ॥ ॥श्रीरामायनमः॥ ॥श्रीः॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥

सराचानीयते न चित्रागावः तद्वदत्रोपलक्षितं तदुभयपार्श्ववर्त्ति मंजनद्वयमेव द्विरुच्येतेन न तदुपलक्षणाभूतोजित्यत आह तत्रेति। भवति वै बहु
ब्रीहावपि कश्चित्तदन्यपदार्थस्यापि कार्ययोगः न यथा शुक्लवाससमानयेतिमत्वर्थे बहुब्रीहिस्तत्र यथा दंडीति षाणीति संसर्गे मत्वर्थीयस्तन्ने
त स्यद्विष्टत्वाद्गुणस्यापि कार्ययोगस्तद्वद्बहुब्रीहावपि यत्र संसर्गो गम्यस्तत्राविरुद्धो गुणस्यापि कार्ययोगः। अभ्यंतरश्चेति अंतर्भूत इत्यर्थः॥
आभ्यंतर मितिपाठे अभ्यंतरं मध्यं तत्र भवमाभ्यंतरं साकस्यैव द्विर्वचनं भवतीति यथा तत्संनिहितमवयवांतरं द्विरुच्यते तेन तथोपलक्षणीभूतोप्य
ज्वि स्यर्थः॥ अत्र ज्ञापकं दीर्घीकित इत्यादि॥ १ ॥ ॥७॥ ॥७॥ ॥

द्योतयति एवं पचतिसत्त्वेति। तेनैव तत्त्ववयवो ऽच्छब्दः पचा द्व्येति। चकारात् टकारश्च व्यपदेशिवद्भावादेकाजेव यथेवांगुल्लणत्वेवदत्तो गुमिमां स्तं थाह स्तोपि
तद्दत्त्वापि ततश्च सर्वेषामेव तेषां द्विर्वचनप्रसंग इति शेषः। नन्वर्थवद्ग्रहणे नानर्थकस्येति समुदायस्यैव भविष्यति नावयवानां। न त्वेवं ज्ञागस्योदीनां
न स्यात् किं च यत्रेशे इति आदेर्विशिष्टं शब्दस्वरूपं गृह्यते तत्रैवेयं परिभाषा अत्र तु धातोरवयवस्यैकाच इति तद्रूपस्यैनोपलक्षणं न ज्ञाग् पचेदेः सेवमा
दिकं गृह्यते ननु स्वरूपेणोति नेहतस्याः प्रवृत्तिः। परिहरन्नित्त्रेति। तेषु समुदायादिष्वेकाच्सु मध्ये अवयवैकाचः प्रथमानद्विरुच्यते कुनरस्माहत थाह
सादि। अयमभिप्रायः किमेकस्मिन्नेव प्रयोगे युगपच्च सर्वप्रयोगस्थो घोतपर्यायेण वा किं वा प्रयोगभेदेन कस्य चिन्नकस्य चन तिनतावदाघः कल्पः

एवं ह्य पचद्वत्यत्रयेनैवाचः समुदाय एकाच् तेनैव तत्त्ववयवो ऽच्छब्दः पचाद्वृश्यातत्र पृथगवयवैकाचोन द्विरुच्यते किं तर्हि
समुदाये एकाजेव तथाहि सकृच्छाब्दप्रवृत्ता सावयवः समुदायो नु गृह्यते पचाचेत्यत्र प्रथमत्वं व्यपदेशिवद्भावादेवः
त्यायश्चारेत्यत्र एकाच्वमपि व्यपदेशिवद्भावादेव॥ २ ॥ ॥श्री४॥ ॥श्रीः॥ ॥श्री३॥ ॥श्रीः॥ ॥

प्रभितस्य तु ष्ठानयोर्द्वयोरप्यसंभवात् तथा ह्येकाच्त्वेन निरूपितं द्विर्वचनं प्रमातव्यं न चैकोच पचवो युगपदनेकावयवत्वेन शक्तो निरूपयितुं तत्क
थं युगपत्प्रमीयतां प्रमितं वा कथमनुष्ठीयतां न त्वेकस्मिन्नेकाचि द्विरुच्यमाने तदेवान्यएकाच्छक्यो द्विर्वक्तुं वाचः क्रमभावित्वात् नापि द्वितीयोः
न भ्यासस्येति प्रतिप्रतिषेधात् नवस्थापातात्त्वत स्मात्प्रयोगभेदेन सर्वे प्रसंग इत्येष एव पक्षः संभवति तत्र णिजिरशेषवयोषरायोरस्यस्पैप्लोप
दानिशब्दस्य द्विर्वचनं तत्कृतेनेनेनिजः दत्सत्रन कश्चिद्दोषः नेतिजन्ति अनेनितुरनेनिक्तदित्यत्राटस्यत्वासिजस्यास्य विदिभ्यश्चनाप्यस्माच्छत्तुरित्य
द्रावनुम भावनुम प्रतिषेधान स्युर्जकारेणाव्यवधानात् रुकारस्येच्छब्दस्य च द्विर्वचनेरुपमेव नसिध्यतीत्येष एव दोषः तस्य परिहारः शास्त्र
हानिप्रसंगादिति॥ ॥श्रीः॥ ॥६॥ ॥

अवयवे हि द्विरुच्यमानेऽवयवांतरविषयं समुदायविषयं च शास्त्रं हीयेत तान्नु शास्त्रेण प्रमितमेनयदिनानुष्ठीयेत स्याच्छास्त्रहानिः अत्र तु पर्यायि
णा प्रतीयत इत्युक्तं तच्चानुष्ठितमेव कथं शास्त्रहानिः। अत्रानुभवानाद्यनुष्ठापयन् शास्त्रे द्विरुच्यमाने च कारः किमिति न द्विरुच्यते तदा न द्विर्वचनस्याप्रतीत
त्वादिति चेत् किमिति न प्रतीयते तेन सह हैकाक्षेना निरूपितत्वादिति चेत् किमिति न निरूप्यते मैनो नमत्रोऽत्र शंत स्याघास्मिन्प्रयोगे यच्च यावच्च प्रथममेका
क्षेन तत्कालेन निरूपयितुं तस्य सर्वस्य द्विर्वचनं प्रमातममनुष्ठातमेवमस्य यथानुक्रियमाणं प्रतीत्यनुष्ठानयोरुभयोरपि शास्त्रहानिमाहवृतित
स्मात्समुदायस्य द्विर्वचनमिति। न चात्रापि पक्षे अवयवविषये शास्त्रहानिः अवयवात्मकत्वात्समुदायस्य नत्ववयवानां द्विर्वचनमकृत्वा
समुदायः शक्यो द्विर्वक्तुं यथाहभाष्यः प्रचलन्महावयवैः प्रचलति। अथ कथं पपाचेति द्विर्वचनं शव्ता धातुरेवायं न धात्ववयवः नापि प्रथ
मः द्वितीयादिषु हि सत्सु यस्मात्पूर्वो नास्ति स प्रथमः कथं तर्हि जेयायेमा दौयत्रे कोजस्येति अतिरिक्तोऽन्यपदार्थो नास्ति तत्राह पपाचेत्य
त्रेति एकाच्त्वमयीति। अपि शब्दात्प्रथमत्वमपि उभयत्रापि धातुं प्रत्यवयवत्वं प्रथमत्वं व्यपदेशिवद्भावादिति मुख्य एकाच्व्यपदेशोऽ
वयवव्यपदेशश्च येषामस्ति ते व्यपदेशिनोऽजादिषु जागिसेव मादयः तेषामिवैषामपि कार्यं भवतीत्यर्थः। न चेदं वचनं लौकिकोऽयं न्या
यः लोके हि शिलापुत्रकस्य शरीरमिति विहेऽवसु भेदेऽप्यसत्यपि भेदव्यवहारो व्यपदेशाभेदात्प्रयोगदर्शनात् शिलापुत्रकः क्रीयमाणो विक्रीयमा
णो लाघवस्थायुक्तो यो दृश्यते स एवेदं शरीरमिति यदि दृश्यमानावस्थाभेदेन व्यपदिश्यते यथा चेत्यत्रापि पचेरनंतरप्रयोगविषयस्य स
प्रतिप्रयुज्यमानं लिट्परं रूपमवयवदतिशक्यं व्यपदेष्टुं प्रथमगर्भेण हतेत्यादावसतोऽपि द्वितीयादीन् बुद्ध्यापरिक
ल्प्य मुख्यप्रथमसाधर्म्याद्यथा लोके एकस्मिन्नपि प्रथम इति प्रयुज्यते तद्वदत्रापीत्यायेत्याद्यापि रतः यंति आयन् आगात जिगमिष
तीत्यनंतयस्येणएकोऽयमिकार इत्यन्यपदार्थोऽपि कल्पितः प्रसिद्धप्रसिद्धिकृतश्च गौणमुख्यविवेकः एवंविधस्तु व्यवहारो मुख्याद
पि प्रसिद्ध इति न गौणत्वदोषः णवं चकृत्वा यथा लिटि भवतेः लिघम्पासस्याभये षां दीर्घ इणः कितीत्यादिकमुपपद्यते॥ १ ॥

॥ श्रीः॥ ॥श्रीः॥ ॥

कृ.का.५८.१

३

अत्र केचित्स्थानषष्ठीयोगे क्रियापेक्षायां शब्दानुशासनप्रस्तावाच्छब्दरूपे संबन्धे षष्ठी स्थानेयोगेति वचनाद्देकाच इति प्रथमस्येति स्थानषष्ठ्यास्तत्सापेक्षस्य स्थाने द्वे शब्दरूपे भवत इत्यर्थो भवतीति यथा स्थेर्भ इत्यादौ तदा स्थाने द्विर्वचनमित्ययं पक्षो भवति यदा शब्दसंबन्धिनी उच्चारणसंबन्धे क्रियारूपस्य शब्दस्य च स्थानादिशब्दसंबन्धायोगात्षष्ठ्यास्तु उच्चारणाक्रियापेक्षैवैकाच इति कर्मणि षष्ठी एकाचोऽद्वे उच्चारणे भवतः एकाचं द्विरुच्चारयेदित्यर्थः तदा द्विःप्रयोगो द्विर्वचनमित्ययं पक्षो भवति तत्राद्यपक्षे स्थानेन्तरतम इति वचनाच्छब्दतश्चार्थतश्चान्तरतमयोर्द्वयोर्विधानाद्यद्यपि केचन प्राप्नुत इति दोषा न वक्तारः चिचीषतीत्यत्र तु सन्यङोरिति षष्ठ्याः स्थापयिष्यमाणत्वाच्चिस् इत्यस्य स्थाने चिस्चिस् इति शब्दान्तरस्यादेशो भवतीति तस्य सकारस्य सन्त्वे प्रमाणाभावात् इण्नणां मनीति दीर्घत्वं न स्यात् आदेशस्य स्थानिवद्भाव उच्यते नादेशावयवस्य स्थान्यवयववद्भाव इति स्थानिवद्भावेनापि सन्त्वं नास्तीति स्यात् तु यत्र सन्मात्रस्य द्विर्वचने स्थानिवद्भावेन सन्त्वे सोऽवकाशः यथा इत्साः सन् इषिषतीति ननु शब्दान्तरप्राप्त्यादि द्विर्वचनमयनित्यं अप्राप्त्या तु दीर्घत्विमित्युभयोरनित्ययोः

॥द्विःप्रयोगश्च द्विर्वचनमिदं॥ ॥छ॥ ॥छ॥ ०

परत्वाद्दीर्घत्वे कृते द्विर्वक्ष्यते इह तर्हि क्रियते सनि कास इत्यस्य द्विर्वचने समुदायस्य समुदाय आदेशो तत्र आदेश एतत्वात् स्थित्वं प्रकृतिरप्र सय इति तत्र क्नोप्रत्ययस्येति संप्रसारणं न स्यात् नुहावजुहुवतुरित्यादावेव तु स्यात् यत्र क्रमात्रस्य द्विर्वचनात् स्थानिवत्त्वेनैष दोषः क्नोप्रत्ययस्येति अधिकरणे षष्ठी क्रियते तेप्रत्ययस्य भविष्यतः प्रागेव संप्रसारणं परत्वं हलादि इति अप्राप्तनगमामिति वा दीर्घत्वं कृत इत्यस्य द्विर्वचने इह च पिपक्षति उद्दिवक्षतीत्यत्र सर्वत्रासिद्धमद्विर्वचन इति वचनात् सत्वात्कुत्वादिषु कृतेषु पश्चाद्द्विर्वचनमिति न कश्चिद्दोषः इह तर्हि आटिटत् आशिशत् इति णिलोपे कृते पि द्विर्वचने चीति रूपस्थानिवद्भावाच्छब्दान्तरप्राप्त्यभावेन नित्यत्वात्पूर्वं द्विर्वचने सति समुदायस्य समुदाय आदेश तत्र संप्रमुग्धत्वात् प्रकृतिप्रत्ययत्वं नष्टं णि इज्न भवतीति णिलोपो न स्यात् तस्य तु कारणोत्यादिरवकाश इह च जिघांसतीति समुदायस्य समुदाय आदेशे कृते हन्तेर्भागद भ्यासो चेति हन्तेः कुत्वं न स्यात् तस्य तु जंघनिथ जघंथ अहं किल जघन जघन्थ आनित्यादिरवकाशः यत्र हन्तिमात्रद्विर्वचनात् स्थानिवद्भावः तदेवमाद्यपक्षस्य दुष्टत्वाद्द्वितीयं पक्षमाश्रित्याह द्विःप्रयोगो द्विर्वचनमिति। चशब्दोऽवधारणे। कथं पुनः षष्ठी स्थानेयोगेति परिभाषायां सत्यां द्विःप्रयोगपक्षः इत्याशङ्क्य आह॥ ॥ राम० ३

आवृत्तिसंख्याहीति। यथावृत्तिसंख्या विधीयते एवं सति द्विर्वचनं प्राप्नोति तस्याप्युच्चारणमावृत्तिः अतस्तदेकं आह नीचहे इति द्विर्वचनप्रसंगः।
तस्मादावृत्तिकृता संख्या आवृत्तिसंख्या कस्योच्चारणस्य आवृत्तमुच्चारणं विधीयत इत्यर्थः तत्र च स्थानादेशाभावो न संभवतीत्युक्तं। अत्र पक्षे
पुथादिषु द्विस्तादौ दोषो न भवति तथा दर्शयति तेनेस्तादिना। नन्वत्रापि यस्येन मतुपोऽसहेहत्यादौ नत्वसत्वयोः कृतयोर्धातोरादेशादित्वस्य हिः प्र
योगेष्वनिवृत्ते रेत्वाभ्यासलोपो न स्यात् नोपदेशोत्तरेतुनादेशादित्वमयदेशः अलाश्रयत्वेन स्थानिवत्वाभावात्समुदायादेशत्वेनादेशादित्वाभावा
न्न दोषः हिः प्रयोगेपि न दोषः। लिटि य आदेश इति विशेषणात् नत्वसत्वयोश्चानैमित्तिकत्वात् इहतर्हि बेभिदिते। तिवेभिद्यत इत्याद्यन्ते चिन्त्य अल्लोपय
लोपयोः कृतयोरुपदेशोऽयमेकाजनुदात्तः स एवायमिति गिनिषेधः स्यात् उपदेशोत्तरेत्वेकाज्व्यपदेशस्यालाश्रयत्वादेभिदितस्य स्वकृत्वाद्विघ इति
द्विवचनान्नेति निषेधः हिः प्रयोगेपि न दोषः पूर्वस्मादपि विधौ अल्लोपस्य स्थानिवद्भावात् इहतर्हि जरीगृहितेति ग्रहोऽलिटि दीर्घत्वं स्यात् न
यत्र स्थानिवत्वं दीर्घविधौ निषेधात् नैष दोषः एकाच उपदेश इत्यत एकाच इत्यनुवर्त्तयिष्यते यङ्ग्रहेर्विहिते यदा तु धातुकेतस्य परत्वं तस्य दीर्घ

आवृत्तिसंख्या हि द्विरिति विधीयते तेन न स एव शब्दो द्विरुच्चार्यते तेन तु शब्दान्तरमस्य स्थाने विधीयते॥ २ ॥ ॥

इति जरीगृहस्य शब्दाद्विहितस्यन्नमविष्यति। इह चास्मिषे चेति यद्यपिस्मिचेर्लिङि द्विहितः तथापि द्विर्वचने कृते समुदायस्यैकाय्पदसंज्ञा न तत्स्वपवस्य सेच स्त्रा
दस्य पदसंज्ञापान्तरादिग्रहणानि हन्ते स्मास स्ववर्जनायोगादिति मात्यदाद्यादिति षत्वनिषेधाभावः। इहतर्हि विभिद्वानि मा दोऽइत कृत्वोप्युच्चारे
णो एकाज्ञ्वं न यातिकिं पुनर्द्विरुच्चारण इति वस्त्वेकाज्ञाद्यमामिती ट्प्रसंगः तन्त्वउच्चारणभेदाद्विरुद्रसंख्याप्रादुर्भावे पूर्वसंख्या कृतमपदेशानि
वर्त्तनात् अत एव गाङ्ग्रहणं कृतं यथवि वा निसा दादिवित्यर्थः इहतर्हि विसुष्वापेतित स्यैकार्थवतो द्विरुक्तिभावमात्रमित्यभ्यासस्यार्थवत्वात्तु पेः षत्वमि
त्यनानर्थको विसुषुप्तीति वस्समाणो विहन्येते नैष दोषः अन्वयव्यतिरेकाभ्यां शब्दानां शेषार्थावमायः न चात्राभ्यासापजने कश्चिदर्थ उपजा
यते अपायेवापयातिसः ननु स एव च वेद्विरुच्यते अर्थप्रत्यये नाभ्यावर्त्तितमयथा हि रहिर्बुध्यस्व बुध्यस्वेति। किमत्रोपालभ्ये महि न तावदर्थप्रत्य
या आवर्त्तते तदेतदेवं दश्यतोपव्यास्तमप्रश्न सुप्तोस्वपदिस्तादौ क्वचिद्विकृतः क्वचिद्धि कृतः क्वचिदङ्गमापेशोऽर्थप्रतिपादयतितथा सुष्वापेसा
दावावृत्त एव प्रतिपादयतीति॥ ॥३॥ ॥छ॥ ॥

पद १

५ ॥अजादेः॥ ॥प्रथमद्विर्वचनापवादोयमिति। ननु विरोधे समानफलत्वे च बाध्यबाधकभावो यथा ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति। स च तु रक्षिरिसिषादिषु चतुरश्रितत्वं यो यथा नैवाश्वरूढं नरमिति। न स्वावयवेन नवेतु स्वफलेन नतत्फलकोषु जातो बाध्यते न स्वेश्चोलूखलमुसले यत्रतेन तदुभयं न भवति न तत्र बाधो यथा कृत्सु प्रत्ययसंज्ञानां यथा गतम्। द्वितत्र्याज्ञप्रत्ययसंज्ञानामिह न समानफलत्वं फलस्यैकस्य चिरभावात्। अस्ति च संभवो यदुभयं स्यात्। स्यादेतत् द्वयोरासीनयोर्मध्ये कस्मिंश्चिदुपविष्टे द्वितीयस्तृतीयो भवति तथा प्रथमे द्विरुक्ते द्वितीयस्तृतीयो भवतीति स्वेवात्राप्यसंभवः इति स्यात्। एवं यदि प्रथमद्विर्वचनमेव नियोगतः पूर्वं स्यात्। किं च नात्रोऽसन्निकर्षाद्द्वितीयस्य द्विर्वचनमुच्यते किं तर्हि द्वितीयमात्रस्य ततः किं प्रथमे द्विरुक्ते यो द्वितीयस्तस्य भविष्यतीति नन्वेवमनारम्भसमं स्यात्। कथमटेः सन् प्रथमस्य द्विर्वचने अट् अट् इस इति स्थिते हलादिः शेषश्च प्राप्नोति द्विती

॥अजादेर्द्वितीयस्य॥ ॥प्रथमद्विर्वचनापवादोयं अजादेर्द्वितीयस्यैकाचो द्विर्वचनमारभ्यते। अच् आदिर्यस्य धातोस्तदवयवस्य द्वितीयस्यैकाचो द्वे भवतः। अटिटिषति अशिशिषति ५ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥

ये
यद्विर्वचनं च परत्वान्नित्यत्वाच्च हलादिः शेषो द्विर्वचने एतदेव रूपं यो यकारो ह्योः पररूपमित्येतावत्। नानारम्भसमं। कथं प्रथमद्विर्वचने हलादिः शेषः अअट् इति स्थिते समानदीर्घत्वं प्राप्नोति द्विर्वचनं च द्वयोर्निमित्तयोः परत्वादीर्घत्वं न द्विर्वचनं नाभ्यासे चायेश्च तदन्तर्बहिरङ्गं नतः किं अन्तरङ्गमतो गुण इति पररूपत्वं प्राप्नोति समानाश्रये च वार्णादाङ्गं बलीयः एवं न हि कृते पि यः रूपं तत्र द्वा गादिर्दीर्घत्वं प्राप्नोति कृते चेति नित्यत्वं परत्वं चेति द्वेत स्य प्राबल्यं कारस्य पररूपस्य त्वंतरङ्गत्वमेकमेवेतीत्वमेवं तावत् भवति सति तु तस्मिन्नभ्यासस्यासवर्णादि तीय जुः प्राप्नोति द्विर्वचनं च तत्र द्विर्वचनमिष्टिः कृते यदिस्य प्राप्नोति अकृते त्वडिस्य स्येति शब्दान्तरप्राप्त्या नित्यं तेन परत्वान्नित्यत्वाच्च यदिः कृते यद्भिः शब्दस्य द्विर्वचने हलादिः शेषः इयिषति ओणेरुवुवोणिमतीति भवति असति द्वितीये द्विर्वचने इयरिषति उवोणिषतीति भवतीति नानारम्भसाम्यं। एवं तर्ह्येनभ्यासस्येति ग्र.स०
निषेधादेकस्मिन् द्विरुक्ते नाप्रो द्विर्वचनं शक्यं तदस्यैव संभवः॥ ५

अथ वा सामान्यविहितस्य विशेषविहितं समस्यापि संभवे बाधकं भवतीति यथा दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति । ओदनसेकार्यस्य फल
स्य समानत्वाद् दधिबाध इति चेत् इहापि तक्रदध्यभिधानार्थं फलमेकं अर्थाभिधानाय हि द्विरुच्चारणं तच्चैकेनैव साध्यते अथ रूपविशेषार्थमपि फ
लं भिन्नं अन्यद्धि रूपं प्रथमस्य द्विर्वचने अन्यच्च द्वितीयस्य तत्रापि रूपविशेषात्मं फलं भिद्यते आसां हि दध्नस्त्वं प्राप्ता हि तन्न स्यात् अतो नाप्राप्ते
तस्मिन्नारभ्यमाणत्वमेव बाधनिबंधनं नात्र संभवः सामान्यशब्दा हि विशेषशब्दसंनिधौ तत्रेतरविषये संकुच्यंते ततो न्यत्र वा यथा वसिष्ठो ब्राह्मणो
ब्राह्मणा आयाता वसिष्ठोप्यायात इति । ननु कौण्डिन्यस्यापि ब्राह्मणत्वाद् दधिप्राप्तिः इह तु प्रथमस्योच्यमाने द्वितीयस्य न प्राप्नोतीति कथं येनना
प्राप्तिः न ह्यसौ द्वितीयस्य प्राप्नोतीति किंतु धातुसामान्यविहितं प्रथमद्विर्वचनमजादेर्धातोः प्राप्तमिति तत्र दधितक्रान्यं विधेयं भिद्यते इह
तु कार्यी भिद्यते इह तु कार्यी भिद्यते विधेयं द्विर्वचनमेकमिमेतावान्नविशेषः यद्यपि तत्रापि दानमेव विधेयं तत्रापि दानभेदः इहापि कार्यिभे
दाद्भेदः स्यादिदमुक्तं प्रथमद्विर्वचनापवादोयं द्वितीयद्विर्वचनमिति सर्वथा तत्प्रथमद्विर्वचनं द्वितीयद्विर्वचनेन बाध्यते । यद्येवं यथाभूतस्यैका
चः प्रथमद्विर्वचनं प्राप्तं तथाभूतस्यैव द्वितीयद्विर्वचनं बाधकं स्यात् समंजनस्येत स्यात् प्राप्तमिति तेन सह मंजनामामप्यनाप्राप्तेः प्रसंगः
स्यादेवं यजादिषु प्रथमस्यैकाचः किं विहितं प्रतिषिद्धं वा भवेत् इह तु विशेषसंनिधौ सामान्यशब्दस्येतरतोन्यत्रवृत्तेरजादिषु प्रथम
द्विर्वचनस्याप्रतीतत्वात् प्रसक्त्यनुमानमेव बाधः मंजना निश्चयदायस्यकार्यत्वेऽपि दानं दृश्यतीति द्वितीयैकाजंतर्भावात्तेन सह द्विर्वचने केनचि
त्येते अत्र च लिंगं न न्द्राः इति प्रतिषेधः । अथ इयाय आरिरोकेन विर्वचनं न तावदने नाद्वितीयत्वात् न्यापि पूर्वेणाजादिषु तस्याप्रवृत्तेः ।
ननु चात्र द्वितीयस्य प्रवृत्तिः अटिटिषतीत्यादौ तत्र तदप्रवृत्तिः यत्र तु द्वितीयाभावादेतन्न प्रवर्त्तते न तत्र तस्य प्रवृत्तिर्वार्यते तत्रापि वार्य
ते अजादेरिति सामान्यनिर्देशात् सामान्यनिर्देशो हि क्वचिदपि द्वितीयवत्संभवत्सौ सर्वत्र बाधेत यथा हलादिशेषे वक्ष्यते क्वचिदपि प्रवर्त्त
मानो हलादिशेषः सर्वत्र निवृत्तिं करोतीति नैष दोषः । जात्योपलक्षिता व्यक्तिः प्राधान्येनेह गृह्यते । द्वितीयवत्सामेवेदं व्यक्तौ तेन प्रवर्त्त
ते । प्रवर्त्तते च यत्रेदं तत्र पूर्वं निवर्त्तते । जातिर्हलादिशेषे हि प्राधान्येन समाश्रिता ४ ॥

टी. ६

५

इटि कृते गुणो चेति। नित्यत्वात्परत्वाच्च। स्थानिवद्भावः प्राप्नोतीति तत्स्थाने इस्य इस्य द्विर्वचने हलादिशेषे च दीर्घत्वे सति अरीषतीति प्रसंगः। न
चात्र द्विर्वचननिमित्तमचिति। यत्र यस्मात् द्विर्वचनमुच्यते तदेव तस्य निमित्तमिति भावः। किंतर्हि कार्यीति मस्मङ्गोऽति। निषष्ठ्या आश्रयणात्। ततः किमि
त्याह न वेति। तद्भावाभावित्वे सत्यपि कार्यिणः सप्तमीनिर्दिष्टाभावाच्च निमित्तत्वं शास्त्रे स्थितमित्यर्थः। अवश्यं चैतदेवं विज्ञेयमित्याह तथाहीति गु

अरीरिषतीति। अर्तेः। स्मिपूङ्रञ्ज्वशूनां सनीति इटि कृते गुणो रपरत्वे च द्विर्वचने चेति स्थानिवद्भावः प्राप्नोतीति तत्र प्रति
विधानं। द्विर्वचननिमित्ते ह्यचि तु अतेन चात्र द्विर्वचनस्य निमित्तमिट्। किं तर्हि कार्यी न च कार्यी निमित्तमित्याश्रीयते तत्
था हि क्ङिति निमित्तयोर्गुणवृद्ध्योः प्रतिषेधो विधीयमानः अपि तेस्तत्र न भवति न हि कार्यिणः ह्रीङो गुणं प्रति नि
मित्तभाव इति। अत्र केचिदजादेरिति कर्मधारयात्पंचमी मिच्छंति अचवश्यादेस्तत्र इस्य एकाचो द्वे भवतः तेषां द्विती
यस्येति विस्पष्टार्थं द्रष्टव्यं॥ ॥श्रीः॥ ॥श्रीकृष्णायनमः॥ ॥श्रीकृष्णदामोदरगोपिकावः॥ .

णवृद्ध्योरिति। क्ङिति चेत्यत्र वृद्धेरपि प्रतिषेधः गुणवृद्धोरित्युक्तं। अपि तेस्तत्र न भवतीति गुणस्य प्रतिषेधः। क्वचित्तु ज्ञायक इत्यपि पठ्यते तदयु राम०
क्तमप्रकृतत्वात्तत्र वृद्धेः तथा चोक्तं तत्र गुणग्रहणमेव कृतं। तेषां द्वितीयस्येति विस्पष्टार्थमिति। तस्मादित्युत्तरस्येत्यनंतरस्य द्वितीयस्येच भवि ५
ष्यतीति नतृतीयादेः यदातु बहुव्रीहेः षष्ठी अजादेर्द्वितीयस्य धातोरिति तदा सामर्थ्याद् प्रथमार्थ्यारंभे तृतीयादेरपि प्रसंगः॥ ॥७॥ ॥

॥नन्द्राः॥ ॥उंदीद्रेदनेश्चरद् इ अभियोगे दोपधः षुत्तं अर्चयतज्ञायां इस्तदर्शनाकलयोः इ कुत्सायां गतौ उज्झि विषये यद्कर्मं तद्धयवरडि सत्रे वोक्तं। यकारप
रस्येति यकारः परो यस्मादुकारात्तस्य समर्थः। अंजनस्येति। तृतीयकं ञ्जनसहितस्यैकाच इत्यर्थः तत्र षकारस्य द्विर्वचनेन भवति। अपरे पुनरिति अस्मिन्पक्षे ईर्ष्य
तेः स्यनिकृते इति भाष्ये पंतत्वं बाधित्वा तृतीयस्यैकाचो द्वे भवतः। नामधातुः सुत्रातुः॥ ॥पूर्वोभ्यासः॥ ॥अर्थादिति सामर्थ्यात् पूर्वशब्दोवय
वचनः अवयवश्चाभ्यासविनो भवति स चेह कश्चिन्नामधातन्नं तृतीयस्यैकाचो द्वे भवतः। अश्वीयियिषति। अश्वीयिषिषति। अपर आह। यथोष्टवा

॥नन्द्राः संयोगादयः॥ ॥द्वितीयस्येति वर्त्तते द्वितीयैकाजवयवानां न्द्राणां तदंतर्भावाद्द्विर्वचनं प्राप्तं प्रतिषिध्यते। नकारदकाररेफाः द्वि
तीयस्यैकाचोवयवभूताः संयोगादयो न द्विरुच्यंते। उंदिदिषति अडिडिषति अर्चिचिषति। न्द्रा इति किं ईर्ष्यिचिषते संयोगादय इति किं प्रा
णिणिषति अनितेः उभौ साभ्यासस्येति णत्वं। द्वितीयस्येत्येव इंद्रीयमिति। केचिदजादेरिति पंचम्यंतं कर्मधारयमनुवर्त्तयंति तत्र प्रयोज
नं इंद्रिद्रीयिषति अजादेरनंतरस्य नकारो न द्विरुच्यते दकारो द्विरुच्यते इंदिद्रीयिषतीति वा वृत्तदंता द्विद्रीयिषतीति सन् बकारस्याप्ययं
प्रतिषेधो वक्तव्यः उब्जिजिषतीति यदा बकारो यमुपदिश्यते तदायं प्रतिषेधः दकारोपधोपदेशे तु न वक्तव्यः वर्त्वं तु दकारस्य विधातव्यं।
यकारपरस्य प्रतिषेधो न भवतीति वक्तव्यं आर्यते। अर्तेरय सं भ्रूणोतीनामुपसंख्यानमिति यङ्। तत्र यङि चेति गुणः तत्र द्विर्वचनं ४
ईर्ष्यतेस्तृतीयस्य द्वे भवत इति वक्तव्यं कस्य तृतीयस्य केचिदाहुः व्यंजनस्येति। ईर्ष्यिषिषति अपरे पुनस्तृतीयस्यैकाच इत्याहुः भवते ई
र्ष्यिषिषति। कंड्वादीनां तृतीयस्यैकाचो द्वे भवतः कंडूयियिषति असूयियिषति उत्रीयिषिषति पुपुत्रीयियिषति॥ ॥पूर्वोभ्यासः
॥ ॥द्वे इति प्रथमांतं यदनुवर्त्तते तदर्थादिह षष्ठ्यंतं जायते तत्र प्रत्यासत्तेः अस्मिन्प्रकरणे ये द्वे विहिते तयोः पूर्वो यो वोभ्याससंज्ञो भ
॥ वति। पपाच पिपक्षति पापच्यते जुहोति अपीपचत् अपीपठत्। अभ्यासप्रदेशाः अत्र लोपोभ्यासस्येत्ये
वमादयः॥ इति। पुपुत्रीयिषति। पुत्रित्रीयिषति। पुरुषकरणं इति। अनेन सर्वस्य द्वे इत्यत्र प्रकरणे इयं संज्ञा न भवति तेन तत्र हलादिशेषाद्यभावः। यद्ये
वं पु अभिर्दिधः अनेनैव शब्दे द्वे इत्यत्रानुवर्त्तनीयं न वा अनुवर्त्तमपि प्रथमांतमेवावस्थितम् अवयवे हा षष्ठीयत्तुमलमिति तत्सामर्थ्यात्। अस्मिन्प्रक
रण इति। अनेन सर्वस्य द्वे इत्यत्र प्रकरणे इयं संज्ञा न भवति तेन तत्र हलादिशेषाद्यभावः। यद्येवं घुमिति गमि जुहोत्यादीनां द्वे इत्यत्र न प्राप्नोति कर्त्त
मोत्र पल्लः नयोः एवं विषयवदिति अवयववाचिभिर्दिक्शब्दैर्योगे पंचमी न भवति तस्य परमाम्रेडितमिति लिंगात्। यथा वेत्यादौ हलादिः शेषः सन्म
तः दीर्घोकितः कुहोश्चुः अभ्यासे चर्च संवल्लघुनीति दीर्घो लिचो रित्यादौ निमित्तयोगमभ्यासकार्यम्। ५

प्र॰६ उभेअभ्यस्तं॥ ॥६॥ इतिवर्तमाने इत्यादि द्विरुक्तसमुदायस्यैकाभ्यस्तसंज्ञा यथा स्यात्प्रत्येकं संज्ञे माभूतामिति एवमर्थमुभेग्रहणं न तु संज्ञिनिर्देशार्थं
६ द्वेइत्यस्यानुवृत्त्यैवं संज्ञिनिर्देशस्य सिद्धत्वादित्यर्थः। ददतीत्यादावदभ्यस्तादित्यद्भावः अभ्यस्तयोरातइत्याकारलोपः। नेनिजतीत्यत्रे साधि। अभ्यस्तुभे
ग्रहणे हृष्टिणदेजिसादौ प्रत्येकं वाक्यपरिसमाप्तिदर्शनादिहापि प्रत्येकं स्यात् ततश्च नेनिजतीत्यत्र पृथगग्रहणे अनुदात्तत्वं स्यात् न चानुदात्तं पदमेकवर्जमिति
सेव्यानुदात्तत्वं वर्जनीयविशेषावगमहेतोः सतिशिष्टत्वादेरसंभवात्। अथापि स्यादेवमपि पर्यायः स्यात्। ननु च भीह्रीभृहुमदे इति ज्ञापकात्परस्य
भविष्यति। पूर्वस्यापि तर्हि न स्यात्सरेण अवधानात्। उच्यते च स्वरस्तत्र च समप्रवृत्तपर्यायप्रसंगः यदि तु संयोगसमासादिसंज्ञावद्द्व्यर्थत्व
प्रतिपत्त्यर्थमिहापि संज्ञाकरणं तेनान्वर्थताविज्ञाने समुदायस्यैवं संज्ञेति अतेलदोभेग्रहणं शक्यमकर्तुं न नु वयत्रोभेग्रहे तेतत्र यथा स्याद्दम्तत

॥ उभेअभ्यस्तं॥ ॥६॥ इतिवर्तमाने उभेग्रहणं समुदाये संज्ञाप्रतिपत्त्यर्थं यद्वे विहिते उभे समुदिते अभ्यस्तसंज्ञे भवतः। दद
दति ददतु। उभेग्रहणं नेनिजतीत्यत्राभ्यस्तानामादिरिति समुदाये यथा स्यात्प्रत्येकं पर्यायेण माभूत्। अभ्यस्तप्रदेशाः
अभ्यस्तानामादिरित्येवमादयः ६ ॥ ॥श्रीरामचंद्रायनमः॥ ॥श्रीजानकीवल्लभायनमः॥ ॥

रामावे माभूत् इत्येवमर्थमुभेग्रहणं कर्तव्यं अन्यथा अभ्यायश्च न नीवंते तीउमावपक्षे परत्वात्प्रतिपद्विहितत्वाच्च आपन्नपृथामीरिती
तेनन न्नाप्तिप्रतिषेधी द्वैक्वर्ज्जे द्वितीयस्यैकाचो द्विर्वचने कृते अत्रलोणेभ्या समस्येसतः प्राग्नंतरंगत्वाद्भ्यस्तसंज्ञायां रिक्तिति रे प्रत्ननु ई इत्यस्ति
स्यात्सावप्रत्येकं समुदायस्य गतत्रप्रत्येकयक्षे अभ्यासलोपे पिपरस्य न निवर्तेत समुदायस्यैव पूर्वसंज्ञा समुदायप्रकृत्राय ह्वारेकदेशमि राम॰
वृत्ताव प्यवतिष्ठते यथेयमुनई कारे लुप्ते पितङित संज्ञाश्रणानि सत्रमत्यां च संज्ञायां ई भंति ऐ ज्ञान ईर्त्सिति ऐत्सीन् इत्यत्राद्भावजुसभावनुम्प्र ६
तिषेधाः स्युरतः श्रूयमाणप्रतिपत्त्यर्थमुभेग्रहणं कर्तव्यं तत्र प्रनीषिवंतीत्यादिवाक्सिद्धेः॥ ॥१॥ ॥१॥ ॥१॥ ॥

तथाहि अजादेर्द्वितीयस्येति सन्निहितकोऽच्यमाणयोरुभयोः सत्यामप्यभ्यस्तसंज्ञायां मद्वावारथ्योनभवंतियथाचपुत्रीयिषिषंतीत्यादौ
यथेष्टं नामधातूनामिति सन्निहितकेन दुरत्रापि न भविष्यति अत्र हि ईंस्प्रशीति। स्थिते अद्वाभ्यासाद्धि पत्वाच्छुपस्य द्वावोहिशपिकृतेतेन
अवधानान्नप्राप्नोतीसन्निसः ततोऽन्तः प्राप्नोति पूर्वेणासहैकादेशस्य परत्वादन्तादेशः नित्यएकादेशः कृतेप्यन्तादेशो प्राप्नोति कृतेपिअ
न्तादेशत्वनित्यः कृते एकादेशे नसंप्राप्तवद्वावारस्यस्यग्रहणेन ग्रहणाद्द्वावेनबाध्यतेपस्यचानिमित्तं लसणांतरेणविहन्यतेजनतद
निसंश्रंतराणांसर्पिकादेशः वर्णाश्रयत्वात अंतादेशस्त्वागतत्वाद्बहिरंगः समानाश्रयेचवाणीरांगंबलीयः अंतादेशोप्यंतरंगः वस्स
तिस्थापन्नादिपूपदेस्त्रिवद्वचनमितितदेवमुभयोऽप्यंतरंगयोर्नित्यत्वेऽपि परत्वादन्तादेशः ततोऽसकारभावात्त्वाश्रयत्वेन स्यादिति
वद्वावाभावाद्धात्वादेशोनभवति। अस्तुवापूर्वमेकादेशएवमप्यात्मनेपदेष्वनतरत्यस्यादभ्यस्तादितिपूर्वेणापिसंबंधात्पूर्वस्माद
पिविधावेकादेशस्यस्थानिवत्त्वाद्द्वाः द्वावोनभविष्यतिएवमेयक्षिसत्रापिईस्प्रसिइतिस्थितेशपूचप्राप्नोतिजुसभावश्चनित्य
त्वाच्छुपिकृतेतेनअवधानान्नजुसभावः नपूर्वेणासहैकादेशोकृतेनस्यांनवद्वावाजुसनर्जुसप्रसंगः पूर्वस्मादपिविधौस्थानिव
त्वातईस्प्रसिस्यत्रापिलङ्श्रत्रादेशः ईस्प्रशततइतिसार्वधातुकमात्रापेक्षत्वादंतरंगत्वाच्छुपिकृतेतत्रसनोकारेणातोगुणोपर
रूपेपश्चात्सर्वनामस्थानेवोसन्नेनुमः प्रसक्तस्यतस्यांदशायांशत्रस्यत्तयोर्मपवर्गभावादुभयवर्णाश्रयत्वेनांनादिवद्वावाभा
वाद्वनिषेधाभावः एवंप्रतीषिषंतीत्यादावपिचिकार्षतीत्यादौतुयत्रसनोकारेनद्विरुच्यतेततत्रतेनेवअवधानाद्द्वावाद्यभावः
॥ ६ ॥ ॥ श्रीरामश्रीराम ॥ ॥ श्रीकृष्णाय नमः ॥ ॥

।जक्षित्यादयः।। ।।अत्र जक्षेश्चिपि हृद्वादिभ्यः सार्वधातुक इतीटि कृते जक्षिति रिति भवति स आदिर्येषां ते जक्षित्यादय इति वि न्तायमानेवे मतेः स
प्तम स्यन स्यात तल्लाभ्व वार्थमसंदेहार्थं वर्डकेवनिर्देशः यं स्याज्जक्षादय इति तस्मान्न्याय मुक्त विग्रहो बहुव्रीहिः किं न हि जक्ष इति पृथक् पदमित्याह जक्ष
इत्ययधातुरित्यादयः षडिति इति नानंतरो जक्षिर्निर्दिश्यते आदिशब्दः समीपवचनः अतद्गुणसंविज्ञानो बहुव्रीहिः। सेयमितियेयमुक्तप्रकारा
सेयमित्यर्थः एष स्वर इति अन्यथा ङि लाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः यणादेशे उदात्तस्वरितयोर्यणि स्वरितत्वं प्रसज्येत। शतरिमसमेतम
पादितइति। ङि लासरस्मैपदासंभवात्प्रत्ययः। पञ्चग्रहणमनर्थकं संगत्वागणेनाज्जक्षित्यादयः वेवीङोपि परे येयुः तेनेषां कस्मान्न भवति अ
त्रैवं गणपाठः वेवीङोनंतरमेव सप्तमे वशकांतो चकेरीति वचकुडु अपनयन इति केचिदिदं वीङोनंतरं आडः शासिनिय ट तिषस्तिस्वप्नातिचतत्रा

जक्षित्यादयः षट्।। ।।जक्षित्यादयो धातुरित्यादयश्च षड् धातवोऽभ्यस्तसंज्ञा भवंति। सेयं समानां धातूनामभ्यस्तसंज्ञा जक्ष भक्षहस
नयोरित्यनः प्रभृति वेवीङ् वेति नात्तुल्य इति यावत्। जक्षति जाग्रति दरिद्रति चकासति शासति दीध्यते वेव्यते इत्यत्राभ्यस्तानामा
दिरित्येष स्वरः प्रयोजनं दीध्यदिति दाशतरित्यत्र येन संपादिते नाभ्यस्ताच्छतुरिति नुम्प्रतिषेधः।। ।।श्रीः।। ।।श्रीः।।

शासो न विशेषः अभ्यस्तकार्यं गीत्यपि शान्ति परस्मैपदेच्छात्मनेपदी चायं अभ्यस्तस्वरेपि नास्ति विशेषः कथं अनभ्यस्तेपि तस्मिन्ननुदात्तेतः
परं ज्ज सार्वधातुकमनुदात्तं धातुस्वरश्च चकारी नमभ्यस्तमेव षष्षस्ती छांदसोव शिरपितस्यापि भाषायां न प्रयोगो भाष्यवार्तिककाराभ्यां वेतस्म
शांकुद्धोपि ङि त्वात्परस्मैपदासंभवः स्वरस्तर्हि प्राप्नोति अङ्किङ्रिति प्रतिषेधवचनसामर्थ्यान्न भविष्यति यदि स्यादनर्थकं तद्वचनं स्यात् दोष
भ्यस्तस्वरे सति लसार्वधातुकस्य भवितव्यमेवानिघातेनेति निषेधोऽनर्थकः स्यात् तस्मात्प्रत्ययस्वरो यथा स्यात् लसार्वधातुकानुदात्तत्वं माभूदि
त्यङ्किङ्रिति प्रतिषेधोर्थवान् भवतीति प्रतिषेधसामर्थ्यात्प्रत्ययस्वर एव भविष्यति नाभ्यस्तस्वरः। ननु चाभ्यस्तस्वरो जादौ विधीयते ततः किम
जादौ तस्मिन्प्रवृत्ते जुहुते जुहुषे जुह्वे इत्यत्र न स्यात् ह्नोपघाङ्किङ्रिति प्रतिषेधो न क्रियेत ततो धातुस्वरेणाद्युदात्तं पदं स्यात् ततोऽन्तोदात्तं यथा स्या
दिति प्रतिषेधः क्रियते तदेवं सति प्रयोजनेन प्रतिषेधसामर्थ्यादभ्यस्तस्वरं बाधित्वा प्रत्ययस्वरः सिध्यति एवं तर्ह्यभ्यस्तानामादिरित्यत्रादि
ग्रहणं त्वनुवर्तिष्यते तदेवं नार्थः तो धातुस्वरेणाद्युदात्तं पदं स्यात् अंतोदात्तं यथा स्यादिति प्रतिषेधः क्रियते तदेवं सति प्रयोजनेन प्रतिषेधसामर्थ्या

॥तुजादीनां॥ ॥अथ योगः शक्यो वक्तुं कथं छांदसमेतद्दीर्घत्वं छंदसि च दीर्घत्वं न शक्यं परिगणयितुं अन्येषामपि दर्शनात् स्रुषो नारकः इति अ
नेकांत्तत्वाच्च ये यां चाशस्यंतं तेषामेवतस्मिन् योगे न दृश्यते मायह्वानः ममहानइति वा॥ ॥लिटि॥ ॥धातोरिति किमिति। लिटि परतो योनसंभव
ति तस्य धातोरेव श्रियानादिति प्रश्नः। विशश्रिवे रइति छंदस्युभयथेति सार्वधातुकत्वाच्छुवः श्नुचेति श्नुप्रत्ययः श्नुभावश्च अत्र विकरणांतस्य समुदा
यस्य लिट् परस्य धातुत्वात्तदीयस्य प्रथमस्यैकाचो द्विर्वचनाभावः इणं च कृरस्सादीत्वामंतस्य लिट्परत्वं नास्ति आमइति लुकालुप्तत्वादिति द्वि

तुजादीनां दीर्घोभ्यासस्य॥ ॥तुजादीनामिति प्रकारे आदिशब्दः तुजेर्दीर्घत्वमभ्यासस्य न विहितं दृश्यते च येन तथाभूतास्ते
तुजादयस्तेषामभ्यासस्य दीर्घत्वं साधु भवति। तू तुजानः मामहानः स्वधामीमाय। अनड्वान्दाधार। स तुताव द्दीर्घं छंदसि
प्रत्ययविशेषएव दृश्यते मतोन्यत्र न भवति तुतोज शबलान्हरीनिति॥ ॥लिटि धातोरनभ्यासस्य॥ ॥लिटि परतो नभ्यासस्य
॥ ॥लिटि परतोनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः। पपाच पपाठ प्रोर्णुनाव गाम्बज
र्णोर्णु वह्राव इति वचनात् जर्णोति रिज्जादेरित्याम् भवति। लिटीति किं कर्ता हर्ता। धातोरिति किं सस्त्वां सोविशश्रिवे रोसोममिं
द्राय सुन्विरे। अनभ्यासस्येति किं हस्तो नो नावहृषभो यदीदं नोनूयते तेनिनाव। सस्मासाममरुतः संमिमिक्षुः। द्विर्वचनप्रकरणे
छंदसि वेति वक्तव्यं। यो जागार तमृचः कामयंते। दाति प्रियाणि विद्वस्तु॥ ७ ॥ ॥

र्वचनाभावः। अनभ्यासस्येति किमिति नन्वावयपाचेत्यादौ तत्रैव लिटि पुनर्द्विर्वचनप्रसंगः। सकृत्प्रवृत्तत्वाल्लक्षणस्य चरितार्थत्वात् अनवस्था
पातान्वयस्तु प्रत्ययो तो भ्यासो न तस्य लिटि संभवः ततो हि कास्प्रत्ययादिति आम भवति आमिति प्रश्नः। नोनावेति अमंत्रइति प्रतिषेधादत्रामभा
वः। संमिमिक्षुरिति संपूर्वान्मिहेः सनहोरः षढोः कः सि लिट् श्रेरुस् अनो लोपः द्विर्वचनप्रकरण इति प्रकरणग्रहणात्र केवलमिदमेव
सर्वं द्विर्वचनं छंदसि विकल्पते एवं च धातोरनभ्यासस्येत्युभयमुत्तरार्थं एतस्मादेव विकल्पाद्विकरणांतस्याभ्यासयोर्न भविष्यति॥ ७ ॥ ॥

का० प० ६

सन्यङोः ॥ ॥ षष्ठ्यंतमेजादिति तत्र प्रत्ययग्रहणपरिभाषया तदंतस्य द्विर्वचनं न तु सन्यङोरेव यत्त्वाह सन्नंतस्य यङंतस्य चेति सप्तमीपक्षे तु सन्यङोः परतः पूर्व
स्य धातोर्द्विर्वचनं भवति प्रत्ययग्रहणपरिभाषया तदंतस्य द्विर्वचनं न तु सन्यङोरेव यत्त्वाह सन्नंतस्य यङंतस्य चेति सप्तमीपक्षे तु सन्यङोः परतः पूर्वस्य धातो
र्द्विर्वचनं भवतीत्ययमर्थः स्यात् ततश्च सन्नुभयस्येटो द्विर्वचनं न स्यात् अटिटिषतीत्यत्र शिशिषतीत्यादौ तथा प्रतीषिषतीत्यादौ सनो न स्यात् एवमरार्यत
इत्यादौ यङः तथा सन्यङ्भ्यां मिश्राणां पूर्वेण परेण वा सहैकमेव योगं कुर्यात् जुगुप्सिषत इत्युपेर्गुप्तिज् किद्भ्यः सन् तत्र सनि द्विर्वचनं पुनरिच्छासन् न शक्नुत

सन्यङोः ॥ ॥ धातोरनभ्यासस्येति वर्त्तते सन्यङोरिति च षष्ठ्यंतमेतत् सन्नंतस्य यङंतस्य चानभ्यासस्य धातोरवयवस्य प्रथमस्यै
काचो द्वितीयस्य वा यथायोगं द्वे भवतः ॥ पिपक्षति अटिटिषति उंदिदिषति । यङंतस्य पापच्यते । प्रोर्णोनूयते । अरार्यते । अन
भ्यासस्येत्येव जुगुप्सिषते । लोलूयिषते ॥ ॥ श्लौ ॥ ॥ श्लौ परतोऽनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायो
गं द्वे भवतः ॥ जुहोति बिभेति ॥ ॥ श्रीः ॥ ॥ श्रीः ॥ ॥ श्री४ ॥ ॥ श्री४ ॥ ॥ श्री४ ॥ ॥ श्री४ ॥ ॥

त्ता पुनर्द्विर्वचनप्रसंगः लोलूयिषत इति । अत्रापि यङि द्विर्वचनं न तु सनीति द्विर्वचनप्रसंगः । भागवृत्तिकारस्त्वाह पूर्वसूत्रे धातोरनभ्यासस्येति द्वयमपि
प्रत्याख्याय भाष्यकारेणोक्तं तिष्ठतु तावदनभ्यासग्रहणं धातुग्रहणमिति उत्तरार्थमिति भावः अनभ्यासग्रहणस्य तु न किंचित्प्रयोजनमुक्तं ततश्चोत्तरा
र्थमपि तन्न भवतीति भाष्यकारस्याभिप्रायो लक्ष्यते तेनात्र भवितव्यमेव द्विर्वचनेनेति ॥ श्लौ ॥ ॥ श्लौ परे इति । वर्णानामपि युगपदवस्थानाभावा
द्बुद्धिपरिकल्पितं पौर्वापर्यं तत्त्वाभावरूपेण श्लुनाप्युपपद्यत इति भावः अनभ्यासस्येति अधिकारमात्रेणैतदुक्तं न तु श्लौ साभ्यासः संभवति एवं द्विती ग्म०
यस्य चेत्यत्र द्रष्टव्यं ॥ ॥ छ ॥ ॥ छ ॥ ॥ ८

॥वृ०॥ ॥एषकार्याणां प्रवृत्तिक्रम इति। एतच्चाचः परस्मिन्निति सूत्रोपपादितं तत एवावधातव्यं न केवलं स्वाभाव्यत्वादयं क्रमः आश्रीयते किंतु प्रयोज
नमप्यत्र यथासिद्ध्युपपत्तीसाह यथा ह्याति। ह्रस्व आह अ नादिष्टादचः इति। इति कारणो हेतोः अचः परस्मिन्निति सूत्रे योनादिष्टादचः पूर्वस्तस्य विधिं
प्रतिस्थानिवद्भावो भवतीति सिद्धांतः स्थापितः न चास्मिन्क्रमे सत्यनादिष्टादचः पूर्वोभ्यासो भवति किं तर्हि आदिष्टादेव ह्रस्वे लिङ्कृते भ्यासो पजन

॥वृ०॥ ॥वृ०: परतोनभ्यासस्यधातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्विर्भवतः अपीपचत्
अपीपठत् आटिटत्। पचादीनां च रायंतानां चङि विहिते णिलोपः उपधाह्रस्वत्वं द्विर्वचनमित्येष कार्याणां प्र
वृत्तिक्रमः तथाहि लघुनि चङ् परे इति सन्वद्भावे विधीयमाने ह्रस्वस्य स्थानिवद्भावान्न प्रतिषिध्यते नायम
नादिष्टाच्च पूर्वोभ्यासो भवतीति। आटिटदिति द्विर्वचने णीति स्थानिवद्भावाद् द्वितीयस्यैकाचो द्विर्वचनं भवति ८

नात् तेन तस्य विधौ कर्तव्ये ह्रस्वस्य स्थानिवद्भावो न भवति इति लघुत्वान्निमित्तैः सन्वद्भावो नस्यादित्येतत् यदि तु द्विर्वचने कृते ह्रस्वः क्रियेत तत
नादिष्टादचः पूर्वोभ्यासः स्यात् ततश्च तस्य विधौ स्थानिवद्भावः स्यादेव ततश्च दीर्घत्वात् लघुसंज्ञायाअभावात् सन्वद्भावो न स्यात् एवं तर्हि स्याद
शीशमदित्यादौ अत्र हि णाववेवमित्तां ह्रस्वो विधीयते। यदि तत्रायं कार्यक्रमः आटिटदित्यादौ द्वितीयस्यैकाचः टिशब्दस्य द्विर्वचनं न
नमाप्नोत्यत आह आटिटदित्यादि। ह्लु चङोरित्येकयोगएव कर्तव्ये योगविभागो वैचित्र्यार्थः ८

१५ ५०६

९

दाश्वान्॥ ॥साह्वान्दाश्वांश्चुर्यस्माच्छन्दसिप्रयोगदर्शनाच्छन्दसमेतत्त्रमिति।मन्यमानं प्रत्याह।अविशेषेणेति।विशेषानुपादानादितिभा
वः।परस्मैपदमिति।भौवादिकस्यात्मनेपदित्वात्चौरादिकस्याथवा॥ठेति।णिजभावपक्षेदीर्घत्वमनिट्त्वंचनिपात्यते।दाश्वान्॥मीढ्वान्काशये
ति।मनुवसोऽन्यत्वं किंपुनः सामर्थ्यमित्याह।हलादिशेषेहीति।वरावरइतिदीर्घो चाएणसामर्थ्यो।ह्रस्वोनभवति।णिलुकेतिणेरनिटीतिणि

दाश्वान्साह्वान्मीढ्वांश्च॥ ॥दाश्वानित्यादयः शब्दाश्छन्दसिनाषायांवाविशेषेणनिपात्यन्ते।दाश्वानितिदाशृदाने।अस्यक्वसौ
वद्वित्वमनिट्त्वंचनिपात्यते।दाश्वांसोदाशुषः सुतमितिछान्दसः प्रयोगः।साह्वानितिषहमर्षणे।अस्येतस्यपरस्मैपदमुपधादीर्घ
त्वमनिट्त्वंचनिपात्यते।साह्वान्वलाहकः।मीढ्वानितिमिहसेचने।अस्येतस्याद्विवमनिट्त्वमुपधादीर्घत्वंढत्वंच निपातनात्।
मीढ्वस्तोकायतनयायएकवचनमतंत्र।ऊनादीनांकेढेभवन्तइतिवक्तव्यंचक्रंचिक्लिदंकृजः।क्लिदेश्च वजर्यैकविधानमितिक
प्रत्ययः।चरिचलिपतिवदीनामभ्यासस्यावरादीनांधातूनामचिप्रत्ययेपरतोद्वेभवतः अभ्यासस्य वागागमः।आगागम
विधानसामर्थ्याद्धलादिशेषोनभवति।हलादिशेषेसतिआगमस्यवाआदेशस्यवाविशेषोनास्ति।चराचरः चलाचलः पता
पतः वदावदः।वेतिवक्तव्यंतेनचरः पुरुषः।चलंधान्यं पतोऽश्वः वदोमनुष्यइत्यपिसिद्धंभवति।हंतेर्वलिट्यां हंतेरच प्रत्ययेपर
तोद्वेभवतः अभ्यासहकारस्यघत्वंआक्चागमः।अभ्यासाच्चेतिकुत्वं।घनाघनः।पाटेर्णिलुकोच दीर्घश्चाभ्यासस्य।पाटय
तेरचिपरतोद्वेभवतः।णिलुक्चभवतिअभ्यासस्यऊगागमोदीर्घश्च।पाटूपटः॥ ॥ ॥७॥ ॥ दाम०

लोपेसिद्धेपुनर्वचनंप्रसक्तस्यणोनपुनर्वृद्धिर्माभूदिति।पाटूपटनि।पूर्ववद्धलादिशेषाभावोह्रस्वत्वाभावश्चदीर्घश्चाएणादेवाभ्यास ९
स्यानचीतिवचनाद्वाउभयत्रापिहलादिशेषाभावः अभ्यासस्ययदुक्तंतेनतदपिनभवतीत्यर्थः॥ ॥श्रीः॥ ॥श्रीः॥ ॥

॥ष्यङः॥ ॥इग्यणः संप्रसारणमित्यत्रोक्तं वाक्यार्थः संज्ञा वर्णश्चेति तत्र विधौ व्याख्यार्थ उपतिष्ठते इति तदाश्रयेणाह यणः स्थाने इग्भवतीत्य
र्थ इति। तदन्तात्ष्यङ इति ष्यङिति घावादेशाप त्यस्य स्थितत्वात्संलोप एषा पंचमी तदन्तमाश्रितेत्यर्थः अतद्गुणसंविज्ञानोऽत्र बहुव्रीहिः अत एव
सयोगः समीपोपस्थकरीषगन्धेः तस्मात्ष्यङित्यर्थः प्रत्ययपक्ष एव वामनाचार्यस्य तत्राभिमतः तथा च ये च तद्धित इत्यत्र वक्ष्यति अपि

॥ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे॥ ॥पुत्रपति इत्येतयोरुत्तरपदयोस्तत्पुरुषे समासे ष्यङः संप्रसारणं भ
वति यणः स्थाने इग्भवतीत्यर्थः। कारीषगन्धीपुत्रः कौमुदगन्धीपतिः। करीषस्येव गन्धोऽस्य कुमुदस्येव गन्धोऽस्येति बहुव्रीहिः
तत्र उपमानाच्चेति गन्धस्येत्वे तादेशः करीषगन्धेरपत्यमित्यण् तदन्तस्य चाह्वियामणिञोरिति ष्यङ् ततश्चापि विहि
ते षष्ठीसमासः संप्रसारणस्येति दीर्घः। ष्यङ इति किं इभ्यापुत्रः क्षत्रियापुत्रः। पुत्रपत्योरिति किं कारीषगन्ध्याकुलं। तत्पुरुष
इति किं कारीषगन्ध्यापतिरस्य ग्रामस्य कारीषगन्ध्यापतिरयं ग्रामः ९ ॥ ॥

जन्ताद्वापरः ष्यङ् प्रत्यय एषितव्य इति इभमर्हतीतीभ्यः दण्डादिभ्यो यः। इह कारीषगन्ध्यामतिक्रान्तस्य पुत्रः अतिकारीषगन्ध्यापुत्र इति प्रत्ययग्रहणपरि
भाषया ष्यङ्समुदायस्य ष्यङ् तत्वेऽपि योऽत्र ष्यङ् तदन्तस्य प्रसङ्गः तथा पुत्रस्य कुलं पुत्रकुलं कारीषगन्धीपुत्रकुलमिति कः पुनरनयोरर्थभेदः न खलु क
श्चित् कारीषगन्ध्यापुत्रकुलमिति न सिध्यतीति चोद्यार्थः तथातिकारीषगन्ध्यापुत्रकुलमित्यादावपि सर्वत्र पुत्रपत्योः ष्यङ् तस्य चानन्तर्यमा
श्रित्य संप्रसारणप्रसङ्गः ९ ॥ ॥

ष्यादेतत् यथा ह्यसेशाखेति द्वन्द्वः शाखाणां अवयवी प्रतीयते तथेहापि ष्यङः तस्य पुत्रपत्योश्च तत्पुरुषः तत्र अस्यासमासाय स्यात् तत्पुरुषस्य ष्यङः तो
र्वपूर्वस्तस्यैव पुत्रपत्योः इति गम्यते कृतं तथेति एवमप्यवयवावयवसमुदायावयवत्वात् तस्यैव प्रसंगः नैष दोषः पुत्रपत्योरिति सप्तमीनिर्देशात् ष्य
ङः तस्य पुत्रपत्योश्च योर्वापर्यं प्रतीयते पूर्वोक्तेन न्यायेन तत्पुरुषावयवत्वे च तत्पुरुषस्य च योर्वापर्यभक्तावयवहूपात्मकः तदिह तत्पुरुषावयवयोः यौ
र्वापर्येणावस्थितयोः इदं भवती तदुक्तयोः सति तत्पुरुषस्तावेनावितिगम्यते ष्यङः तस्य एवं यदस्य पुत्रपत्योः तत्पुरुषयोरित्यर्थः समासे च यस्मा
च पूर्वं नास्ति तत्पूर्वपदं यस्माच्च परं नास्ति तदुत्तरपदं तदिदमुक्तं पुत्रपत्योः उत्तरपदयोरिति पूर्वोदाहृतेषु च यत्पूर्वपदं न तत् ष्यङन्तं यत् ष्यङ्. ते

ष्यङ इति स्त्रीप्रत्ययग्रहणमिदं स्त्रीप्रत्यये चानुपसर्जने नेति प्रत्ययग्रहणे यस्मात्स विहित इति तदादिनियमो नास्ति तेन परम
कारीषगंधायाः पुत्रः परमकारीषगंधीपुत्रः परमकारीषगंधीयतीत्यपि च भवति उपसर्जने तु ष्यङि न भवति अतिक्रा
न्तः कारीषगंधामित्यतिकारीषगंध्यः तस्य पुत्रः अतिकारीषगंध्यपुत्रः पुत्रपत्योः केवलयोरिदं संप्रसारणं तदादौ तदंते च
न भवति कारीषगंधापुत्रकुलं कारीषगंध्यायाः परमपुत्र इति ष्यङं तेन यद्यप्यन्ये यताः संति तथापि ष्यङः एवं संप्रसारणं भ
वति॥ ॥श्रीकृष्णाय नमः॥ ॥

न तत्पूर्वपदं यस्माच्च परं नास्ति तदुत्तरपदं तदिदमुक्तं पुत्रपत्योः उत्तरपदयोरिति पूर्वोदाहृतेषु च यत्पूर्वपदं न तत् ष्यङः तं यत् ष्यङ् तं न तत्पू
र्वपदं यच्चोत्तरपदं न तत्पुत्रपत्यात्मकं यच्च पुत्रपत्यात्मकं न तदुत्तरपदमिति नास्ति प्रसंगः॥ इहापि न प्राप्नोति परमकारीषगंधीपुत्र
इति तत्राह ष्यङ इति स्त्रीप्रत्ययग्रहणमिति स्त्रियामिति प्रकृत्य विहितत्वात् ष्यङो निवृत्त्यावेनस्य यमेव वा प्रत्ययत्वाच्च स्त्रीप्रत्ययत्वं तत्
यदि स्त्रीप्रत्ययग्रहणं ततः किमित्यत आह तेनेति। अप्रधानमुपसर्जनं एतदुक्तं भवति यत्रार्थे स्त्रीप्रत्ययो विहितः स यावति तदंते
प्राधान्येनोच्यते तावान्समुदायस्तदंतं तत्र याग्राहः अप्रधाने च पतो विहितः। तदादिके च तदंते च न भवतीति। पदात्तत्पुरुषास्त्रिप्रमुत्र

निर्दिश्यमानस्येति। एतच्च षष्ठी स्थानेयोगेत्यत्र व्याख्यातं। अनंतस्य विकारे त्वसदेशस्येति नु परिभाषाप्रयोजनाभावान्नाश्रिता। संप्रसारणग्रह
णमुत्तरसूत्रार्थमिहत्वीशादिविसिद्ध्यर्थं अकारः सर्वादेशार्थः। तत्रायमप्यर्थः संप्रसारणस्येति योगविभागेन दीर्घत्वं न विधेयं भवति। तदेवोत्तरार्थत्वं
दर्शयति संप्रसारणमिति बेत्यादि। पूर्वं यत्र ष्यङः तंपदमुपरितनं पुत्रपत्यात्मकं स्यात् तत्र ष्यङः तत्पुरुषे इह यथाः स्थानेऽन्तरतमा वेत्येवीषाषत्रा

निर्दिश्यमानस्यादेशा भवंतीति। संप्रसारणमिति सिद्धे तेन दीर्घ क्रियते विभाषापरेरितियावत्।। ।।बंधुनि बहुव्रीहौ।। ।।ष्यङः सं
प्रसारणमित्यनुवर्तते बंधुशब्दे उत्तरपदे बहुव्रीहिसमासे ष्यङः संप्रसारणं भवति। कारीषगंध्याबंधुरस्येति कारीषगंधीबं
धुः कौमुदगंधीबंधुः। बहुव्रीहाविति किं कारीषगंध्याया बंधुः कारीषगंध्याबंधुः। अत्रापि पूर्ववदेव परमकारीषगंधीबंधु
रित्यत्र भवति। अतिकारीषगंध्यो बंधुरित्यत्र न भवति तथा कारीषगंध्यापरमबंधुरिति कारीषगंध्याबंधुकुलमिति। बंधुनी
ति नपुंसकनिर्देशः शब्दरूपापेक्षया यं त्लिंगाभिधेयस्त्वयं बंधुशब्दः।। मातच्मातृकमातृषु ष्यङः संप्रसारणं विभाषया बहु
व्रीहावेव कारीषगंध्यामाता अस्येति बहुव्रीहौ कृते एतस्मादेवोपसंख्यानात् स्त्रेमातरि उ ह्रस्वमातजादेशः नवचित्करणसाम
र्थ्याद्बहुव्रीहिस्वरमंतोदात्तत्वं बाधते मातमातृकशब्दयोश्च भेदो नोपादानात्त्रे श्रुतश्चेति केवयिविकल्प्यते कारीषगंधीमातः।
कारीषगंध्यामातः। कारीगंधीमातृकः कारीषगंध्यामातृकः कारीषगंध्यामाता कारीषगंधीमाता॥ १० ॥ ॥

र्थ ष्यङः सयावृत्तपि मतिनगुरुणो माति विहेष्यत्वं दृतं पत्रत्सर्थः प्रधानो न भवति मयतः ष्यङ् तदा घेव तत्र॥ ॥बंधुनि॥ ॥शब्दरूपापे
क्षयेति। बंधुरस्येतस्मिन् शब्दरूपमित्येवं शब्दरूपमपेक्ष्य नपुंसकनिर्देशः कृतः किमर्थमेवं व्याख्यायत इत्यत आह पुल्लिंगाभिधेय
स्त्वयमिति। योयमस्मिन्सूत्रे बंधुशब्द उपात्तः स तस्यार्थः। कुत एतत् नपुंसकलिंगस्याप्यविद्यमानत्वात् तद्वक्ष्यते स्मिन् ज्ञातिरिति बंधुइत्य
जात्ये तावच्छ बंधुनीति यद्येवं तस्येव महणं प्राप्नोति नैष दोषः। पतिपुत्रसाहचर्याज्ज्ञातिवचन एव ग्रहीष्यते १०

का॰ प॰ ६
११

वचिस्वपि ॥ आदिशब्दोऽयं यजिनैव संबध्यते न वच्यादिभिः। प्रत्येकं स्वपिग्रहणात् अन्यथा ह्यपरिभाषणो विक्ष्याने असमुविभज्य शुद्धो ह्यदिः असमुविभो वने ञिष्वप्शयः इमेवंगणपाठात् वच्यादिग्रहणेनैव स्वपादीनामपि ग्रहणात् सिद्धेः पृथक् स्वपादिग्रहणं न कुर्यात्। आगणां तार इति गणसमाप्तेगणात आगतागणात मागणान्ता॥ उक्त इति वो कुः इष्ट इति व्रश्चादिना षः॥ ऊढ इति होढः झषस्तथोर्धोऽधः ष्टुत्वं ढो ढे लोपः ढ्रलो

वचिस्वपियजादीनां किति॥ ॥ संप्रसारणमिति वर्त्तते ष्यङः इति निवृत्तं वच परिभाषणे ब्रुवो वचिरिति च ञिष्वप् शये यज देवपू
जासंगतिकरणदानेष्वितः प्रभृत्यागणान्तात् तेषां वचिस्वपियजादीनां धातूनां किति प्रत्यये परतः संप्रसारणं भवति। वचि उक्तः
उक्तवान्। स्वपि सुप्तः सुप्तवान्। यज इष्टः इष्टवान्। वपि उप्तः उप्तवान्। वह ऊढः ऊढवान्। वेञ् उप्तः उप्तवान्। व्येञ् संवीतः संवी
तवान्। श्वयतेः शूनः शूनवान्। वद उदितः उदितवान्। वस उषितः उषितवान्। ह्वेञ् हूतः हूतवान्। धातोः स्वरूपग्रहणे तत्
प्रत्यये कार्यविज्ञानात् इति वाच्यतिवाचिकमित्यत्र न भवति॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्री४॥ ॥श्री४॥ ॥

पे पूर्वस्य दीर्घोऽणः उषित इति वसति क्षुधोरिट् शासिवसिघसीनां चेति षत्वं संवीतादौ हलः इति दीर्घः शून इति ओदितश्चेति निष्ठानत्वं धातोः
स्वरूपग्रहणात् इति पत्र धातुः स्वरूपे णो यादीयते न धातुशब्देन तत्र तत्प्रत्यये धातोरिति वंयो विहितः प्रत्ययस्तत्रैव कार्यं विज्ञायते एतच्च ओणाह राम॰
त्येतितत्व निपातनेन ज्ञापयिष्यते वा अनिवाचिकमित्यत्र तु पधपिञ्चिबन्ता धातुत्वं न जहतीति तथापि धातोरिति वंप्रत्ययस्याविधानात्संप्रसार ११
णाभावः॥ ॥७॥

ग्रहिज्यावयिव्यधि॥ ॥गृहीतः गृहीतवानित्यादि यथ विग्रहणमं ङि· तिप्रत्यये परतः संप्रसारणं चकारात्क्ङिति चेति क्रमो आख्यातः तथा प्यनाख्यया ग्रथ
मं क्ङितु दा हृतं वेजादेशो गृ ख्यत इति पूर्वं परसा हवयाधिस्य वयेः परस्मै पदं संभवत्यस्य ग्रहणं भाष्यं य स्त्वयवयणता विति वयिः सोनुदात्तेत्वात् नेपदी प
येवमिति वेञादेशस्य ग्रहणमित्यर्थः। यजादिषु वेञ् पठ्यत इति। ततश्च पूर्वेणैव संप्रसारणं सिद्धमिति भावः। नैवं शक्यमिति विज्ञातुमिति शेषः नानयो

ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च॥ ॥ग्रह उपादाने ज्या वयोहानौ वेञो वयिः व्यध ताडने वश कान्तौ व्यच
व्याजीकरणे ओव्रश्चू छेदने प्रच्छ ज्ञीप्सायां भ्रस्ज पाके एतेषां धातूनां ङिति प्रत्यये परतः चकारात् किति च संप्रसारणं भवति। ग्रहि गृ
हीतः गृहीतवान्। ग्रहोऽलिटि दीर्घः। ङि· तिगृह्णाति जरीगृह्यते। ज्या जीनः जीनवान् ल्वादिभ्य इति निष्ठानत्वं। ङि· तिजिनाति जेजीय
ते। हलः इति संप्रसारणस्य दीर्घत्वे कृते घातोर्दीर्घो नाद्धस्वः इति ह्रस्वः। वयिः लिटि वेञो वयिरादेशः तस्य ङि· द्भागाल्लिटि वो दाङ्किपते ऊ यतुः ऊ
युः यद्येवं वयिग्रहणमनर्थकं यजादिषु हि वेञ् पठ्यते नैवं शक्यं लिटि तस्य वेञ इति प्रतिषेधं वक्ष्यति तत्र यथास्यान्निवृत्तावाडुपेर्विधिः
एवं प्रतिषेधोपि प्राप्नोति· नैष दोषः लिटि वयो यः इति यकारस्य प्रतिषेधात् पूर्वो विधौ ग्रहणं प्रतिषेधे चायग्रहणमनुमास्यते· एतमेत
त एष एवार्थः साक्षान्निर्देशेन वयिग्रहणे न विस्पष्टीक्रियते· व्यधि· विद्धः विद्धवान्· ङि· ति विध्यति वेविध्यते· वशि उशितः उशितवा
न् ङि· ति उष्टः उशन्ति· व्यच विचितः विचितवान् ङि· ति विचति वेविच्यते· व्रश्चेः वृक्णः वृक्णवान्· कथमत्र कुत्वं व्रश्चेति षत्वेन भाव्ये नैष दो
षः निष्ठादेशः षत्वस्वरप्रत्ययेङ्विधिषु सिद्धो वक्तव्यः तत्र षत्वे न लस्यासिद्धत्वात् ओलादिर्निष्ठानत्वं भवति कुत्वे तु कृते मेतद्दसिद्धमेवे
षः निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वक्तव्यः तत्र षत्वे न लस्यासिद्धत्वात् ओलादिर्निष्ठानत्वं भवति कुत्वे तु कृते मेतद्दसिद्धमेवे
प्रवर्त्तते कुत्वं· ङि· तिवृश्चति वरीवृश्च्यते· प्रच्छ पृष्टः पृष्टवान्· ङि· ति पृच्छति परीपृच्छ्यते· नङि· तु प्रश्ने चासन्नकाल इति निपातनात् द
संप्रसारणं। भ्रस्ज भृष्टः भृष्टवान्। ङि· ति भृज्जति बरीभृज्ज्यते सकारस्य सलोपः जश्त्व शशी ति जश्त्वे न दकारः स्तोः श्चुना श्चुरिति श्चुत्वेन

वयश्चानयिग्रहणमनर्थकं शक्यं विज्ञातुमित्यर्थः। एवं प्रतिषेधोपि प्राप्नोतीति। नात्रापि शब्दे न समुच्चयः अनेकं किं तर्हि यथास्यान्निवृत्ता
विधिः प्राप्यते तथा प्रतिषेधोपि प्राप्नोति तत्रापि स्यान्निवृत्तावसतुल्यत्वात् इति दोषस्तुल्ये त्वमपि शब्देन द्योत्यते तेन प्रतिषेध एव भवे
दित्यर्थः उश इति तमं तो। अधिर्विधाकिः। अविप्रभृत यस्तु दाष्टपः। हकरा इति स्तोः संयोगाद्यो रिति सलोपः। पूर्ववन्निष्ठानत्वं वरी वृश्च्य

इ॰ का॰ प॰ ८७
१२

लिट्यभ्यासस्य ॥ ॥विव्यचिथेति। व्यचेः कुटादित्वमनसीति वक्तव्यमित्यत्र पर्युदासवृत्त्यासत्प्रत्ययसदृशस्य कृतो ग्रहणादिह ङित्त्वाभावाद्धातोः संप्रसारणा-
भावः। वृश्चतिपृच्छतिभृज्जतीनामविशेषः इति वार्त्तिकं तत्र वृश्चतिविषये भाष्यकारेण दूषितं यदुक्तं वृश्चतेरविशेषः स्यादिति तत्र वार्त्तिककारस्याभि-
प्रायमाह वृश्चतेरिति। असतीति सूत्रे यदुपात्तं तदेव सतीत्यभिप्रायेण वार्त्तिककारेणोक्तमित्यर्थः। भाष्यकारस्याभिप्रायमाह योगारंभे सतीति रेफस्य संप्र-

लिट्यभ्यासस्योभयेषाम् ॥ ॥उभयेषां वच्यादीनां ग्रहादीनां च लिटि परतोऽभ्यासस्य संप्रसारणं भवति। उवाच उवचिथ स्वपि सुष्वाप सु-
षुपिथ। यज इयाज इयजिथ। डुवप् उवाप उवपिथ। ग्रहेरविशेषः जग्राह। जग्रहिथ ज्या जिज्यौ जिज्यिथ। वपि उवाप उवपिथ। व्यधि
विव्याध विव्यधिथ। वश उवाश उवशिथ। व्यच विव्याच विव्यचिथ। व्रश्चेः सत्यसति वा योगे नास्ति विशेषः। योगारंभे तु सति यदि संप्र-
सारणमकृत्वा हलादिशेषेण रेफनिवृत्तिः तदा वकारस्य संप्रसारणं प्राप्नोति अथ रेफस्य संप्रसारणं कृत्वा उरदत्वं क्रियते तदा उरदित्व-
स्य स्थानिवद्भावान्न संप्रसारणे संप्रसारणमिति प्रतिषेधो भवतीत्यस्ति विशेषः वव्रश्च॰ वव्रश्चिथ॰ पृच्छतिभृज्ज्योरविशेषः अ-
कित्त्वार्थं चेदभ्यासस्य संप्रसारणं विधीयते किति हि परत्वाद्धातोः संप्रसारणे कृते पुनः प्रसंगविज्ञानाद्द्विर्वचनं ऊवतुः ऊचुरिति। अ-
धिकारादेवोभयेषां ग्रहणे सिद्धे पुनरुभयेषामित्युक्तेर्हलादिशेषमपि बाधित्वा संप्रसारणमेव यथा स्यादिति विव्याध विव्याच॥

॥श्रीः॥ ॥श्रीः॥ ॥ॐ॥ ॥

सारणे सत्यसति वा नास्ति विशेष इति वार्त्तिककारेणोक्तमित्यस्य व्याख्यानं भाष्यकारेणोक्तमित्यर्थः। अकित्त्वार्थमिदमिति। कथमित्यत आह किति हीति। ए.म॰
अधिकारादेवेति। नात्र शास्त्रीयो विकारः किंतु स्वीयेच्छालक्षणः तेन पूर्वसूत्रे व्यादेः संबंधो नाशंकनीयः योगविभागसामर्थ्याद्वा पूर्वसूत्रे तेषामसं- १२
बंधः हलादिशेषमपि बाधित्वेति अन्यथा परत्वाद्धलादिशेषः स्यात्तत्र संप्रसारणमेव यथा स्यादिति पुनर्विधानमुभयेषां ग्रहणं भवति तद्बाधकत्वबा-
धनार्थमिति भावः॥ ॥७॥ ॥७॥ ॥

॥स्वापेश्चङि॥ ॥स्वापेर्ण्यन्तस्य ग्रहणमिति आप्नोतेस्तु मुख्यस्य ग्रहणं न भवति अस्वप्तं तस्य चङो संभवात् स्वप्तं तस्मापितं भवति धातोरित्यधिकारात्। स्वाप
तइति कर्मणि लङ् घञ् णिलोपः। स्वापितइति निष्ठायामेतरीति। ननु च ग्रहणं सामर्थ्यान्निर्तीयसनुवर्तिष्यते तेन चायमर्थः स्वापेर्ङि इत्ययं तावद् नेकान्ता
त्तिः अपि सार्वधातुके हि विकरणो विहितं अस्याद्यस्त्वविहिता एव तत्राह ङि तीति केवलमित्यादि किति सेन चानुकृष्टं पूर्वसूत्रे ङ् तिनेहानुवर्तिष्यते
इ सत्रस्त्रस्तानं ङि ग्रहणमपि तर्हि पूर्वसूत्रेनानुवर्ततेलिटोङि तो न संभवादिति तस्येहानुवृत्तिर्दुर्विज्ञाना॥ ॥स्वपिस्यमि॥ ॥स्वप्नाणीति स्वपितर्घो

स्वापेश्चङि॥ ॥स्वापेरिति स्वपेर्ण्यन्तस्य ग्रहणं तस्य च ङि परतः संप्रसारणं भवति असूषुपत् असूषुपतां असूषुपन् द्विर्वचनात् पूर्व
मत्र संप्रसारणं तत्र लघूपधगुणः तस्य णौ च ङ्युपधाया ह्रस्वत्वं। ततो द्विर्वचनं दीर्घो लघोरिति दीर्घत्वं। चङीति किं स्वाप्यते स्वाप्यते स्वापितः
ङि तीति केवलमिहानुवर्तत इति एतद् दुर्विज्ञानं॥ ॥स्वपिस्यमिव्येञां यङि॥ ॥ञिष्वप् शये स्यमु स्वन ध्वन शब्दे व्येञ् संवरणे उस्येते
षां धातूनां यङि परतः संप्रसारणं भवति॥ सोषुप्यते सेसिम्यते वेवीयते यङीति किं स्वप्नक्॥ ॥न वशः॥ ॥यङीति वर्त्तते वश यं
ङि परतः संप्रसारणं न भवति। वावश्यते चेकीयते चेकीयते चेकीवते दीर्घ कणो यङ्लुक् गर्थ चेकीतः॥ वावश्यते। वावशूयते। यङीति
किं उक्षः उशन्ति॥ २ ॥चायः की॥ ॥यङीति वर्त्तते चायृ पूजानिशामनयोरित्येतस्य धातोर्यङि परतः कीत्ययमादेशो भवति

र्नेजिङ्॥ ॥चायः की॥ ॥कीतिदीर्घोच्चारणमनर्थकं ह्रस्वादेशोप्यकृत्सार्वधातुकयोरिति दीर्घस्य सिद्धत्वात्तत्राह दीर्घोच्चारणमित्यादि किमर्थं पु
नर्यङ्लुग्घ्यमान आदेशो यङ्लुकि स्यात् प्रत्ययलक्षणेन न लुमतांगस्य एवं तर्हि दीर्घोच्चारणसामर्थ्यात् लुक्यपि भविष्यति पूर्वसूत्रविहितं तु प्रसार
णं यङ्लुकि न भवत्येव न च संप्रसारणं संप्रसारणाश्रयं च कार्यं बलवदिति प्रागेव लुकः संप्रसारणं प्रसारणात् बाद्या: परिभाषा पाः तथा च पूर्व
सूत्रमेयेषां ग्रहणं कृतं अन्यथा नयेव परिभाषया हलादिशेषात्प्रागेव संप्रसारणं भविष्यतीत्यनर्थकं तत्स्यात् सास्वयीति सास्वप्निसास्यमीतिवे
मेतिवाव्यति १२ ॥ ॥७॥ ॥

ई.का.पु.१
१३

स्त्यः प्रपूर्वस्य ॥ ॥ ष्ट्योरस्त्येतयोरिति द्वयोरपि स्त्यारूपस्य लाक्षणिकत्वात् संप्रसारणे कृते इति तस्यासिद्धत्वात् गोवर्णं प्रसारणात् । प्रस्त्य इत्येव सिद्ध इति प
था प्रस्त्योऽन्यतरस्यामित्यत्र न चैवमुच्यमाने प्रशब्दस्यापि योरेफस्तस्यापि प्रसंगः धातोरित्यधिकारात् प्रसंस्तीत इति प्रस्त्योऽन्यतरस्यामिति मतमत्र भवत्स्ये
वत तत्कथमिति कथमयमर्थः शब्देनाभिहितो भवतीति यश्च षष्ठ्यर्थे बहुव्रीहिरिति पूर्वशब्दस्यावयववाचित्वात् यथा पूर्वं कायस्येति अभिकरणो षष्ठ्या

स्फायः स्फी निष्ठायाम् ॥ ॥ स्फायी ओप्यायी वृद्धाविमस्य धातोर्निष्ठायां परतः स्फीसयमादेशो भवति । स्फीतः स्फीतवान् । निष्ठा
यामिति किं स्फातिः । स्फायतीभवतीसेतदपि क्तिन्नंतस्यैवरूपं न निष्ठान्तस्य निष्ठायामित्यतदधिक्रियते लिङ्यङोश्चेति प्रागेतस्मा
त्सूत्रात् ॥ ॥ स्त्यः प्रपूर्वस्य ॥ ॥ निष्ठायामिति वर्त्तते संप्रसारणं च स्फीश्से तन्त्रस्वर्यते । स्त्ये ष्ट्यै शब्दसंघातयोः द्वयोरप्येतयो
र्धात्वोः स्त्यारूपमापन्नयोः सामान्येन ग्रहणं स्त्या इत्येतस्य प्रपूर्वस्य निष्ठायां परतः संप्रसारणं भवति । प्रस्तीतः प्रस्तीतवान् ।
संप्रसारणे कृते यणवत्वं विहतमिति निष्ठानत्वेन भवति । प्रस्त्योऽन्यतरस्यामिति पक्षे मकारः क्रियते प्रस्तीमः प्रस्तीमवान् प्रपूर्व
स्येति किं संस्त्यानः संस्त्यानवान् । प्रस्त्य इत्येव सिद्धे पूर्वग्रहणमिहापि यथा स्यात् प्रसंस्तीतः प्रसंस्तीतवान् । तत्कथं प्रपूर्वस्येति
षष्ठ्यर्थे बहुव्रीहिः प्रपूर्वो यस्य धातूपसर्गसमुदायस्य स प्रपूर्वः तदेव पवस्य त्य इत्यधिकरणो षष्ठ्यौ तत्र प्रसंस्तीतः प्रसंस्तीत
वानित्यत्रापि प्रपूर्वसमुदायावयवः स्त्याशब्दो भवति ॥ ॥ ७१ ॥ ॥

वति प्रपूर्वस्येति स्त्याशब्दापेक्षयावयवषष्ठी स्त्यइत्येषापि यणवयवापेक्षया षष्ठी यथा पुनरयमर्थः प्रकृतोपयोगी तथा दर्शयतितत्रेति ॥ ॥ ग्रम०
॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ श्रीः ॥ ॥ छ ॥ ॥ छ ॥ ॥ १३

॥द्रवमूर्त्तिस्पर्शयोः॥ ॥द्रवकाठिन्यमिति द्रवावस्थाया उत्तरोवस्थाविशेषः काठिन्यं स्पर्शश्चेति हशादिसहचरितो गुणः स्पर्शः शीतो वायुरिति कथं स्पर्श
निमात्राभिधायिनः शीतशब्दस्य तद्गुणविनाशायुक्ताहेतसामानाधिकरण्यं तत्राह गुणमात्र इत्यादि शुक्लादिशब्दवदिति भावः॥ ॥विभाषा॥ ॥
मेयमुभयत्रविभाषेति। द्रवमूर्त्तिविषये पूर्वेण प्राप्ते अन्यत्राप्राप्ते च पूर्वग्रहणं किमर्थं न विभाषाभ्यवाभ्यामित्येवोच्येत तत्राह पूर्वग्रहणस्येत्या

॥द्रवमूर्त्तिस्पर्शयोः श्यः॥ ॥द्रवमूर्त्तेर्द्रवकाठिन्ये स्पर्शे च वर्त्तमानस्य श्यैङ् गतावित्यस्य धातोर्निष्ठायां परतः संप्रसारणं भवति।
शीनं घृतं शीना वसा शीनं मेदः। द्रवावस्थायाः काठिन्यं गतमित्यर्थः। श्या स्पर्शे इति निष्ठानत्वं। स्पर्शे शीतं वर्त्तते शीतो वायुः शीत
मुदकं। गुणमात्रे तद्वति चास्य शीतशब्दस्य प्रवृत्तिर्दृश्यते। द्रवमूर्त्तिस्पर्शयोरिति किं संश्यानो वृश्चिकः॥ ॥प्रतेश्च॥ ॥प्रतेरु
त्तरस्य श्या इत्येतस्य निष्ठायां संप्रसारणं भवति। प्रतिशीनः प्रतिशीनवान्। द्रवमूर्त्तिस्पर्शाभ्यामन्यत्रापि यथा स्यादिति सूत्रारंभः
॥ ॥विभाषाभ्यवपूर्वस्य॥ ॥श्या इति वर्त्तते अभि अव इत्येवंपूर्वस्य श्या इत्येतस्य निष्ठायां विभाषा संप्रसारणं भवति। अभिशीनं
अभिश्यानं अवशीनं अवश्यानं। द्रवमूर्त्तिस्पर्शविवक्षायामपि विकल्पो भवति अभिशीनं घृतं अभिश्यानं घृतं अवशीनं मे
दः अवश्यानं मेदः अभिशीतो वायुः अभिश्यानो वायुः अवशीतमुदकं अवश्यानमुदकं। सेयमुभयत्र विभाषा इष्यते। पूर्वग्रह
णस्य प्रयोजनं समभिश्यानं समवश्यानमित्यत्र मा भूदिति केचिदाचक्षते नैतदस्ति किलायमभ्यवपूर्वः समुदाय इति येनाभ्यवपूर्वः
तदाश्रयो विकल्पः कस्मान्न भवति तस्मादत्र भवितव्यमेव यदि तु नेष्यते ततो यत्नान्तरमास्थेयं पूर्वग्रहणस्य चान्यत्प्रयोजनं व
क्तव्यं॥ १३ ॥ ॥श्रीः॥ ॥

दाक्रियमाणेपि पूर्वग्रहणे कस्मादेवात्र न भवतीत्याह नकिमेति। किलशब्दः स्वचिन्तामरुचिं दर्शयति यात्रेति मामन्यकाह समुदायोभ्यवपूर्वो वा
तत्र समुदायस्त्वभ्यवपूर्वोप्यस्ति तदाश्रयो विकल्पः प्राप्नोति। यत्नान्तरमास्थेयमिति। विभाषाग्रहणमव्यवस्थितविभाषार्थमाश्रयणीयमि
त्यर्थः। पूर्वग्रहणस्य चान्यत्प्रयोजनं वक्तव्यमिति। न पुनरभिसंश्यानमवसंशीनमवसंश्यानमित्यत्रापि विकल्पः प्रवर्तते। एतच्च पूर्वग्रहणेक्ति

ईका॰ पद॰ १

१८

श्रृतं पाके॥ ॥श्रापाक इत्यस्य धातोरिति श्रापाक इत्यदादौ पठ्यते श्रा पाक इति चुरादौ त्वरादिषु पि मित्वार्थं श्राणक इति पठ्यते तत्रेह सर्वेषां ग्रहणं श्रायतेरपि ह्नना
त्वस्यैतद्रूपं भवति निपातनसामर्थ्याद्वा लक्षणप्रतिपदोक्तपरिभाषा नाश्रीयते। रायतेस्तस्य चेति। तथा चोक्तं श्राश्रप्योः शृभावो निपात्यत इति अत एव प्रकृतं संप्रसा
रणमेव न विहितं श्रये रपि शृतमित्येवं यथा स्यादिति यदि विभाषेत्येतदनुवर्त्तते क्षीरहविषोरन्यत्र च विकल्पः प्राप्नोतीत्य आह व्यवस्थितविभाषा चेयमिति। य
दा तिसादिप्रयोजकव्यापारः प्रेषणादिरूपश्चारेण प्रयोजकशब्देनोक्तस्तस्य च बाह्यत्वं यदि भूतिणिज्वाच्यत्वात्। तदापि नेष्यते इतीति तथा चोक्तं श्रयेः शृत्वम
न्यत्र हेतोरिति अपितं क्षीरं देवदत्तेन यज्ञदत्तेनेति। प्रयोजकव्यापारेणाप्यमानस्यापि प्रयोज्यस्य कर्मसंज्ञा न भवति गतिबुद्धिप्रत्यवसानेति नियमात्। कथं
पुनरेतस्य निपातनं लभ्यते यावता पाक इत्युच्यते एवं तेन च पाचना भिधीयते न पाकः अथ पाचनायामपि गुणभूतः पाकः प्रतीयते तदाश्रयं निपात
नं स्यात्तथैवं द्वितीये णिचि प्रसंगः न हि तत्र पाको गुणभूतो न गम्यते अथ तत्र गुणभूतत्वादेव प्रधानभूते पाके चरितार्थं निपातनं न भविष्यतीत्युच्यते प्र

श्रृतं पाके॥ ॥विभाषेत्यनुवर्त्तते श्रा पाक इत्यस्य धातोरेतस्य चाण्यन्तस्य णिजन्तस्य पाकेऽभिधेये क्तप्रत्यये परतो विभाषा शृभावो निपात्यते। शृतं क्षीरं
शृतं हविः व्यवस्थितविभाषा चेयं तेन क्षीरहविषोर्नित्यं शृभावो भवति अन्यत्र नैव भवति श्राणा यवागूः श्रपिता यवागूरिति। यदापि बाह्यप्रयो
जके द्वितीयो णिजुत्पद्यते तदापि नेष्यते श्रपितं क्षीरं देवदत्तेन यज्ञदत्तेन। श्रातिरयमकर्मकः कर्मकर्तृविषयस्य पचेरर्थे वर्त्तते स तु ण्यन्तः
प्राकृतं पच्यर्थमाह तत्र द्वयोरपि शृतमितीष्यते शृतं क्षीरं स्वयमेव शृतं क्षीरं देवदत्तेन। पाकग्रहणं निपातनविषयज्ञापनार्थं॥ ॥ ॥

पाकेऽपि न स्यादुक्तो वा विशेषः तमाह श्रानिरयमित्यादि। अयमभिप्रायः द्विविधः पाको विक्लित्तिलक्षणो विक्लेदनालक्षणश्च तत्र भयत्रापि पचेः प्रयोगदर्श
नात् पच्यते ओदनः स्वयमेव पचत्योदनं देवदत्त इति श्रातिश्चायं यद्यपि पाक इत्यस्य विक्लेदेऽर्थे न पठ्यते तथापि कर्तृकर्मविषयस्य पचेरर्थे वर्त्तते स एव ण्यन्तोऽपि प्राकृतं प्र
कृतौ भवं णिज्रहितस्य विवाच्यं पच्यर्थमाह सोऽपि पाक एव न तत्र पाचयतेरर्थः यथा सिध्यत्योदनः साधयत्योदनमिति तत्र यदा श्रातेः क्त उत्पद्यते तदाकर्मकत्वात्क
र्त्तरि भवति शृतं क्षीरमिति श्रयेः क्तस्तु कर्मणि शृतं क्षीरं देवदत्तेन द्वितीये तु णिचि विषयाच्यपि तद्व्यापारः पाचनालक्षणः साधारणेनाभिधीयते न तु पाक इति
निपातनाभाव इति। श्रयेः शृत्वमन्यत्र हेतोरिति वार्त्तिके श्राश्रप्योः शृभावो निपात्यत इति पूर्वमुक्तत्वात् द्वारापल्लक्षणप्रयोजकव्यापारांगीकारेणास्मा राम॰
मर्थ्यात्सा च पित्तलक्षणप्रयोजकव्यापारनिषेधो विज्ञेयः। पाकोऽयं पाक यत्को द्विविध इह मत्ता विक्लित्तिर्विक्लेदना तत्राति वर्त्तकमनं अययतिरुभय २४
त्रोभयोक्तेः शृभावः स्यादेवैकार्थ्येऽपि स्तु प्रसज्यति सति पापचनेन द्वितीये नित्यं क्षीरे शृभावो हविषि च न तु पाकेष्वर्थान्तरेषु॥ ॥२७॥ ॥२७॥ ॥

।।प्यायः पी।। ।।अंधुः कूपः।। ।।लिड्यङोश्च।। ।।विभाषेति निवृत्तमिति तत्र सत्ये पुनर्विभाषाग्रहणात् प्यायः पीत्येनच्चकारेणात्तु कृष्यतइतिआ
सति चकारे प्रकरणेन संप्रसारणे एवानुवृत्तिः स्यात् यथोत्तरत्रापरत्वात् सीभावे कृतइतिन तुद्ध्योः सायकाशयोः परत्वं भवति अनवकाशत्वपीभावः
एवं तर्हि परत्वादुत्कृष्टत्वात् अनवकाशत्वादितिभावः। पुनः प्रसंगविज्ञानादिति अत्रापि विप्रतिषेधे परमित्यत्र यदुक्तं नतद्विवक्षितं किंतर्हि द्विर्वचन

प्यायः पी।। ।।ओप्यायी वृद्धौ विसस्य धातोर्निष्ठायां विभाषा पीत्ययमादेशो भवति। पीनं मुखं पीनो बाहुः पीनमुरः। इयम
विभाषा व्यवस्थितविभाषेव तेनानुपसर्गस्यैव स भवति सोपसर्गस्य नैव भवति प्रप्यानः आप्यानश्चंद्रमा इति। आङः पूर्वस्यां धु
धस्यो भवत्येव। आपीनोंधुः आपीनमूधइति।। ।।लिड्यङोश्च।। ।।विभाषेति निवृत्तं प्यायः पीत्येतच्चशब्देनानुकृष्यते लि
टियङि च परतः प्यायः पीत्ययमादेशो भवति। आपिप्ये आपिप्याते आपिप्यिरे। परत्वात् कृते यी भावे पुनः प्रसंगविज्ञाना
द्विर्वचनं एरनेकाचइति यणादेशः। यङि आपेपीयते आपेपीयेते आपेपीयन्ते १४ ।।श्री।। ।।श्री।। ।।

सपुनः प्रसंगोस्तीति कृत्वेत्यर्थः परित्वत्स्वनवकाशः पीभावः नाप्राप्ते द्विर्वचने आरभ्यमाणेन तेन द्विर्वचनस्य बाधः प्राप्नोतिनेषदोषः
उत्सर्गापवादयोः परस्परसंनिधौ बाध्यबाधकभावः इह तु संप्रसारणप्रकरणे नद्विर्वचनप्रकरणं विछिन्नमत एवव्यस्तेदिग्णादेशेन विल
बाधनमिष्यतइति।। ।।छ।। ।।छ।। ।।छ।। ।।

दे०का०१५०१ विभाषाश्वेः॥ ॥शुशावेति परत्वादपि ह्व्यादेशो बाधित्वा नित्यत्वात्संप्रसारणमंतरंगत्वात्सवर्णत्वं शुशुवतुरिति अत्रापि परत्वात्प्राप्तमियङं बाधित्वा नित्य
त्वात्संप्रसारणं तत्र कृते परमप्येरनेकाच इति यणं बाधित्वांतरंगत्वात्पूर्वत्वं पश्चादुवङादेशः॥ अमत्रेति पित्सु वचनेषु तत्र सर्वत्र विकल्प इति पित्सु ताव
१५ द्विकल्प्यते प्रतिषेधकाभावात् कित्त्वपि परत्वादयं विकल्पः यत्रादिलक्षणस्यावकाशः अनः अनवान् अस्यावकाशः पितिवचनानि किति लि
ट्युभयप्रसंगे परत्वादयं विकल्पः अभ्यासस्यापि न भवतीति किमिति न भवतीति परत्वादनेन विकल्पेन बाधः धातोरयं विकल्पो नाभ्यासस्य किं चोभयेषां
ग्रहणस्य प्रयोजनमुक्तं विप्रतिषेधमपि बाधित्वाभ्यासस्य सवर्णविधिर्यथा स्यादिति तस्माद्वचनमेवात्र शरणं यदाह श्वेर्लिट्यभ्यासलक्षणप्रतिषेध इति॥

विभाषाश्वेः॥ ॥लिट्यभ्यासस्योरिति वर्त्तते संप्रसारणमिति च लिटि यङि च परतः श्वयतेर्धातोर्विभाषा संप्रसारणं भवति शुशाव शिश्वाय
शुशुवतुः शिश्वियतुः यङि शोशूयते शेश्वीयते तत्र यङि संप्रसारणमप्राप्तं विधीयते लिटि तु किति यजादित्वान्नित्यं प्राप्तमप्राप्तं च
तत्सर्वं विकल्पेन भवति एषा तूभयत्र विभाषा यदा तु धातोर्न भवति तदा लिट्यभ्यासस्योभयेषामित्यभ्यासस्यापि न भवति॥ ॥णौ च संश्च
ङोः॥ ॥विभाषाश्वेरिति वर्त्तते सन्परे चङ्परे च णौ परतः श्वयतेर्धातोर्विभाषा संप्रसारणं भवति शुशावयिषति शिश्वाययिषति।
चङि अशूशवत् अशिश्वयत्। संप्रसारणं संप्रसारणाश्रयं च बलीय इति वचनादंतरंगमपि वृद्ध्यादिकं संप्रसारणेन बाध्यते कृते
च संप्रसारणे वृद्धिरावादेशश्च तत्र ओः पुयण्ज्यपर इति वचनं ज्ञापकं णौ स्थानिवद्भावस्येति स्थानिवद्भावात् शुशाव इति॥ ॥

॥णौ च संश्चङोः॥ ॥णाविति श्वयत्यपेक्षया परसप्तमी संश्चङोरिति णयपेक्षया तदाह सन्परे चङ्परे च णौ परत इति। अंतरंगमपीति अंतरंगत्वं तु
णौ ज्ञात्रापेक्षत्वात्। वृद्ध्यादिकमिति आदिशब्देनायादेशो गृह्यते यदा तु संप्रसारणं संप्रसारणाश्रयं च कार्यं बलीय इति परिभाषाप्रयोजनाभा राम०
वात्प्रसारयोगात तदा णौ च संश्चङोरिति विषयसप्तमी णाविषयणिजर्थे णिविषयभूते तन्निमित्ते संश्चङोर्विषयभूतयोरिति। ओः पुयण्ज्यपर इत्यादि। यथावे
त ज्ञापकं तथा द्विर्वचने चीत्यत्र प्रतिपादितं अत्र स्थानिवद्भावादित्यतः पूर्वं द्वितीयो यीति शब्दः पाठ्यः ते नेति चापठितः॥ ॥७॥ ॥ १५
॥३ ३॥ ॥३ ३॥ ॥

ह्वः संप्रसारणं॥ ॥संप्रसारणस्य बलीयस्त्वादिति। बलीयस्त्वं च पूर्ववत्। एकयोगेनैव सिद्ध इति तु न्नरसूत्रे कस्यचिन्निमित्तस्य समीनिर्दिष्टस्याभ्य
स्तप्रत्ययश्रवणाभावेऽपि संश्च ङः परे ह्वोऽभ्यस्तकारणस्य सिद्धमेव संप्रसारणमिति भावः। अनभ्यस्तनिमित्तप्रत्ययेनेति अभ्यस्तस्य यन्निमित्तं न भव
ति। तेन व्यवधानेनेति। यद्यनन्तरसूत्रं प्रवर्त्तेत योगविभागोऽनर्थकः स्यादिति ज्ञापकत्वं॥ ॥अभ्यस्तस्य च॥ ॥अत्र ह्व इत्यनुवर्त्तमानस्य यद्यभ्यस्त

ह्वः संप्रसारणं॥ ॥णौ च संश्चङोरित्यनुवर्त्तते सन्परे चङ्परे च णौ परतो ह्वः संप्रसारणं भवति। जुहावयिषति जुहावयिषतः जुहाव
यिषंति। चङ्। अजूहवत् अजूहवतां अजूहवन्। संप्रसारणस्य बलीयस्त्वाच्छासाह्वाव्यावेपां युगिति युङ् भवति। संप्रसारणमिति
वर्त्तमाने पुनः संप्रसारणग्रहणं विभाषेत्यस्य निवृत्त्यर्थं ह्वः संप्रसारणमभ्यस्तस्य चेत्येकयोगेनैव सिद्धे पृथग्योगकरणमनभ्यस्त
निमित्तप्रत्ययव्यवधाने संप्रसारणाभावज्ञापनार्थं। ह्वायकमिच्छति ह्वायकीयति। सन् जिह्वायकीयिषति॥ ॥अभ्यस्तस्य च॥ ॥
ह्व इति वर्त्तते तदभ्यस्तस्येत्यनेन अधिकरणं अभ्यस्तस्य यो ह्वयतिः कश्चाभ्यस्तस्य ह्वयतिः कारणं तेनाभ्यस्तकारणस्य ह्वयतेर्द्वि
र्वचनात्प्रागेव संप्रसारणं भवति। जुहाव जोहूयते जुहूषति १५ ॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४ ॥

स्येत्यनेन सामानाधिकरण्यं स्यात् तदा कृते द्विर्वचने अभ्यस्तसंज्ञायामुपजातायां संप्रसारणेन भवितव्यं तत्र श्वाभ्यासस्य संप्रसारणं न स्यात् न संप्रसा
रणे संप्रसारणमिति निषेधात्। आकारहकाराभ्यां व्यवहितत्वादप्रतिषेध इति चेत् न समानाङ्गे संप्रसारणप्रतिषेधात् समानाङ्गग्रहणं तत्र चोदयि
ष्यति एतच्च तत्रैव व्यक्तं व्याख्यास्यते तेन निमित्तसामानाधिकरण्ये दोषं पश्यन्नाह तदभ्यस्तस्येत्यनेन व्यधिकरणमिति। एतदेव स्फोरयति अभ्यस्तस्य
यो ह्वयतिरिति। तेन किं सिद्धं भवतीत्याह तेनेति १५ ॥छ॥ ॥

६का·प०१

१६ अपस्पृधेथां ॥ ॥ अपर आहेति कस्यांचिच्छाखायामपस्पृधेथामिति साधुस्यात्तं पठ्यते अन्यस्यां तु पठ्यते भयमप्यनेन निपातनेन संगृह्यतेत

बहुलं छन्दसि ॥ ॥ ह्वः इत्यनुवर्त्तते छन्दसि विषये ह्वयतेर्धातोः संप्रसारणं बहुलं भवति। इन्द्रमग्निं हुवे। हुवे देवीं सरस्वतीं। ह्वेञो ल
उत्तमैकवचने परे तत्तम पुरुषैकवचने बहुलं छन्दसीति लुकि कृते संप्रसारणमुवङादेशश्च। न च भवति। ह्वयामि मरुतः शिवान् ह्व
यामि विश्वान्देवान् ॥ ॥ चायः की ॥ ॥ बहुलं छन्दसीति वर्त्तते चायतेर्धातोश्छन्दसि विषये बहुलं की इत्ययमादेशो भवति। नि
धुपाहि चिक्युः। न्यान्यं चिकयुर्न निचिक्युरन्यं। लिघुसित्यं। न च भवति अग्निर्ज्योतिर्निचाय्य ॥ ॥ अपस्पृधेथामानृचुरानृ
ह्वुश्चिच्युषेतित्याजश्राताश्रितमाशीराशीर्त्ताः छन्दसीति वर्त्तते अपस्पृधेथाम् आनृचुः आनृहुः चिच्युषे तित्याज श्राताः
श्रितं आशीः आशीर्त्ताः इत्येते शब्दाश्छन्दसि विषये निपात्यन्ते। अपस्पृधेथामिति संप्रसारणमकारलोपश्च निपात्यते। बहुलं छ
+ तिस्पर्द्धेर्लङ्वर्षस्य स्पर्द्धः आथामिद्विर्वचने रेफस्य संप्रसारणमकारलोपश्च निपातनात्। इदं स्वविछोपदं पस्पृधेथामिति
स्पर्द्धेथामिति भाषायां। अपर आह स्पर्द्धेरेव पूर्वस्य लङि आथामि[redacted]+ द
स्य माङ्योगे पीति च्छन्दत्वात् मात्राभावः ॥ ॥ ७ ॥ ॥

त्रैकपदेति दुःतिङः इति निघातः प्राप्तो यदृत्ता त्रित्यमिति प्रतिषिद्धः तत्राद्युदात्तस्वरेणाद्युदात्तत्वं पदं भवति ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ रामं० १६

परानुदेपरेतदानिन्नात्प्रतिषेधेत्तरस्यनुदात्तेत्दितिलसार्वधातुकानुदात्तत्वेधातुस्वरेणास्पर्धेथामितिपदमाद्युदात्तंतिङिचोदात्तवतीत्यपरा

अत्रप्रत्युदाहरणंअपास्पर्द्धेथामितिभाषायां। आनृचुरानृहुरिति। अर्च पूजायां अर्ह पूजायामित्यनयोर्द्वितीयोलिट्युसिसंप्रसा
रणं अकारलोपश्चनिपात्यते। ततोद्विर्वचनमुरदत्वंअतआदेःदीर्घत्वंतस्मान्नुड्द्विहलइतिनुडागमः। यउअत्र अर्कमानृचुः।
नदस्यानृहुः। आनर्चुः आनर्हुरितिभाषायां। चिच्युषइतिच्युङ् गतावित्येतस्यधातोर्लिटिसेअहे अभ्यासस्यसंप्रसारणं
अलिट्त्वंचनिपात्यते। चिच्युषे। चुच्युविषइतिभाषायां। तित्याजेत्यजेर्हानावित्यस्यधातोर्लिटि अभ्यासस्यसंप्रसारणंनिपात्य
ते। तस्माज्जेतिभाषायां। श्राताइतिश्रीञ् पाकइत्यस्यधातोर्निष्ठायांश्राभावः। श्राता स्त इन्द्र सोमाः। श्रितमितितस्यैव श्रीणा
तेर्ह्रस्वत्वं सोमो गौरी अधिश्रितः। श्रितानोग्रहाः। अनयोः श्राभावश्रिभावयोर्विषयविभागमिच्छन्ति। सोमेधुवद्रुत्यु श्रा
भावः अन्यत्र श्रिभावइति सोमादन्यत्र क्वचिदेकस्मिन्नेवश्राभावोदृश्यते यदि श्रृतोजुहोतन नतत्पश्रातारितिबहुवचनस्या
विवक्षितत्वाद्युपसंग्रहोद्रष्टव्यः। आशीराशीर्त इतितस्यैवश्रीणातेरञ्पूर्वस्यक्विपिनिष्ठायांचशीरादेशः निष्ठायांचनत्वा
भावोनिपात्यते तस्माशीरादुहन्ति आशीर्तञ्जं १६ ॥ ॥

स्यानिष्ठातः बहुवचनस्याविवक्षितत्वादितिसोमस्यैवबहुलेश्राभावइतिनियमानाश्रयणाच्च अन्यथाबहुत्वाविवक्षायामपिसोमादन्यत्र
श्राभावेनस्यात्तद्विषयविभागवादिनां १६ ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

टि०का०पा०१

७

नसंप्रसारणोपेषां संप्रसारणं विहितं तेषां यावंतो यणस्तेषां सर्वेषां संप्रसारणे प्राप्ते प्रतिषेधो यमुच्यते । ननु चाकालोऽस्य परिभाषयाऽस्यैव भविष्यति का
नया परिभाषयाशङ्कामिहोपस्थापितुं आश्रीनामंत्यस्य यणो संभवात् अनंत्यविकारेऽयं सदेश इसेन यापरिभाषया तर्हि अंत्यसदेशस्यैव भविष्य
ति नैषाऽस्ति परिभाषा प्रयोजनाभावात् एतद्वा स्मामिः परिभाषाप्रकरणे ग्रंथेऽर्थ उपपादितं एवं तर्हि ज्ञापकात्विह पूर्वस्य यावः पीमावंशास्ति
न हापयति न सर्वस्य यणः संप्रसारणं भवतीति यदि स्यात् प्याय संप्रसारणमेव विदध्यात् ह्वः योर्यकारयोः संप्रसारणे पूर्वत्वे च हलः इति दीर्घ
त्वे च सिद्धं स्यात् सीनं मुख्यमिति । ननु च प्यायोऽस्य यणः संभवात्त्वस्यैव स्यात् स्यादेवं यदि स्यान्न षष्ठी विज्ञायेत अवयवषष्ठी चैषा विज्ञायते प्या
योऽयं यणस्येति एवमप्येतावदेव ज्ञाप्यते न सर्वस्य यणः संप्रसारणं भवतीति तत्र कुत एतत् परस्यैव भवति न पूर्वस्येति न चावि ष्यतीत्या

नसंप्रसारणे संप्रसारणं ॥ ॥संप्रसारणोपरतः पूर्वस्य यणः संप्रसारणं न भवति । व्यधेः विद्धः । व्यचेः विचितः । व्येञः सं
वीमः । एकयोगलक्षणमपि संप्रसारणमत एव वचनात्पूर्वं परस्य यणः क्रियते पूर्वस्य च प्रसक्तं प्रतिषिध्यते । संप्रसार
णमिति वर्तमाने ॥ ॥श्रीः॥ ॥श्री॥ ॥श्रीरामनाम॥ ॥श्री रामनाम॥ ॥श्री॥

दिनिर्देशात्परस्यैवेति उक्तमवगंतुं पर्यायेण प्रवृत्तावपि तु द्वयप्रसक्तेः तस्मात्परस्यैवेति नन्वत्र पूर्वपरयोर्यणोरेकयोगलक्षणं संप्रसारणं
न यदि परस्याभिनिर्वृत्तं पूर्वस्मात् अथ पूर्वस्याभिनिर्वृत्तमेव न चाभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या विज्ञातुं यो हि भुक्तवंतं ब्रूयात् मा
भुं क्षथा इति किं तेन कृतं स्यात् अथ पूर्वस्यानभि । निर्वृत्तं परस्याप्यनभिनिर्वृत्तमेव तत्र निमित्तत्वेनाश्रयणमनुपपन्नमित्यत आह एकयो
गलक्षणमपीति अपरः कल्पः अस्तु द्वयोरप्यभिनिर्वृत्तं कथं तर्हि प्रतिषिध्यते तेन संप्रसारणं प्रतिषिध्यते किं तर्हि तदाश्रयपूर्वत्वं तद्वत्त्वत्र सं राम०
प्रसारणशब्देनोपचारात्तदुच्यते तस्मिन्प्रतिषिद्धे यणादेशे सिद्धमिष्टं अस्तु वा द्वयोरप्यनभिनिर्वृत्तं कथं तर्हि निमित्तत्वेनैवात्र संप्रसारण ७
निमित्तं किं तर्हि तद्भावीयणः स एव च समर्थ्यंते न संप्रसारणशब्देनोच्यते इति ॥ ॥

पुनः संप्रसारणमिति। असति तस्मिन्ननंतरस्य विधिर्वा भवति प्रतिषेधो वेति पूर्वप्रकरणविहितस्यैव संप्रसारणस्य प्रतिषेधः स्यान्न विदेशस्यस्य
विभिन्नोद्देशो विदेशः संप्रसारणग्रहणादेवेति। इह तु अथो लिटि वि अथ इति हलादिशेषापवादः संप्रसारणं क्रमणादुत्सादिशेषश्चापवादो
भवतीति परस्यैव संप्रसारणस्य सिद्धं अत एव पुनः संप्रसारणस्य प्रतिषेधो न भवति प्रस्य येण सकारेण व्यवधानादिति भावः। पदे तु व्यवधान

पुनः संप्रसारणग्रहणं विदेशस्यापि संप्रसारणस्य प्रतिषेधो यथा स्यात् अयुवमन्वो नाम तद्धिते पूनाम्नो संप्रसा
रणं ग्रहणसामर्थ्यादेव व पूर्वस्य प्रतिषेधे कर्तव्ये सवर्णदीर्घत्वमेकादेशो न स्यान्निवद्भवति सतिवास्थानिवत्त्वे व्यवधानमे
तावद्दाघापिष्यते अविविक्त त्र पदादि लोपश्छंदसि। अविपरतस्त्रे। संप्रसारणं भवति उत्तरपदादिलोपश्छंदसि विषये। तिस्र
अचोपस्मिन्स्यूक्ते तृचं सूक्तं तृचं साम। अकपूर्वः यथा मानश्शति समासांतः। छंदसीति किं त्र्यचं कर्म। रपेर्मतो बह्वृलं रपिश
वृस्यश्छंदसि विषये मतोपरतो बह्वृलं संप्रसारणं भवति। आरेवानेतु नो वशं। न च भवति रपिमान् पुष्टिवर्द्धनः १७ ॥

मात्रे स्यात् तदा समानांगग्रहणं कर्तव्यं निमित्तनिमित्तिनौ यत्रैकस्मिन्नेवांगे भवतः तत्र प्रतिषेधो भवतीति वक्तव्यं तयोर्युष्वे ज्यत्र क्वसौ
धातुरणं कस्य तं च विभक्ताविति प्रतिषेधाभावः अंतरंगत्वाद्वात्र पूर्वं पेव धातोः संप्रसारणं। अविवेरिति। कल्पसूत्रकार एसु हि शाहृस्था
पि संप्रसारणं प्रयुंजते त्टचाः प्रतिपत्स्तु चरा ह्वचाः प्रगाथा इति १७ ॥ ॥श्रीरामो विजयते॥ ॥श्रीरामनामः॥ ॥

॥श्री॥ ॥श्री॥ ॥छ॥ ॥

लिटि वयो यः॥ ॥लिड्ग्रहणमुत्तरार्थमिति। नेहार्थं लिटि अन्यत्र वण्णादेशस्यासंभवात्॥ ॥वश्चास्य॥ ॥अस्य ग्रहणेन वयो यकारः प्रतिनिर्दिश्य
ते अन्यथा देशकारस्योच्चारणार्थत्वे प्रमाणाभावात् ऊयप एव वा पर्यवादेशः संभाव्येत अस्य ग्रहणेनानुसृतिय घञ्प्रकारवानादेशस्तथाप्यतो लो
पेन सिद्धमिष्टं वश्चास्य ग्रहणं शक्यमकर्तुं कथमन्यतरस्यां वेञः इति सूत्रं कर्तव्यं लिटीत्येव किति लिटि वेञः संप्रसारणं न भवत्यन्यतरस्यां वचु
तुः वचुः संप्रसारणपक्षे उवचुः ऊवे शेषान्तिद्विर्वचनं सवर्णदीर्घत्वं च ऊवतुः ऊवुः वेञो वपिः जयतुः ऊयुः पितिकथं ववौ ववियथ ल्यपि च इति चकार

लिटि वयो यः॥ ॥न संप्रसारणमित्यनुवर्त्तते। लिटि परतो वयो यकारस्य संप्रसारणं न भवति। उवाय ऊयतुः ऊयुः। लिटि ग्रह
णमुत्तरार्थं॥ ॥वश्चास्यान्यतरस्यां किति॥ अस्य वयो यकारस्य किति लिटि परतो वकारादेशो भवत्यन्यतरस्याम्। ऊवतुः
ऊवुः ऊयतुः ऊयुः किती ति किम्। उवाय। उवयिथ॥ ॥वेञः॥ ॥लिटीत्येव वेञ् तंतुसंतानइत्यस्य धातोर्लिटि संप्रसारणं
न भवति। ववौ ववतुः। किति पञ्चादित्वाद्धातोः प्राप्तं अकिति तु लिघभ्यासस्योभयेषामिति अभ्यासस्योभयं प्रतिषिध्यते॥
॥ल्यपि च॥ ॥वेञ इत्यनुवर्त्तते वेञो ल्यपि परतः संप्रसारणं न भवति प्रवाय उपवाय। पृथग्योगकरणमुत्तरार्थं॥ ॥ =
ज्यश्च॥ ॥ल्यपीत्येव ज्या वयोहानावित्यस्य धातोर्ल्यपि परतः संप्रसारणं न भवति। प्रज्याय उपज्याय योगविभाग उत्तरार्थः॥
॥विभाषा परेः॥ ॥ल्यपि च ज्यश्चेति अनुवर्त्तते परेरुत्तरस्य ज्या इत्येतस्य धातोर्ल्यपि परतः संप्रसारणं विभाषा न भ ≡
वति। परिज्याय परिजीय। परिजीय संप्रसारणे कृते परपूर्वत्वे च हलस्येति तुक् प्राप्नोति सहलइति दीर्घत्वेन परत्वाद्बाध्य

तु लिङ्न्नु कस्मात्तेन तत्तिनित्ततिषेधार्थं भविष्यति॥ ॥ल्यपि च॥ ॥पूर्ववद्वश्चास्य ग्रहणे क्रियमाणे ल्यपि ज्यश्चेति एकयोग एव कर्त्तव्यः
ह्रस्व इति ह्रस्वकारो न कर्त्तव्यो भवति॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

गन्त्रादेचउपदेशे॥ ॥धातोरितियरितोनुवर्त्ततमतो विशेष्यमाणादेचानाश्रितस्तदंतविधिरित्युपदेशेपएकाचूतस्मात्वमित्यर्थोभव
तितत्रष्टौ किंतात्रौ कि ताइत्यत्रापिप्राप्नोतिननुचाप्मितीतु अतेनचात्रा शितं पश्यामः नचकुकारएवाशित् किंकारणान नत्रिवपुरूम्पा
येनशित्सदृशस्यप्रत्ययस्यैवग्रहणात् स्यादेवंयद्यशितीतिपर्युदासः स्यात्प्रसज्यप्रतिषेधस्त्वयमितिनिवस्तते तस्माद्धातोरित्यनुवर्त्तमित्या
हधातोरितिवर्त्ततइति। तस्यचेनोविशेषणात्तदंतविधिरित्याहएजंतो योधातुरिति। उपदेशइति आर्नि होनस्वरूपस्यस्वरूपज्ञापनार्थी

व्यधोर्हानाविस्मस्यधातोर्ल्यपिपरतः संप्रसारणंनभवति· प्रज्याय· उपज्याय ४१ व्यश्च। ल्यपीत्येव व्येञ् संवरणे
आदेचउपदेशेशिति॥ ॥धातोरितिवर्त्ततेएजंतोयोधातुरूपदेशेतस्याकारादेशोभवतिशितिप्रत्यये
तुनभवति। ग्लै ग्लातास्नातुं ग्लातव्यं। शो निशाता। निशातुं निशातव्यं। एवइतिकिं हर्त्ता। उपदेशइतिकिं
चेतास्तोता। अशितीतिकिं ग्लायति। ग्लायति॥ १८ ॥ ॥श्रीरामचंद्रायनमः॥ ॥श्रीराम॥

माद्यमुच्चारणमुपदेशः। चेतास्तोतेति। आर्द्धधातुकेगुणविधानंत्वात्वार्थमेवस्यात्पंविधिंप्रत्युपदेशइतिव्यापात् कर्त्ताहर्त्ताइत्यादौगुण
विधिश्चरितार्थः एवमपित्वा क्षणिकत्वादेवात्रनभविष्यतितापकाश्चपरत्वंक्रीङ्‌जीनांणौवात्वंशास्तितह्यापयतिनपरनिमित्तस्ये
चआत्वंभवतीतिनेतरस्तिस्तापकेनियमार्थमेतत्स्मात् क्रीङ्‌जीनांणौचेवेतियत्रहिंसमानातिमिनोतिदीङांल्यपिचेत्यात्वंशास्तिप
वंतर्घुत्रार्थमवश्यंकर्त्तव्यमुपदेशग्रहणातदिहैवक्रियतेमंदधियामनुग्रहाय १८

ईका॰ ५७१
१९

कथमिति अशिदित्यर्थं बहुव्रीहिः तत्र प्रतिषेधे क्रियमाणे शिन्मात्रेऽस्य प्राप्नोति ततश्च जग्लायेरिति भवितव्यमिति प्रश्नः भावे लकारः तत्सुरुषा
श्रयेणोत्तरं कः पुनस्तत्पुरुषे सति गुणः स्यात् आह तत्रेति तत्पुरुषे हि वर्णग्रहणमिदं भवति वर्णग्रहणे च तदादौ कार्यं भवति स्तनेध्वपर
स्मैपदानामित्यत्र नपौरिति वा शिदित्येतेन स्यादिशंप्रत्यमाश्रित्य प्रतिषेधः प्रयोजनाभावादेवात्र न शप्यामवितव्यमिति चेत् नन्विह मिव
पतुतान्वनि हन्तिः अशितीति यथार्थं पर्युदासः स्यात् शितोऽन्यो शितस्मिन्नशितीति तिनतो ग्लायति म्लायतीत्यत्र शबकास्योच्चारणे कस्य
चैकादेशे कृते तत्स्य परं प्रत्यादिवद्भावादशिति शितो भवतीति कृत्वात्र प्राप्नोति प्रसज्यप्रतिषेधेतु न दोषः एकादेशस्य पूर्वं प्रत्येत

कथं जग्ले मम्ले नैवं विज्ञायते अशिदस्य स शिदिति किं तर्हि शएव तत्र शिदिति तत्र यस्मिन्विधिस्तदादावल्ग्रहणा
तिशिदादौ प्रत्यये प्रतिषेधः एश पुनः शाकारादिर्न भवति अशितीति प्रसज्य प्रतिषेधोयं तेनैतदात्वमनेनेति किं
प्राणीव प्रत्ययोत्र नैभवति सुग्लः सुम्लः इति आतश्चोपसर्गे इति कप्रत्ययः सुग्लानं सुम्लानं आतो युजिति एवमादि
सिद्धं भवति आकाराधिकारश्चानिर्दिश्यत इति यावत्॰ १९ ॥७॥ ॥श्री॥ ॥श्री॥ ॥

वद्भावात् शिद्ग्रहणेन ग्रहणात् शिति प्रतिषेध एव भवति किं पुनः कारणमेकादेशविषय एवात्वप्राप्तिश्चोद्यते सपुनः ग्लायतीत्यादा
वपिलकार एव शितिपरत आत्वं प्राप्नोतीति नैवं शक्यं चोदयितुं एवं ह्यशितीति प्रतिषेधो निर्विषयः स्यात् नच पाघ्राध्मास्थाधेट् दृशाः इति धेटः
शप्रत्ययो न सम्भवी विषयः न धेकमुद्दाहरणं शित्प्रतिषेधं प्रयोजयति यद्येतावत् प्रयोजनं स्यादेशस्यैव ब्रूयात् पद्मोत्तरं गात्वानित्यत्वाच्च
पूर्वं लस्यातिवादपः पश्चाल्लुपश्च नित्यं वात्वं तस्मादेकादेशविषय एवं चोद्यते नैव दोषः एकादेशस्य पूर्वविधौ स्थानिवद्भावेनाशितो न
सप्रत्ययस्याभावात् इहतर्हि सुग्लः सुम्लः सुग्लानं सुम्लान मिति कार्यं तत्र लक्षणाः काङ् पुनोस्तु एषोप्यदोषः आत्वभाविन एजन्तादाकारा

एम॰
१९

रुतं हि स्थितिस्थानीयं षष्ठीयपानीयपरिकृते आत्वं च प्राप्नोति आयादयपञ्चपरत्वादायादयः सुः संनुकृते पुनः लोपसात्वे सवर्णदीर्घत्वे स्थानी
यमिसारि सिद्धं । न चायादिषु कृतेषु नापमज्ञतः न च स्थानिवद्भावो लाश्रयत्वात् स्यादेतदेवं यदि सं प्रतिपदे जंतं तस्मात्वं भवतीत्युच्यते तदिह न
पदे शागतमेजंतत्वं नमं प्रतीतत्वमिति नास्ति स्थानिवद्भावापेक्षा । न त्वेवमपि ज्ञस्तुरित्यादेरुपकारस्यात्वे कृते जस्त्वाश्रा स्तु इत्यस्मिन्स्थिते तदे
गमप्याकारयोरेकादेशो बाधित्वा तो लोपः टिचेषा तो लोपः स्यात् न च पूर्वस्याकारस्य पुनर्लोपो लभ्यते यकारलोपस्य पूर्वविधौ स्थानिवद्भा
वात् सिद्धवदत्राभादिति सिद्धत्वाच्च । नैष दोषः समानाश्रये वार्णदांगं बलीयः इह तु व्याश्रयत्वादंतरंग एकादेशे सति पश्चादाल्लोप इति
सिद्धमिष्टं । एवमपि द्विर्वचनं चीलायादीनां स्थानिवत्त्वात् लेलुहस्य द्विर्वचने धातोरस्यैव प्राप्नोति प्रांतीत्वनैमित्तिकत्वात्
तस्य द्विर्वचननिमित्ते अविहितत्वान्न दोषः पर्युदासपक्षेपि न दोषः लिटि वर्यपरति द्विलकारको पं निर्देशः तथा निर्देशस्य च तत्र प्रयोजन
नाभावादिहा तु हन्तं गमभेदेन संबध्यते आशिसिव आत्वं भवति लिटि तु लकारादेलावस्थायामेवेनित तस्मात् तस्य द्विर्वचननिमित्ता
ज्निमित्तत्वाभावात्र तत्स्थानिवद्भावः आयादयस्तु लिघप्राप्ता एव तदेवं पर्युदासपक्षस्य बहुप्रतिविधेयत्वात्प्रसज्यप्रति
षेधोयमेसाह अशितीति प्रसज्यप्रतिषेधोयमिति । ते न किं सिद्धं भवति साह तेनेति दित्सा दिप्सा एवमादि सिद्धं भवतीत्याशिति द्वेतनसु
त्लेसत्रात स्योपसर्गाश्लङ्गो ग्रहणं अस्मान्निवद्ध निपरीज नानिषगोवाद्या मिर्दिशितानि । इह कस्मान्न भवति गोष्पानो ष्पाति नि
सापकानयस्यं रायो हलीसात्वं शास्तितह्ना पयति न प्राप्ति यदि कस्मात्वं भवतीति नैनदस्ति ज्ञापकं नियमार्थमेतत्स्यात् रायो हल्ये
व आतो मृशमो रिस्ले त्र त्रुगां यश्ये सत्र गोतो णिदिति णित्वाद्वृद्धिः प्राप्नोति गाः पश्येत्यत्र लशितीति प्रतिषेधः प्राप्नोतीति त्
नभवेदित्स ज्ञापकं एवं तर्ह्युपदेशरिष्युच्यते न च गो नौ शब्दयो रुपदेशोस्तिय द्येपयसोर्यत्नो वयो धर्मस्यादाबुच्चारणं नासानुपदे
शः किं तर्ह्युद्देशः सिद्धवदुच्चारणात् । माम्ङ्गो नौ शब्दयोरुपदेशाः एव स्वरूपदेशास्तिग मेदैस्रा नुदिभ्यांडा विति न च टोडावोर्विधानवैय
र्थ्यं शासिच रितार्थत्वात् एवं तर्हि धातोरिति वर्तते इह सुकृत्वाम्न भविष्यति २८ ॥

ई का॰ प॰ १

२०

नमोलिटि॥ ॥किलात्वे मस्य मतिगविशेषाभावात्सिलुः स्वहणमेतस्य हन्तिकारेराद्रतिं थलीइत्यच्छिर्यलीनामितीह॥ ॥क्रीडृ जीनां
रोगे॥ ॥यद्यपि करोतेरीडून्मना गिलेत स्पथ णादेशो क्रीडि तिरूपं संभवति तथाप्येच कृत्यधिकारात्करोते स्तावत्र संभवति तथाइं जोपिग्रहणं नभ
वति क्तस्वांतेन परेण जयतिना साहचर्यात्॥ ॥सिध्यतेः॥ ॥परलोकः प्रयोजनमस्यत स्यारलोकिकं प्रयोजनमिति उक्तं। अनुशातिकादित्वात्
भयपद वृद्धिः ज्ञानविशेषे वर्त्तते इति हे योणादेयतत्वावबोधो ज्ञानविशेषः तापसः सिध्यतीति हेय मुपादेयं च तत्वतो ज्ञातु कामः प्रवर्त्तते इत्यर्थः
नमोलिटि॥ ॥एतेत्रइत्येतत्य धातोर्लिटि परत आकारादेशो नभवति॥ संविव्यायसं विव्ययिथ। लिघस्मास स्योभयेषामिसस्यामस्यसंप्र
सारणे। ण लिअचो ञ्णितीति वृद्धिः॥ ॥स्फुरति स्फुलत्योर्घञि॥ ॥आदेच इति वर्त्तते स्फुरस्फुलचलनेएतयोर्घञ्यतो रेचः स्थाने च
ञिपरतआकारादेशो भवति। विस्फारः विष्फालः विस्फरः विस्फालः। स्फुरति स्फुलत्योर्निर्निविभ्यइति षत्वं॥ ॥क्रीडृ जीनां
णौ॥ ॥डुक्रीञ्‌ द्रव्यविनिमये इङ्‌ अध्ययने जिजये इत्येतेषां धातूनां णौ परतः एच स्थाने आकारादेशो भवति। क्रापयति
अध्यापयति जापयति॥ ॥सिध्यतेरपारलौकिके॥ ॥णाविति वर्त्तते षिधु हिंसासंराध्योरित्येतस्य धातोरपारलौकिकेर्थे वर्त्त
मानस्यैचः स्थाने आकारादेशो भवति णौ परतः। अन्नं साधयति ग्रामं साधयति। अपारलौकिक इति किं तप स्तापसं सेधयति स्वा
न्येवैनं कर्माणि सेधयन्ति। अत्रोभयत्रापि सेधिः परलोकार्थे ज्ञानविशेषे वर्त्तते तापसः सिध्यति ज्ञानविशेषमासादयतीति तं तपः
प्रयुंक्ते स च ज्ञानविशेषवत्स्वः परलोके जन्मांतरे फलमभ्युदयलक्षणमुपसंहरन्परलोकप्रयोजनो भवति। इह कस्मान्न भ
वति अन्नं साधयति ब्राह्मणेभ्यो दास्यामीति सिधेस्त्वार्थो निष्पत्तिः तस्याः प्रयोजनमन्नं तस्य च दानं तत्पारलौकिकं न पुनः सिद्धिरे
तदाह ज्ञानविशेषमासादयतीति तं तपः प्रयुंक्ते ज्ञानविशेषवतं करोतीत्यर्थः परलोकइत्यस्य विवरणं जन्मांतर इति इह वा भवतु स्वर्गादौ वा शरीरांत
रे फललक्षणार्थे पारलौकिकग्रहणमिति दर्शयति। उपसंहरन्निति हेतौ शतृप्रत्ययः। इह कस्मादिति ब्राह्मणेभ्यो दास्यामीत्यनेनाभिप्रायेणानु
ष्ठितो धात्वर्थः परलोकप्रयोजनो भवतीति प्रश्नः। सिध्यतेरर्थ इत्यादिना ऐहलौकिकत्वं धात्वर्थस्य दर्शयति तस्य प्रयोजनमन्नमिति तदुद्दिश्य
प्रवृत्तत्वात्। न पुनः सिद्धिरेवेति पारलौकिकीति लिंग विपरिणामेन संबंधनीयं। सिद्धिर्निष्पत्तिः यस्य सिद्धो धातुर्वर्त्तते सा च पारलौकिकी

राम॰

२०

साक्षादपि हिंसाशास्त्रस्य विधाने न पारलौकिकोपः सिध्यतेरर्थः तत्र पर्युदासो भवेत्तत्रार्थः स्यात्पारलौकिकप्रयोजन इदं तु साक्षात्परलोकार्थज्ञान
विशेषचरितार्थं न तो मेवंविधं विषयमवगाहते नैवंविधे विषये प्रवर्तन्त इत्यर्थः॥ ॥मीनातिमिनोति॥ ॥उपदेश एवात्वविधानाल्ल्यपः परत्वासंभवा
न ल्यपीति विषयसप्तमी ल्यपि विषय इति एकारकानुवृत्ति यथ विस्पष्टकानि विशेषणां प्रागासीन्न्तथापीहोपदेशाधिकारान्मीनातिमिनोतिदीनांचोपदेश
एजं तत्त्वाभावात्सामर्थ्यादेव ल्यपि विषय विशेषणं विज्ञायत इत्याह एव च ल्यपि विषय इति। एवं प्रत्यये एव स्यात्तस्मिन्नुद्धिश्यत इत्यर्थः उपदेश एवे

साक्षात्परलोकप्रयोजने सिद्ध्यर्थे ह्यलावकाद्यावचनमेवंविधं विषयं नावगाहते। सिध्यतेरितिश्यना निर्देशः षिधु गत्यामि
त्येतस्य योगादिकस्य निरासार्थः॥ ॥मीनातिमिनोतिदीङां ल्यपि च॥ ॥उपदेश इति चवर्तते मीञ् हिंसायां डुमिञ् प्रक्षेपण
णे दीङ् क्षये एतेषां धातूनां ल्यपि विषये चकाराद् एचश्च विषये उपदेश एव प्राक्प्रत्ययोत्पत्तेरलोऽन्त्यस्य स्थाने आकारादेशो भ
वति। प्रमाता प्रमातुं प्रमातव्यं प्रमाय। निमाता निमातुं निमातव्यं निमाय। उपदाता उपदातुं उपदातव्यं उपदाय। उपदेश एवा
त्वविधानादिवर्णान्तिलक्षणः प्रत्ययो न भवति आकारान्तलक्षणश्च भवति उपदायो वर्तते ईषदुपदानमिति घञ्युच प्रत्ययो
भवतः॥ १० ॥ ॥श्रीः॥ ॥

स्यस्य विवरणं प्राक्प्रत्ययोत्पत्तेरिति। उपदेश एवात्वविधाने योऽर्थः संपद्यते तं दर्शयति उपदेश एवात्वविधानादिति। एवर्णान्तलक्षणः प्रत्यय
प्रत्ययः आकारान्तलक्षणस्तु घञ्। यद्यपि घञा कारान्तादिति नोच्यते तथाप्येशत्वे सति भवत्यसति तु न भवतीत्येतावताकारान्तत्वलक्षणत्वं
उपदायो वर्तत इति प्रमातो युक्तविशेषण्ह्रज्जोरिति युक्ता ईषदुपदानमिति खलर्थे आतो युच् मीनातिमिनोत्योस्तु खल् वा एव भवतः निमी
मितिया खलचोः प्रतिषेध इति वक्ष्यमाणत्वादुदाहृतः १० ॥

ई का० प० १ विभाषा लीयतेः॥ ॥तयोरुभयोरपि यकार्यनिर्देशः क्रियत इति। यदि तु दैवादिकस्यैव श्यना निर्देशः क्रियेत लीङ इत्येव ब्रूयादिति भावः। श्रियः
२१ शिलक्षणा सामर्थ्याज्ञा भावकर्मवाचित्वेपि यग्भवति यथाऽकर्तृवाचित्वेपि शबादयो भवन्तीत्यर्थः। लोखल चौरिति पवाघवरचश्च सामान्यग्रहणं।
एवं चेति अव्यवस्थितविभाषा विज्ञानादेवेत्यर्थः। उल्लापयत इति लियः संमानन शालीनीकरणयोश्चेत्यात्मनेपदं॥ ॥विदेश्छंदसि॥ ॥यरवा

विभाषा लीयतेः॥ ॥ल्यपीति वर्त्तते उपदेश इति च। लीङ् श्लेषणे इति दिवादिः लीश्लेषणे इति क्र्यादिः तयोरुभयोरप्येषय
कार्निर्देश इति स्मर्यते। लीयतेर्धातोर्ल्यपि च एच विषये उपदेश एवालों त्यस्य स्थाने विभाषा आकारादेशो भवति। विलाता वि
लेता विलाय विलीय। निमिमीलियां खलचोरात्वप्रतिषेधो वक्तव्यः। ईषन्निमयः निमयो वर्त्तते ईषत्प्रमयः प्रमयो वर्त्तते
ते। ईषद्विलयः विलयो वर्त्तते। अत्र लियो व्यवस्थित विभाषा विज्ञानात्सिद्धं। एवं च प्रलंभन शालीनीकरणयोश्च यो
नित्यमात्वं भवति कस्त्वामुल्लापयते श्येनो वर्त्तिकामुल्लापते॥ ॥खिदेश्छंदसि॥ ॥विभाषेति वर्त्तते खिद दैन्य इत्येत
स्य धातोरेचः स्थाने विभाषा छंदसि विषये आकारादेशो भवति। चित्तं च खादयित्रं चिखेद। छंदसीति किं खेदयति॥ ॥

देति व्यत्ययेन परस्मैपदं आत्वस्यानैमित्तिकत्वाद्द्विर्वचने चीति स्थानिवद्भावाभावात्म्यासस्यैव र्णान्तिता न भवति। अयं योगः शक्योऽवक्तुं कथं खादे राम०
श्च खादादिदेश्चिखेदेति अनेकार्थत्वाद्धातूनामर्थभेदोप्य किंचित्करः॥ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ २१

अपगुरः॥ ॥ परिशिरति गुरेश्चर्थवर्तेतेतदर्थयोगः शकोवकुंवातेः प्रवापयति वीपतेः प्रवाययतीति। वीयतेरिस्पयमपिपकानिर्देशः वेतेरात्
दिकृत्वेनप्रपनोस्मिन्नगात्प्रयोजनं द्वियकानिर्देशः स्पर्वितं। प्रजनो हि जन्मनउपक्रमइति। जनेर्भावे घञ्प्रशाहस्रादिकर्मस्ति। गर्भग्रहणमि
तिगृहीतो हि गर्भस्त्रियतेततो गर्भग्रहणं जन्मनउपक्रमः॥ ॥विभेतेः॥ ॥हेतोर्भयमितिपंचमीभयेनेतिसमासः तदाहहेतोर्भय

अपगुरोणमुलि॥ ॥गुरीउद्यमनइत्येतस्यधातोरपपूर्वस्यणमुलिपरत एवः स्थानेविभाषाआकारादेशोभवति। अप
गोरमपगोरं अपगारं॥ आभीक्ष्ण्येणमुल्चेतिणमुल्। अस्यपगोरं युध्यंते अस्यपगारं युध्यंते इतिद्वितीयायांचेतिण
मुल्॥ ॥चिस्फुरोर्णौ॥ ॥चिञ्स्फुरइत्येतयोर्णौपरत एवः स्थानेविभाषाआकारादेशोभवति। चापयति चाययति। स्फा
रयति स्फोरयति॥ ॥प्रजनेवीयतेः॥ ॥णाविति वर्त्ततेवीगतिप्रजनकांत्यशनखादनेषु इत्येतस्यधातोः प्रजनेव
र्त्तमानस्यणौपरतो विभाषाआकारादेशोभवति। पुरोवातोगाः प्रवापयति प्रवाययति गर्भग्राहयतीत्यर्थः प्रजनो हि
जन्मोपक्रमो गर्भग्रहणं॥ ॥बिभेतेर्हेतुभये॥ ॥णाविति वर्त्ततेविभाषेति च हेतुरिह पारिभाषिकः स्वतंत्रस्य
प्रयोजकः ततोयद्भयंतद्धेतुभयं समपस्यसाक्षाद्धेतुः तत्रवर्त्तमानस्य ञिभीभयइत्यस्यधातोर्णौपरतो विभाषा आका
रादेशोभवति। मुंडोभापयते मुंडोभीषयते जटिलोभापयते जटिलोभीषयते भास्योर्हेतुभयइत्यात्मनेपदं। भियोहेतुभ
येषुकस्वआत्वपक्षेनभवती। लीभियोरीकारप्रश्लेषनिर्देशात् ईकारांतस्यभियःषुक्विधीयते। हेतुभयइति किं कुंचि
कयैनंभाययति अत्र कुंचिकातोभयंकारणातेनहेतोर्द्विवदत्वात् २१॥
मिति। किंपुनस्तदित्याह सपस्समपस्येति। सचात्वपक्षेनभवतीति। एकदेशविकृतस्यानन्यत्वात्प्राप्नोति। कुतोनभवतीत्याह लीभियो
रीकारप्रश्लेषनिर्देशादिति। लीभोर्नुक्स्नुकाविति लियोयोनुक्विधीयते यश्चभियःषुक्तावुभावप्याकारांतयोर्नभवतः कुतः लीरिति
ईकारप्रश्लेषेणकारांतयोर्विधानात्। लीभियोःप्रश्लेषनिर्देशादिति वार्त्तिकेसहपाठादिहलियोग्रहणं २१॥ ॥ ॥

१का॰प॰६ नित्यंस्मयतेः॥ ॥धात्वर्थसामान्यादितिसामान्यसंबंधेनधात्वर्थयोः सामान्यंधात्वर्थसामान्यंद्वयोरपिधात्वोरर्थेचित्तविकारएवभावोतेनभय
२२ शब्देनस्मयतेरर्थोभिधीयतेक्रीङ्जीनांणावित्यत्रस्मयतिर्नोक्तोहेतुभयइत्युपाधिंवक्ष्यामीति॥ ॥स्फातिदृशोः॥ ॥धातोःस्वरूपग्र
हणेतत्प्रत्ययेकार्यविज्ञायतइतिप्रत्ययइहसंनिधीयतेसप्तलाविशेष्यतेइतितदादिविधिर्विज्ञायतइत्याहझलादाविति। अकितिप्रत्यये
परतइति। कितिपरतोनभवतीतिप्रसक्तस्यप्रतिषेधोक्ष्यमिष्यते। एतच्चगाङ्कुटादिसूत्रेसम्यगुपपादितं। लघूपधगुणापवादोयमिति।

नित्यंस्मयतेः॥ ॥णावित्यनुवर्ततेहेतुभयइतिचनित्यग्रहणाद्विभाषेतिनिवृत्तंस्मिङ्ईषद्धसनइत्येतस्यधातो
र्हेतुभयेणौपरतोनित्यमाकारादेशोभवति। मुंडोविस्मापयतेहेतुभयइतिकिंकुंचिकयैनंविस्माययति। भयशब्देन
धात्वर्थसामान्यादिहस्मयतेरर्थोभिधीयतेनहिमुख्येभयेस्मयतेर्वृत्तिरस्ति॥ ॥सृजिदृशोर्झल्यमकिति॥ ॥
सृजविसर्गेदृशिरप्रेक्षणेअनयोर्धात्वोर्झलादावकितिप्रत्ययेपरतोऽमागमोभवति। स्रष्टास्रष्टुंस्रष्टव्यंद्रष्टा
द्रष्टुंद्रष्टव्यं। लघूपधगुणापवादोयममागमः। अस्राक्षीत्अद्राक्षीत्। सिचिवृद्धिरमिकृतेभवतिपूर्वंतुबाध्यते।
झलीतिकिंसर्जनंदर्शनं। अकितीतिकिंसृष्टःदृष्टः। धातोःस्वरूपग्रहणेतत्प्रत्ययेकार्यविज्ञानादिहनभवतिर
ज्जुसृड्भ्यांदेवदृग्भ्यामिति॥ ॥७॥ ॥

अकितीतिवचनात्प्राप्तेतस्मिन्नारंभात्। सिचिवृद्धिरमिकृतेभवतीतिसिचिवृद्धिस्तुभवमिनबाध्यतेयेननाप्राप्तभावात्साप्यमिकृ
तेभवतितस्यैवमाभ्यांपूर्वंतुबाध्यतइतिअमागमेननित्यत्वान्नस्यात्। रज्जुसृड्भ्यांदेवदृग्भ्यामिति। उभयत्रव्रश्चादिसूत्रेणषत्वेनश्चमिति रा॰म॰
केचित्। अन्येतुक्विन्प्रत्ययस्यकुरितिकुत्वमिच्छंति। ननुनक्विन्नंतावेतौकिंतर्हिक्विबंतौवैषदोषःयस्मात्क्विन्विहितस्तस्यप्रत्ययांत २२
रेकुत्वंभवतिक्विनःकुरितिवक्तव्येप्रत्ययग्रहणादितिवक्ष्यतेपदांतस्येत्यधिकारात्स्रष्टाद्रष्टेत्यत्रनभवतिकुत्वविधावेवतस्यनिर्णयं
वक्ष्यामः॥ ॥८॥ ॥

अनुदात्तस्य च॥ ॥उपदेशादिति वर्त्तत इति अनुदात्तस्य विशेषणार्थं तेन इह स्येत्यत्र लृनि विहिते यद्यपि नित्स्वरेण धातोरुदात्तत्वं भवति तथाप्यु
पदेशेऽनुदात्तत्वस्य भवति वर्द्स्यत्र तृचि कृते यद्यपि शेषनिघातेन धातुरनुदात्तो भवति तथाप्युपदेशे नायमनुदात्त इत्यम् न भवति॥ किमर्थं पु
नरनुदात्तस्येत्युच्यते नानिटस्येत्युच्यते एवं हि सति लघुसूत्रं भवति तत्राह तप प्रीणन इत्यादि। इडागमो रधादिभ्यश्चेत्यनेन विकल्पित इति
तम्रपाक्षिके योरागमयोस्तु योर्न स्यात् अथ पाक्षिक इडागमे तयोरपि स्यात् वर्द्ध्वर्द्धिमिसत्रापि स्यादिति भावः। यदि तर्हि तयोरथा

अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्॥ ॥उपदेश इति वर्त्तते झल्यमकितीति च उपदेशेऽनुदात्तस्य धातोः ऋकारो
पधस्य झलादावकिति प्रत्यये परतोऽन्यतरस्याममागमो भवति। त्रप्ता तर्प्ता तर्पिता। द्रप्ता दर्प्ता दर्पिता। तृप प्रीणने
दृप हर्षमोहनयोः। एतौ रधादिषु पठितौ उभयोरिडागमो रधादिभ्यश्चेति विकल्प्यते अनुदात्तोपदेशः पुनरम
र्थ एव। अनुदात्तस्येति किं वर्जिता वर्जितुम्। वृहू उद्यमने इत्ययं धातुरुदात्तोपदेशः ऊदित्वात्तस्येड्विकल्प्यते। ऋ
दुपधस्येति किं छेत्ता। झलीत्येव तर्पणं दर्पणम्। अकितीत्येव तृप्तः दृप्तः॥ ॥शीर्षंश्छन्दसि॥ ॥शीर्षन्निति शब्दा
न्तरं शिरः शब्देन समानार्थं छन्दसि विषये निपात्यते न पुनरयमादेशः शिरः शब्दस्य लोपि छन्दसि विषये तिष्ठाम
तेन पुनरयमादेशः शिरः शब्दस्य सोऽपि छन्दसि प्रयुज्यते। शीर्ष्णा हि तत्र सोमं क्रीतं हरन्ति। यत्ते शीर्ष्णो दौर्भाग्यम्

दिभ्यश्चेतीड्विकल्प्यते अनुदात्तोपदेशस्तर्हि किमर्थ इत्यत आह अनुदात्तोपदेशः पुनरमर्थ एवेति॥ ॥शीर्षंश्छन्दसि॥ ॥न पुनरय
मादेशः शिरः शब्दस्येति। यद्यपि सूत्रे शिरस इति स्थानी नोपात्तः तथापि समानार्थत्वादादेशो नाशङ्क्यते यथा शिवादिषु विश्रवण
रवणशब्दाभ्यां विश्रवः शब्दस्यादेशत्वशङ्का सोऽपि छन्दसि प्रयुज्यत इति आदेशपक्षे तु तेन निवर्त्तितत्वाच्छिरः शब्दो न प्रयुज्येतेति भा
वः। ननु वान्यतरस्यामित्यनुवृत्तेस्तस्यापि प्रयोगो भविष्यतीत्यत आह अत्रापि विकल्पानुवृत्तिः शङ्क्येतेति प्रकृतं तरपक्ष एवाश्रितः १२

टीका० ६।१ पेचतद्धिते ॥ ॥छंदसि एवेत्येवमिष्टमिति भाष्यार्थमिदं यदि एवं सूत्रवदिहापि शीर्षन्निति प्रकृत्यंतरं विज्ञायेत न लट् । यदा शिरः शब्दाध
२३ कारादिह विहित उत्पद्येतेत दा तस्य श्रवणं प्रसज्येतेति भिन्नत्वादस्यादेशोयमिष्यत इति । स कथमिति । स आदेशः कथं लभ्यते न कथंचित्सत्स्था
नितो नु पादाना त्सूर्वसूत्रवदिप्रश्नः । तन्निमित्तं अनुवर्णं शब्द तस्यार्थतश्चात र त्नमोप्रकृतिं शिरः शब्दमेवाश्रियमि । इत्येतस्यातीति सुपश्चा
त्मनः कत्वा वाकेशेष्विति सूत्रेणानिसेध्यावेषा विकल्पितः । अत्र शिरस्य शब्दस्य केशविषयत्वात्तत्प्रयोगे केशशब्देन प्रयोक्तव्यः ॥ शी

पेचतद्धिते ॥ ॥शीर्षन्निति वर्तते आदेशोयमिष्यते स कथं ये च तद्धिते इति परनिमित्तमुपादीयते सच तदनुरूपां प्र
कृतिं शिरः शब्दमाक्षिपति यकारादौ तद्धिते परतः शिरः शब्दस्य शीर्षन्नादेशो भवति । शीर्षण्यो हि मुख्यो भवति शी
र्षण्यः स्वरः शिरसि भवः शरीरावयवाद्यदिति यत् ये चाभावकर्मणोरिति प्रकृतिभावः तद्धित इति किं शिर इच्छति शिरस्य
ति । वा केशेषु शिरः शब्दस्य शीर्षन्नादेशो वक्तव्यः । शीर्षण्याः केशाः शिरस्याः केशाः । अचि शीर्षः अजादौ तद्धिते शि
रसः शीर्षादेशो भवति । हस्तिनि शिरसोपत्यं हास्तिशीर्षिः । स्थूलशीर्षिः । बाह्वादिभ्यश्चेति इञ् । स्थूलशिरस इदं स्थौलशी
र्षं । इति तस्मात्तु इष्यते च हास्तिशीर्ष्यतीति तत्कथं कर्तव्योत्र यत्नः अणीर्जंताद्वापरः प्रत्ययः प्रकृतिरापतत्यः तत्र यस्येति लो
पस्यस्थानिवद्भावाद्व्यवधानं ॥ ॥छ॥ ॥
र्षण्यशब्दस्तु समास्यवाचीति तत्प्रयोगे विशेषावगमाय केशशब्दः प्रयोक्तव्यः । शीर्ष भावेषु निति प्रकृतिभावः स्यादिति । अतो राम०
कारांतमादेशांतरं विहितमिति भावः । कर्तव्योत्र यत्न इति तत्रार्थयत्नः शीर्षादेशः संनिपातकृतः षडादेशस्तद्धितान्तस्य निमित्तं २३
न भवतीति । अणिञ्जंताद्वापर इति । अणिञोरनार्षयो रित्यादेशषष्ठ्यप्रहाणेन प्रत्यय यक्ष्यत्र अण् अशीयः आदेशष्यङ् एव वाप्यि
तायत्नः कर्तव्य इति वाशब्दार्थः ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥पद्दन्नोमास॥ ॥इहापि शस्प्रभृतिष्विति निमित्तोपादानादनुरूपाः प्रकृतयस्त्राक्षिप्यंते यदादयश्चादेशा विज्ञायंत इत्याह पाददंते
त्यादि। अत्र तन्त्रासन शब्दः पठ्यते आस्य शब्दस्तु पठितव्यः आस्योष्ठकस्यवर्त्तिकामभीकेत्रीवायां बद्धोऽपि कत्तन्त्रासनित्रास्योयत्नाम
मुं वर्तं हकसे सादेशास्योर्वा न्यपते आसनीति विभाषाद्धे। इयोरित्यल्लोपाभावपक्षे रूपं अपरे पुनरविशेषेणेच्छंती। नि। माषिनु

॥पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु॥ पाददंतनासिकामासहृदयनिशाअस
ज्यूषदोषयकृतशकृतउदकआस्यन इत्येतेषां शहानां शस्प्रभृतिषु प्रत्ययेषु परतः पद्दतनस्मास्हृतनिशअस
न्यूषन्दोषन्यकन्शकन्उदन्आसन इत्येते यथासंख्यमादेशा भवंति। पद्। निपदश्चतुरो जहि। पदा वर्त्तय गोदु
हं। दत्। पादतो धावतितस्यै। नस्। सूकरस्त्वा खनन्नसा। मास्। मासि त्वा पश्यामि चक्षुषा। हृत्। हृदा पूतेन मनसा। निश्।
अमावास्यायां निशि यजेत। असन्। असिक्तोऽस्नाव रोहति। यूषन्। या पात्राणि यूष्ण आसेचनानि। दोषन्। यत्ते दो
ष्णो दौर्भाग्यं। यकन्। यक्नोऽवद्यति। शकन्। शक्नोऽवद्यति। उदन्। उद्नो दिव्यस्य नो देहि। आसन्। आसनि। किं लभे मधूनि
। शस्प्रभृतिष्विति किं। पादौ ते प्रतियी ज्ञो नासिके ते हृदो। केचित्त्वत्र छन्दसीत्यनुवर्त्तयंति अपरे पुनरविशेषेणेच्छंति। तथा
हि भाषायामपि पदादयः प्रयुज्यंते। आयामक्षुद्रगात्रस्य पद्भ्यामुद्धर्त्तितस्य वा। आघ्राणेनोपसर्पंति वैनतेयमिवोरगा
इत्येवमादयः। अस्मिन्नस्मात्सिसेतरद्यनुवर्त्तयंति पादादयोपि प्रयुज्यंते। शस्प्रभृतिष्विति प्रकारार्थे शस्प्रभृतिषु इति
शलादेष्वपि सत्यापि दोषन्नादेशो भवति। पदादिषु मांसपृतनासानूनामुपसंख्यानं। मांसपृतनासानु इत्येतेषां स्थाने यथा
संख्यं मांस पृत् स्नु इत्येते आदेशा भवंति। मांस्पचन्या उखायाः। मांसपचन्या इति प्राप्ते। पृत्सु मर्त्यं। पृतनास्विति प्राप्ते। नतो

ख्वांदसमेवेतदिति स्थितं प्रकारार्थे प्रभृतिशब्द इति। अवस्थावाचिनि तु शसः परेष्वपि वचनेषु न स्यात्। दोषणीति प्रथमाद्विवचने दोः शब्द
स्य दोषन्नादेशोऽनादेशाभावः। मांस्पचन्या उखाया इति मांसस्य पचि युड्व्यञ्जोरिष्यते तलोपो वक्तव्यः तेन त्सु समंतरं २३ ॥ छ॥ ॥

॥ ४९

टीका·प०१ नस्यमिति हितार्थमनार्थवाशरीरावयवाघत। नस्त इति अपादाने चाहीयरुहोरिति तसिः। नः क्षुद इति त्नीया तत्पुरुषार्थेनेति समासः स
२४ प्तमीति योगविभागात् इति समेवकु व्रीहो विशेषणस्य राजदन्तादित्वात् परनिपातः स्यान्ये। पतिवर्णा नगर योर्वेति वक्तव्यमिति। तत्र हि विकल्पे
नवत्क एत्वं स्त्रीत्वान् नासिको वर्णा इतीयरि मुख्यादि पाठात् अः नासिकं नगरमिति संकाशादि पाठात् यः। राजन्य सांकाश्यकांपिल्य नासि
कदार्वाघाटनाम्नादि वृंतीति प्रतिपद स्वरविधाना स्वरे नास्ति विशेषः प्रस्तुतप्रस्तावे सत्य नासिकामित्यत्र यततोश्वा तद्र्प इत्युत्प
पदं तो राजन्यप्रसङ्गेनात्र मयपर्वपद प्रकृतिस्वरश्चेष्यते॥ ॥धात्वादेः॥ ॥सिंवती तिशेषुवादीनामिति नुमः। षोडन्निति षट्दं
तायस्येतिबहुव्रीहो वयसि दंतस्य दतृ षष उत्वं दत्तृदशधास्विति षष उत्वमुत्तरपदादेष्टुत्वं वोगीरुचामिति नुम हलङ्यादिसंयोगां
नस्त नासिकायायत्तस क्षुद्रेषु नासिकाशनस्य भावो वक्तव्यः यततस क्षुद्र इत्येतेषु परतः। यत नस्यं नस् नस्तः क्षु=
द्र नः क्षुद्रः। पतिवर्णे नगरयोर्वेति वक्तव्यं। नासिकं नगरं नस्यो वर्णाः नस्यं नगरं॥ ॥धात्वादेः षः सः॥ ॥धातोरा
देः षकारस्य सकारादेशो भवति। षह सहते। षिव सिवति। धातुग्रहणं किं षोडः षोडशः षंडः षडिकः। आदेरि
ति किं वर्षति लषति। आदेशप्रत्यययोरिति षत्वमवस्थार्थं षाद्यो धातवः केचिदुपदिष्टाः केपुनस्तेयेतथा
तल्लोपोक्तविन्तु षोड इति यद्यतेतत् नुषोऽतमाचष्ट इति णिचि कृते टिलोपे यणाधचि रूपं। षड्शश्चो मुत्स्त्रे प्रातिपदिकं। अनुकं
तः षडंगुलिः षडिकः बह्वचो मनुष्यनाम्न ष्ठज्वा ठाजादावूर्ध्वं द्वितीयादचः इति लुक्। वर्षतीति। षकारोपदेशस्तु प्रतिवर्षतीत्या
देशे विभाषा करणादावर्षांत उपदेश इति णत्वप्रतिषेधार्थः स्यात् लेषतु लेषु स्यादेशप्रत्यययोरिति षत्वार्थं। क्वचित्तु कषतीत्यपि
पद्यते तद् युक्तं षकारोपदेशसामर्थ्यादेवात्र न भविष्यति प्रतिकर्षतीत्यत्रापि करणादाविहं वणत्वप्रतिषेधः सिद्धः। आदेशादित्व
स्वाभ्यासलोपे न नस्तः चकर्षुः। किमर्थं पुनः षाद्यो धातव उपदिष्टाः नसादय एवोपदिश्येरन् एवं हि तेनस्त्वं तत्र कर्त्वं भवतिन श्
हादेशप्रत्यययोरित्यादि। अवस्थानियमः आदेशप्रत्यययोरिति सिहादीनामेव षत्वं यथा स्यात् सृपिसृजिप्रभृतीनां मा भूदित्येवमर्थं
षाद्यः केचिदुपदिष्टाः अन्यथा सहादीनां षत्वार्थं यत्नान्तरमास्थेयं तच्च गुरु भवतीति भावः। केपुनस्त इति याठे अंशं भवाप्यः। ये

राम० २४

अथ बालस्य रां क्रियत इति मंदधियोनुग्रहीतुमिति भावः अजंतस्य परा इति अजन्तं तौ वर्णौ येषां ते अजं तस्य परा परशब्दो व्यवस्थावाचीत्याजं
तयोः परत्वमव्यवधानेपि संहितापमानं संनिधानात्स्थानेपि संविज्ञायते। मिङ्गतीषडुसनेजि षिद्गागात्र प्रस्तरणे षुजसंगे जिषु
षष्ठये एतेसु रूपेणेव पर्यन्ते वपु इं तेव कारमकारयोरजन्तं सत्वात् द्वकारेपि केवले दंतस्थानं न भवति। खट् आ खाट् नइति खद्यिपिके
चित्यर्थे इति। सुपिसृजीत्यादि सस्तुनातो सजति सर्गो सृज अ आच्छादने स्नेषे शाह संवातयोः सेकतिर्गत्यर्थः सृगतावेतान्वर्जयित्वा येते
अजंतस्य परास्तेषोपदेशाः। सुब्यात्विस्यादिसुद्वान्तुः सजाद्यंतः ष्विवुनिरसनेषष्कतिर्गत्यर्थः अनुदात्तेत एषांसत्वस्य प्रतिषेधो वक्तव्यः।

अथ बालस्य रां क्रियते अजंतस्य पराः सादयः षोपदेशाः। स्मिङ् स्विदि स्वंजि स्वपयश्च सृपि सृजि स्तृ स्त्या सेक सृवर्जं।
सुब्धातु ष्ठिवु ष्वष्कतीनां प्रतिषेधो वक्तव्यः। षोडीयति। ष्ठीवति ष्वष्कते ष्ठिवु इत्येतस्य द्वितीयो वर्णस्थकार ष्ठकारश्च
ष्यते तेष्ठीव्यते ष्ठीव्यत इत्यभ्यासरूपं द्विधा भवति २५ ॥ ॥श्री॥ ॥श्री॥ ॥छ॥ ॥

सुब्धातूनां तावन्न वक्तव्यः। उपदेशा इति वर्तते न च सुब्धातवः कचिदुपदिश्यन्ते एवं च कृत्वा धात्वनुग्रहणं शक्यमकर्तुं उपदेशाभावादेव
षोडादेर्न भविष्यतीति तत्क्रियते धातोरित्यस्य निवृत्तिं सूचयितुं तेन लोपो व्योर्वलीति अविशेषेण भवति ष्ठीवतिष्वष्कत्योर्द्वितीयषकारको
तत्र पूर्वस्यास्तु सत्वं परेणापि निपातनेन षत्वं भविष्यतीति यद्येवं ष्वलिड्ष्वष्कते षत्वस्यासिद्धत्वात् उः सिवुरिति सिवुट् प्रसज्येत एवं तर्हि य
कारादीष्ठिवु ष्वष्कतीयकारस्य लोपो व्योर्वलीति लुप्यते ष्ठीवतीति ष्ठिवुक्लमुचमोशिनीति दीर्घत्वं अथा स्याद्वितीयो वर्णो यदि
ठकारः तेष्ठीयत इति न सिध्यति अथ थकारः टेष्ठीयत इति न सिध्यति उभयं चेष्यते तत आह ष्ठीवतेरभ्यासे साधि। उभयथा ह्याचार्येण
शिष्याः पाठिताः २५ ॥ ॥

द्॰का॰प॰१
२५

णोनः॥ ॥अणतीति।णोपदेशस्तु निरणाती स्यादावुपसर्गादसमासेपिणोपदेशस्येति णत्वार्थं स्यात।सुब्धातोरयमपि नेष्यते सर्ववदे
गानादयइतिप्रयोगे· वृत्तिनंदी स्यादिवृत्तौ गात्रविशेषेपुनादेसमृद्धौ नइगइशह्रेनश्चिन्नाशने। नरअव संदृते चुरादिः नाथनाधृणाज्ञे
पतापैश्वर्येषु॥ ॥लोपोव्योः॥ ॥धातोरितिप्रकृतमिस्यादिएतद्धात्वादेः षः सः इत्यत्रआरभ्यानंदिदिवानिति दिवेः ऋतो रूप
वत्सेकाजाद्युसामिति नियमादिडभावः अत्र वक्तव्य प्रत्तितद्युत्सेकाजाद्युसामिस्यत्रवक्ष्यामः वृणीजंतुसंताने ऋणोरुहे। अस्मेमा ॥

णोनः॥ ॥धात्वादेरितिवर्त्ततेधातोरादेर्णकारस्यनकारादेशोभवति।णीञ् नयति।णह नह्यति।धात्वादेरि
त्येव अणति।सुब्धातोरयमपि नेष्यते णकारमिच्छति णकारीयति उपसर्गादसमासेपिणोपदेशस्येति णत्व
विधेअंवस्थार्थं णादयोधातवः केचिदुपदिश्यंते केपुनस्ते येनथापद्यंते अथवालक्षणं क्रियते सर्वेनादयो णो
पदेशाइति नृनंदनदिनद्धिनक्कनाटिनाथनाधृवर्जं॥ ॥लोपोव्योर्वलि॥ ॥धातोरितियत्प्रकृतंतद्धात्वादेरि
तिपुनर्धातुग्रहणान्निवृत्तंतेनधातोरधातोश्च वकारयकारयोर्वलिपरतोलोपोभवति।दिवू।दिदिवान्।ऋ
पीडुतं।क्नूयीक्नूतं।गोधा।पाद्रकः।गोधेरः।पचेरन्।यजेरन्· वकारस्य।जीवेरदानुः।आरदानुः।स्रिवेः।अस्मेमा
णः।उणादयोबहुलमिति बहुलवचनादेव छ्वोः शूडनुनासिकेचेत्यूठ्न भवति।वलीति किं।रीयते।ऋण्यते।पू
र्वलोपग्रहणं वेरपृक्तलोपात्पूर्वं विलिलोपो यथा स्यात्॥ ॥

णामिति स्त्रिवु रामि शोषणयोः औणादिकोमनिनू नञासमासः। ननु च मतः कार्यिणः कार्येण भवितव्यमिति पूर्वकार्यिनिर्देशो पु
नः पश्चात्कार्यनिर्देशः व्योर्वलिलोपइति लाघवं च भवेत्सकृदुच्चारणात् किमर्थं पूर्वलोपग्रहणं कृतमित्यत आह पूर्वलोपग्रहण
मित्यादि पूर्वलोपग्रहणेनायमर्थः सूच्यते विभक्तिरान्तरंगमिवापि लोपोपि भवतीति कंडूयतेर्मलोपश्च प्राप्नोतिवेरपृक्तलोपश्चतत्रांत

[illegible] ॥

एम॰
२५

कंडूयतेः क्विबिति कंड्वादिभ्यो यगित्यत्र भाष्ये नैतेभ्यः क्विब् दृश्यत इत्युक्तं तस्मात्कंडूमिच्छतीति काम्यजंतात् क्विब् दृष्टव्यः। द्विविधा हि कंड्वादयो
धातवः प्रातिपदिकानि च तत्र धातुभ्यो यग्विधानात्प्रातिपदिकेभ्यः कंड्वादयो भवंत्येव तत्र क्यजंतात् क्विपि कृते अतो लोपश्च प्राप्नोति वे
रपृक्तलोपश्च तत्रांतरंगत्वात्पूर्वमपृक्तलोपे न भाव्यं अन्यथा ह्यार्द्धधातुक इति विषयसप्तम्याश्रयणात्पूर्वमतो लोपः यस्य त्वि एव
वमपि क्विलोपश्च प्राप्नोति यलोपश्च तत्र परत्वान्नित्यत्वाच्च पूर्वमपृक्तलोपस्य स्थानिवद्भावादूठ् कस्मान्न भवति उच्यते क्यजंतात् क्वि
पि कृते ततः क्विप स्थानिवद्भावेनापि कंडूमात्रस्य धातुत्वाभावादूठ् न भवति यणादेशस्तर्हि प्राप्नोति अस्तु यणात्तस्योठ् करिष्यते तेन बोध्य
पि कर्त्तव्यस्य स्थानिवद्भावः आदिष्टाद्वचः पूर्वत्वादिकारस्य अत एव कंडूवाविमा दावुवङादिषु कर्त्तव्येषु नास्य लोपस्य स्थानिवद्भावः
अथ व्रश्चको व्रश्चनमित्यादौ रेफे वलि परतो वकारस्य लोपः कस्मान्न भवति तत्राह व्रश्चादीनामित्यादि। ननु वृश्चति वव्रश्चेत्यादौ संप्र

॥ कंडूयतेः क्विप् कंडूः॥ लोलूयतेर्लोलः॥ व्रश्चादीनामुपदेशसामर्थ्याद्वलि लोपो न भवति। वृश्चति व
व्रश्चेत्यत्रापि संप्रसारणे हलादिशेषयोर्बहिरंगत्वात्प्राप्नोति॥ २५ ॥ ॥श्री४॥ ॥४॥ ॥

सारणे कृते हलादिशेषे च वकारस्य अवर्णोपधात्वादित्येतदुपदेशस्य प्रयोजनं स्यात् न ह्यत्र लोपः प्रवर्त्तते वलपरत्वाभावादित्यत आ
ह वृश्चति वव्रश्चेत्यादावपीत्यादि। बहिरंगत्वादिति बहिरंगत्वं संप्रसारणस्य क्ङित्प्रत्ययापेक्षत्वात् हलादिशेषस्य त्वभ्यासापेक्ष
त्वात्तत्र वा कृतयोरेव तयोर्वलोपः प्राप्नोत्युपदेशसामर्थ्यादेव न भवति। अत्र भाष्ये वलोपः प्रत्याख्यातः अग्नीमाराजीत्यामुरित्य
त्र लुंदसो वर्णलोपः क्वसावपि छांदस एव दिदिविप्रभृतीनां यङ् लुगंतानां तस्मादिष्टं दाभवि तर्व्यानि प्रतिपोरीङभावपक्षे ऊठाभवि
तव्यं येतत्र क्ङितीति नानुवर्त्तयंति दीदिवीति दीधीति देदिवीषि देधीषि मिमिपित्वनुनासिकत्वादेव भवति देदिवीमि देधीमि। ये त्वनुव
र्त्तयंति तेषामपि छांदसो पक्षुगिति ॥ २५ ॥ ॥

ईकी·प·१ वेरपृक्तस्य॥ ॥क्विबादयोगस्यांतइतिततोन्यस्यवेरपृक्तस्याभावात् घृतस्पृगितिक्विन्प्रत्ययस्यकुः अपृक्तग्रहणादिकारमात्रस्येदंग्रहणंउ
२६ कारउच्चारणार्थः॥ ॥हल्ङ्याब्भ्यः॥ ॥दीर्घग्रहणंसंभवव्यभिचाराभ्यांङ्याब्भ्यामेवविशेषणंङ्याब्ग्रहणंचसौविशेषणंहलपृक्तग्र

वेरपृक्तस्य॥ ॥लोपइतिवर्त्ततेवेरितिक्विबादयोविशेषाकारानतुबंधानुच्चारणसामान्येनग्रहणंतेनवेरपृक्तस्यलोपो
भवति· ब्रह्मभ्रूणवृत्रेषुक्विप्· ब्रह्महा· भ्रूणहा· स्पृशोऽनुदके क्विन्· घृतस्पृक्· तैलस्पृक्· भजोण्विः। अर्द्धभा
क्· पादभाक् तृतीयभाक्· अपृक्तस्येतिकिम् दर्व्यावि ना। दर्विः। कृगृशृदृभ्यो वः जागृभिः क्विः॥ जागृविः॥ ६६॥
हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तं हल्॥ ॥लोपइतिवर्त्ततेतावदिदनोविकार्थेनार्थवत्वंप्रसाधनं दृष्टव्यं। लुप्यत
इतिलोपः हलंतात् आबंतात् दीर्घाच्चपरं सुतिसि इत्यपृक्तं हल्लुप्यते। हलंतात्सुलोपः तक्षाराजा। उखास्रत्
पर्णध्वत्। ङ्यंतात्। कुमारीगौरीशार्ङ्गरवी। आबंतात्। खट्वाबहुराजाबहुकरीषगंध्या हलंतादेवतिलोपः सि
लोपश्चतत्रतिलोपस्तावत् अबिभर्भवान्। भजोलङि तिपि श्लौ भृञामिदित्यभ्यासस्येत्वं। अजागर्भवान्। सिलो

हणांचतिस्योः सुतिसीतित्रीणिपदानि। तदिहेसादिप्रकृतस्यलोपशङ्कसशास्त्रीयस्यभावसाधनस्यसुतिसीतिप्रथमान्तेनसंबन्धा राम०
भावादितिभावः अपरआह हल्ङ्याब्भ्यइतिपंचम्या सुतिसीत्यादिकायाः प्रथमायाः षष्ठ्याम्प्रकल्पितायां शास्त्रीयेपि लोपशङ्कैन २६
दोषइति॥ ॥४॥ ॥७॥ ॥

अछिनोत्रे ति छिदेर्लङि सिलोपः दश्चेति दकारस्य रुत्वं तस्यापि तोरोरप्लुतादप्लुत इत्युत्वं अभो कार्येणाहुण्याः एङः पदांतादति। निष्कौ
शांबिरिति ननु च प्रत्ययग्रहणाण्यीभाषयातदादिग्रहणादेवात्र न भविष्यति ग्रहणपि तर्हि न स्यात् परमकुमारीपरमखट्वेति स्त्रीप्रत्यये वा
नुपसर्जनेनेति तदादिनियमाभावाद्भविष्यति निष्कौशांबिरित्यादौ तूपसर्जनस्त्रीप्रत्ययस्य भवत्येव तदादिनियमः एवं तर्हि तद्धप
यसुपसर्जने स्त्रीप्रत्यये तदादिनियमोत्र न भवतीति तोर्ङीपि प्रत्य अङीपि पलीत्यादावेकविभक्तिचेत्युपसर्जनत्वे सत्यपि
लोपो भवति नात्रोपसर्जनं पिप्पलीएकविभक्तावषष्ठ्यंतवचनमिति वचनात्र तएवगोस्त्रियो रुपसर्जनस्येति ह्रस्वत्वं न भव

॥ अभिनोत्र अछिनोत्र। हल्ङ्याब्भ्य इति किं ग्रामणीः सेनानी॥ दीर्घादिति किं निष्कौशांबिः अतिखट्वः।
सुतिसी ति किं अभैत्सीत् तिपा सह चरितस्य ग्रहणान्नु सिचो ग्रहणं नास्ति। अपृक्तमिति किं बिभर्त्ति भिनत्ति
छिनत्ति। हलिति किं बिभेद चिच्छेद २६ ॥श्री४॥ ॥

तिमाप्रत्याख्या स्त्रीयमुपसर्जनमप्रधानं तावत्र यस्य वक्ताः श्रेयस्योस वहुश्रेयसीति शास्त्रीयमप्युपसर्जनत्वमास्ति ईयसश्चेति कपः प्र
तिषेधः ईयसो बहुव्रीहौ प्रतिषेधो वक्तव्य इति ह्रस्वाभावः॥ अपर आह निष्कौशांबिरित्यादौ समुदायस्य ङ्यावंतत्वेपि यदत्र ङ्या
वंतं कौशांब्यादि ततः परस्य सोर्लोपः प्राप्नोति दीर्घग्रहणसामर्थ्यात्तं इति। ननु च विहितविशेषणं विज्ञास्यते ङ्यावंताद्विहितस्येति ने
वं शक्यं सा केत्यादौ न स्यात् न ह्यत्र टावंताद्विहितः मात्र वेरहलं ताद्धिहितस्येत्येवं भविष्यति यद्येवमस्य कः अत्रापि स्यात्
कन्नहितं त्यादौ च न स्यात् न ह्यत्र हलंतान्न विहितं इति आनो समर्थात् पि विहितस्य हल्ङ्याब्भ्यो नंतरस्य लोप इत्यार्थयं एवं च निष्कौ
शांब्यादावपि लोपः प्राप्नो दीर्घग्रहणेन मावर्त्यनीयः॥ तिपा सह चरितस्येति। तिप्तस्झीति इहेन सह चर्यात्तेर पिति अ एवग्रहणासि
मर्थः २६ ॥ ॥

ईकान्प॰१
२७

अथ किमर्थमित्यादि इग्यणोरिदीर्घात्सुस्तिस्येतावदेव वक्तव्यमिति बोधार्थः। नलोपो न स्यादिति। ननु च न ङि संबुद्ध्योरिति ज्ञापकान्न
लोपे कर्तव्ये संयोगांतलोपः सिद्ध एव भविष्यति न पचन्नित्यादाविव पिघसंगात न कारसंबुद्धौ रनित येप्रतिषेधो विज्ञायमानस्तुल्य
जातीयेन कारविभक्तौ एनंतर्यएव संयोगांतलोपस्यासिद्धत्वं ज्ञापयति पचन्नित्यादौ तु तकारेणाव्यवहितत्वात् ज्ञापकाभावाल्लोपा
भावः स्यादिर्श्च कदेशोपांत स्याह उरवास्त्रत पर्णाध्वदिति दत्वं न स्यादित्यनुषंगः। उस्त्रास्त्रस्रस्रत्यादिति संयोगांतलोपमपवादत्वाद्बा
धित्वा स्कोः संयोगाद्योरिति प्रवृत्ति सकारस्य लोपे प्रथमायाः सकारो न वस्यादिसंबंधीति वसुस्रंस्विति दत्वं न स्यात न च संयोगादि
लोपं बाधित्वा पूर्वमेव प्रवृत्ति सकारस्य दत्वं लभ्यते अपदांतत्वात् नहि सो प्रथमायाः पूर्वस्य पदसंज्ञास्ति असर्वनामस्थान इति

अथ किमर्थं हलंतात्सुतिसीति लोपो विधीयते संयोगांतलोपेनैव सिद्धं न सिध्यति एजाते श्वेतत्र संयोगां
तलोपस्यासिद्धत्वान्नलोपो न स्यात् उखास्रत पर्णाध्वदित्यत्र दत्वं न स्यात् अविभ्भंवानित्यत्र तु रात्सस्ये
ति नियमाल्लोप एव न स्यात्॥ ॥छ॥ ॥छ॥ ॥

प्रतिषेधात् अथापिसावपि पदत्वमिति पक्षाश्रयेण स्यात् दत्वं एवमपि दत्वस्यासिद्धत्वात्पूर्वं संयोगादिलोप एव स्यात् ननु
च वस्वादीनां दत्वं सोर्दीर्घत्वे सिद्धमिति वक्ष्यति तत्र सोर्दीर्घग्रहणं न करिष्यते वस्वादीनां दत्वमित्येव तत्र पूर्वमेव दत्वं भविष्यति
एवमपि एजाते त्स्यादौ सावपि पदत्वे सति संयोगांतलोपस्यासिद्धत्वात्पूर्वं न लोपे सति असंयोगांतत्वात्तो लोपो न स्यात्तस्मा
त्सुष्ठूक्तं दत्वं न स्यादिति। उत्वमिति न स्यादित्यनुषंगः स एव हेतुः संयोगांतलोपस्यासिद्धत्वादिति। एतत्त्व संयोगांतलोपेन
त्वासिद्धो वक्तव्यस्तेन दनाश्रिसो त्कृंतदाश्रयणे तु हरिवो मेदिनमित्यादि वसिद्धं। रात्सस्येति नियमाल्लोप एव न स्यादिति। ननु रा
त्सस्येति द्वितकारकनिर्देशात् न कारस्यापि प्रश्लेषाद्रेफात्परस्य वकारस्यापि लोपो विधास्यते यथैवं कीर्त्यते:। चिकीर्तिस्या

राम॰
२७

तपथाम्नासेतु कीर्दिति भवतित ह्वेवं सियहणामेकेनक
र्तेमं अमत्सर्वं कर्तेममिति स्थितं॥ ॥ ॥

।संयोगांतस्यलोपेहीत्यादिः संग्रहश्लोकः दिशाञ्छेहेतौनलोपाईत्यादि शाङ्गेनदत्तोत्वयोर्ग्रहणंयेतुसंयोगांतलोपवादिनस्तेषांरेफादुत्तरस्य
सकारस्याविभर्भवानित्यत्रनैवलोपः स्यात्तस्माद्धलउत्तरेषांसुतिसीनांलोपोविधीयते॥ ॥एङ्ह्रस्वात्॥ ॥अत्रयदिहल्ग्रहणंनानुव
र्त्ततेतदाएङ्ह्रस्वाभ्यांसंबुद्धिरेवविशेषणीयाएङं ताद्ध्रस्वांताच्चपरस्याः संबुद्धेर्लोपइतितदाहेकुंडेत्यत्रनस्यात्कथंकुंडमुइतिस्थितेलोपश्च
प्राप्नोत्यमभावश्चतत्रलोपः शब्दांतरप्राप्त्यानित्यः सहिकृतेमभावेप्यादेः परस्येत्यमोकारस्यप्राप्नोतिअकृतेतुसकारस्यअमभाव स्तुलोपेकृ
तेऽसंतापाप्त्याअनित्यइत्युभयोरनित्ययोः परत्वादमभावेकृतेऽमिपूर्वश्चप्राप्नोतिलोपश्चतत्रामिपूर्वत्वेकृतेप्यपवर्गाभावादुभयतथा
आश्रयेंताच्छिवद्धावाभावाच्चलोपोनप्राप्नोतिलोपेचकृतेमोभावादमिपूर्वत्वंनप्राप्नोतीत्युभयोरनित्ययोः परत्वादमिपूर्वत्वेकृतेलोपोनस्यात्

संयोगांतस्यलोपेहिनलोपादिनसिध्यति।एतुतेनैवलोपः स्याद्धलस्तस्माद्विधायते॥ ॥एङ्ह्रस्वात्संबुद्धेः॥
॥लोपइतिवर्त्ततेहलितिचअएङकमितिनाधिक्रियतेतथाचपूर्वसूत्रेहिपुनरएङग्रहणंकृतंएङं ताद्ध्रस्वांता
च्चपरोहल्लुप्यतेसचेत्संबुद्धेर्भवति २७ ॥श्रीराम॥ ॥

तस्मादनुवर्त्तंहल्ग्रहणंनह्याहहलिचेति।वर्त्ततइत्यये सतोअएङकमितिनाधिक्रियतइतियद्यधिक्रियेतहेकुंडेत्यत्रनस्यात्अएङसंज्ञा
याअभावात्कथंपुनर्ज्ञायितेनायमधिक्रियतइतितत्राहतथाचेतिअनुवर्त्तमानेपिहल्ग्रहणेयद्येङ्ह्रस्वाभ्यांसंबुद्धिर्विशेष्येततथाहले
विशेष्येतएङं ताद्ध्रस्वांताच्चपराणासंबुद्धिस्तस्याहल्लुप्यतेइतिततः हेकुंडेत्यत्रनस्यात्शब्दांतादेवहेतोः अतएङ्ह्रस्वाभ्यांसंबुद्ध्याचहलेव
विशेषणीयइतिमत्वाहएङं तात्प्रातिपदिकादित्यादि।संबुद्ध्याक्षिप्तंप्रातिपदिकमेङ्ह्रस्वाभ्यांविशेष्यतइतितदंतेदविधिलाभः अत्रपक्षेकुं
डेत्यत्रामिपूर्वत्वस्यपूर्वप्रत्यंतवत्वात्ह्रस्वांतात्परोहलभवतिवसुतश्चसंबुद्धेरितिलोपः सिध्यति २७ ॥ ॥छ॥ ॥छ॥ ॥

टि.का. प०१
२८

अच्छइत्यति एतच्चत्तत्रैव व्याख्यास्यते। ह्रस्वाभावादितिननुवा दएवाकारोह्रस्वस्ततः परोहल्भवति संबुद्धेश्चसंबंधी। तेलोपः स्यादेवसंबुद्धौ
तु विशेष्यमाणायांप्रकृतसकारस्य लोपेह्रस्वात्परासंबुद्धिर्नभवतीति लोपाप्रसंगः। उच्यते संबुध्याक्षिप्तंप्रातिपदिकमेङ्ह्रस्वाभ्यांविशेष्य
तइत्युक्तंतेनकुंडेभ्य इत्यत्र भविष्यति एकादेशस्य पूर्वप्रत्यंतवद्भावात्तप्रकृतिग्रहणेनग्रहणात्हेकतरदित्यत्रचन भविष्यति टिलोपे कृतेर
ह्रस्वांतत्वात्। संबुद्धिगुणाबलीयस्त्वादिति। अन्यथाग्नि उइति संबुद्धिगुणश्च प्राप्नोति ह्रस्वादितिलोपश्च तत्र नित्यत्वात्परत्वाच्च संबु
द्धिगुणेकृते ह्रस्वांतत्वान्न भवेत्। ननु च विहितविशेषणं विज्ञास्यते ह्रस्वांताद्विहितायासंबुद्धिरिति एवमपि हेखट्वेत्यत्र न स्यात् या
भ्दनेनाबंतत्वात्सर्वेणाभविष्यति एवमपि हेलक्ष्मि हेयवागु हेकुमारीत्यत्र नस्यात् नचात्रङ्यंतत्वाल्लोपोलभ्यते दीर्घग्रहणात् एवं त

। एङंतात् हेअग्ने हेवायो ह्रस्वांतात् हेदेवदत्त हेनदि हेवधु हेकुंड कुंडशब्दाद्दतोमितिअम् अमिपूर्वइति च पूर्वत्वे कृ
तेहल्मात्रस्यमकारस्यलोपः हेकतरदित्यत्राड्डिद्दच्छतुः तत्र टिलोपे सति ह्रस्वाभावान्नास्ति संबुद्धिलोपः एङ्ग्रह
णं क्रियते संबुद्धिगुणाबलीयस्त्वात्॥ ॥

पूर्वं यदि विज्ञास्यते विहितविशेषणं परविशेषणं परविशेषणं च तेनाग्नेकुमारीत्यादौ सर्वत्र भविष्यति तत्र सकृच्छ्रुतस्य ह्रस्वग्रहणस्योभयवि
शेषणत्वमेव तावद्दुर्लभं। अथापि लभ्येत एवमपि हेकतरदित्यत्र यद्यपि टिलोपे कृते ह्रस्वपरत्वाभावस्तथापि ह्रस्वांताद्विहितासंबुद्धिरि
तिस्यादेव लोपस्तस्मादेङ्ग्रहणं कर्त्तव्यं। वयंतु ब्रूमः स्वभावत एङः तस्मात्पृथगप्येङ्ग्रहणं कर्त्तव्यमिति तद्यथा हेशब्दमपि क्रांतो
व्याह्वाणोति हेस्त्रस्य संबोधनं हे। अतिहे अनुकृतो विचतेरहोपेन तस्य संबोधनं हे तु कृतविचते विहितरि प्रत्ययोपेन सन्निहितेरः पा राम०
णिनित्यस्य संबोधनं हे विहितेरेइत्यादि॥ अत्र संग्रहश्लोकः। संबुद्धिह्रस्वमेवायद्विहितं च भवेन्नादिवच्चोतवत्स्यादोषो सोहल्नित्व २८
त्वावपि लुप्यपि हिपतो मपूर्वं ह्येपपरत्वात्। ह्रस्वांतान्नु विधिः स्याद्धल इति कतरद्यस्यते नो हल्लोऽलुप् ह्रस्वश्रुत्यानश्चाकः परविहितविधि
नीतिहेतोष्यकार्येङ्। लोपनं लुप्लोपरत्सर्थः॥ ॥

।शेश्छन्दसि बहुलं॥ ॥याक्षेत्रेति शेर्लोपे कृते प्रत्ययलक्षणेन नपुंसकस्य झलच इति नुम् सर्वनामस्थाने चेति दीर्घः नलोपः। अयं योगः
शक्योऽवक्तुं कथं शाकेनेति सिद्धत्वात् अग्नेर्गौ तेत्रिरिति स्थिते प्रथमयोः पूर्वसवर्णदीर्घत्वेनैव सिद्धं नहि अतिनुमाश्ववृद्धित्वात् छन्दसि
नपुंसकस्य पुंवद्भावो वक्तव्यः मधोर्गृह्णाणि त्येव माधवश्चपुंवद्भावेनैव नमो॥ नेहत्रिः एवमपि जसि चेति गुणः प्राप्नोति वसस्येत तजस्य सा
दिषु छन्दसि वा वचनं प्राङ्णौ चस्य पधाथा रति अपि च या हेत्रा नानापिंडनामिति तद् इति स्थिते सुपां सुलुगिति आकारस्याकारे कृते प्रथ
मयोः पूर्वसवर्ण इति दीर्घत्वेन सिद्धं॥ ॥ह्रस्वस्य॥ ॥कृताधानुराक्षिप्यते स च ह्रस्वेन विशेष्यते तेन तदन्तविधिर्भवति स्याह ह्र
स्वान्तस्य धातोरिति। अग्निचित् सोमसुदिति। अग्नौ चेः सोमे सुञ इति क्विप्। ग्रामणिकुलमपि ति अस्तं चेन्नपुंसकह्रस्वत्वे बहिरङ्गा समा

॥शेश्छन्दसि बहुलं॥ ॥शेरुत्येतस्य छन्दसि विषये बहुलं लोपो भवति। याक्षेत्रा। यावना। यानि क्षेत्राणि। यानि व
नानि। ॥ह्रस्वस्य पिति कृति तुक्॥ ॥पिति कृति परतो ह्रस्वान्तस्य धातोस्तुगागमो भवति। अग्निचित्। सोमसुत्।
प्रकृत्य प्रहृत्य। ह्रस्वस्येति किं ग्रामणीः। आलूय मलूय। पितीति किं कृतः हृतः। कृतीति किं पटुतरः पटुतमः। ग्राम
णिकुलमिति ह्रस्वस्य बहिरङ्गस्यासिद्धत्वात्तुग् न भवति २८ ॥ ॥

सेत्विको ह्रस्वो द्वयोगालवस्येति ह्रस्वः अत्र नपुंसकह्रस्वसमर्थापेक्षत्वाद् बहिरङ्गमित्यन्तरङ्गपदाद्ये सत्त्वात् यदि पुनरयं तुक् पदादि
क्रियते नैवं शाकं गृहाग्निचित्सोमसुत् चेर एकस्येति वलोपो न प्राप्नोति इह च परितनोनीति क्विपि कोचगमादीनामिति नुनासिक
लोपः नहि हृतीत्यादि नारीर्विः परीतत तु आर्धधातुकमकृत्वादि इति प्रसङ्गः इह चाव च्छायाद्वान्यस्य संयोगादेरित्येत्वं प्रसज्येन अथा
भक्तः स्यात् मधुच्छादयतीति तुङ् तिङ् इति निवानेन न प्राप्नोति नकारेणाव्यवधानात् न च तकार एवानि इङ् अयद्रत्वाज्जनस्यात्
वेति एवकर्त्तव्या। यद्येवं नपुंसकह्रस्वत्वं उपसर्जनह्रस्वत्वं द्विगुस्वरश्च न सिध्यति नपुंसकह्रस्वत्वं ग्रामणिकुलं छत्रं धानाशष्कु
लिच्छत्रं उपसर्जनह्रस्वत्वं निष्कौशाम्बिच्छत्रं द्विगुस्वरः पंचारत्निछत्रं तु किं कृतेन न प्सकादेते विधयो न प्राप्नुवन्ति न वा बहिरंगलक्षण

लात् बहिरंगस्तुक् छकारान्तसंनिपातापेक्षत्वात् अन्तरंगा एते विधयः प्रागेव तत्संनिधानाद् विध्यन्ति २८

टीका·पृ०१
२९
संहितायामिति विषयसप्तमीयं कार्यिनिमित्तयोः संहितायां विषयभूतायां वक्ष्यमाणं कार्यं भवतीत्यर्थः। वक्ष्यति इको यणचीति। अनन्तरं
तु विषिमतिक्रामतोभिप्रायो। मध्व्यः। दधि अत्रेति ननु चैवं इको यणचीत्यधिकरणसप्तम्येषा तत्राधिकरणमोयत्रैको विकारस्य दृष्टोपि न संभवति
तत्राद्युपश्लिष्टस्यैको विधीयमानोयण् वर्णान्तरव्यवाये कालव्यवाये च न भविष्यतीति नार्थः संहिताधिकारेण। ज्ञापनार्थं तु एतद्वा यय
तिकालव्यवायोपि दिष्टपरिभाषायां नाश्रीयत इति तेनोत्तरपदाधिकारेपि विधीयमानं कार्यमनुगादिकालव्यवधानेपि भवत्येव आरब
रेफ इति आखरेफ्यः अभ्राविल्लस्तश्याविल्ल इत्यादि॥ ॥छे च॥ ॥तुकौकार उच्चारणार्थः। विदिभिदिच्छिदेः भिन्नच्छिन्नच्छिद्रश्च

संहितायां॥ ॥अधिकारोयं अनुदात्तं पदमेकवर्जमिति यावत् प्रागेतस्मादित उत्तरं यद्वक्ष्यामः संहितायामित्ये
वंतद्वेदितव्यं वक्ष्यति इको यणचि दध्यत्र मध्वत्र संहितायामिति किं दधि अत्र मधु अत्र॥ ॥छे च॥ ॥ह्रस्वस्य तु
गिति वर्त्तते तुककारे यरतः संहितायां विषये ह्रस्वस्य तुगागमो भवति॥ इच्छति गच्छति। ह्रस्व एकात्राग्रामानतदंतः ते
न चिच्छिदतुः चिच्छिदुरित्यत्र तुगभ्यासग्रहणेन न गृह्यत इति हलादिशेषेण न निवर्त्यते॥ ॥श्री४॥ ॥

छेरत्मतस्यामित्यादि निर्दिश्यते॥ अधिकारे द्वौ पक्षौ अर्थाधिकारः शब्दाधिकार इति तत्राद्ये पक्षे एकस्मिन् सूत्रे कृतार्थत्वात् ह्रस्वे
न विशेषणान्तदन्तं ह्रस्वशब्देन प्रत्यापितमिति इह आपितं तस्यैव ग्रहणं स्यात् शब्दाधिकारे तु ह्रस्वशब्द एकमात्रानुवर्त्तते न पूर्वप्रकृतोर्थः एम०
न चेह किंचिद्विशेष्यमस्तीति तदंतविधिभावाद्ध्रस्व एकागमो भवतीति इह द्वितीयः पक्ष आश्रित इत्याह ह्रस्व एकात्रागमीति किमे २९
वं सति सिद्धं भवति तत्रा हलेनेति। यदि तु ह्रस्वान्तस्य तुक् स्यात् ततोभ्यासग्रहणेन ग्रहणाद्धलादिशेषेण निवृत्तिः स्यात् ह्रस्वमात्र
लागमित्वे नायमभ्यासस्यावयवो हलिति न भवत्येष प्रसंगः। कथं न ह्रस्वस्यागमित्वे तु अभ्यासग्रहणेन न गृह्यत इत्यत आह॥ ॥

नावयवावयवइति। इतिकरणोहेतौ। यथवयवावयवस्यमुदायावयवोनभवतिए वंतहिशिरस्तस्यत्रहडागमः सार्वधातुकावयवस्यादादेशस्यावयव
इतिमेपिसार्वधातुकस्यसमुदायस्यावयवोमस्यानतत्कोदोषः शीङः सार्वधातुकेगुणइतिगुणोनस्यात् रुठामवधानात सस्यावयवभक्तस्त
येवनभवत्ध्यात्सार्वधातुकंतुच्यवदधात्येवकुतश्चैषन्यायोपदवयवावयवः समुदायावयवोनभवतीतिलोकेनावदेवदत्तावयवस्यहस्त
स्यावयवोंगुलिर्देवदत्तस्यापअवयवोभवत्येचसंगुलिर्देवदत्तस्याप्यवयवोभवत्येवसंगुलिर्देवदत्तइति। तस्मादयमत्राभिप्रायः छेआङ्माङोश्चेत
कस्ययोगः कर्त्तव्यः चकारएतनंतरयच्छतस्यचएवंमिहूयेयोगविभागंचकारंचकरोतितस्येतत्प्रयोजनंप्रकृतस्यतदंतस्यग्रहणेनकेवलंक्व

नावयवावयवः समुदायावयवोभवतीति॥ ॥आङ् माङोश्च॥ ॥तुगित्यनुवर्त्तते॰ छइतिच॰ आङोङि॰ तईषदादिषु
वतुर्ष्वर्थेषुवर्त्तमानस्यमाङःश्चप्रतिषिधवचनस्यछकारेपरतः तुगागमोभवति। पदांताद्वेतिविकल्पंवसतितद्वाधनार्थम
नत् ईषदर्थेआच्छायाईषिच्छायाक्रियायोगेआच्छादयतिमर्यादाभिविध्योः आच्छायायाः आच्छायो। माङः खल्वपि
माच्छेत्सीत्माच्छिदत्। ङि॰ द्विशिष्टग्रहणंकिंआच्छायाआच्छायाप्रमाच्छंदःप्रमाच्छंदः २९ ॥ ॥श्री७॥

स्वेमकानुवर्त्तयिष्यामीतियदित्वागतस्तुकसमुदायस्यावयवः स्यात् एषयत्नोनर्थकः स्यादिति॥ ॥आङ् माङोश्च॥ ॥आङ्मा
ङोर्ङि॰ द्विशिष्टयोर्ग्रहणं यादातेप्रयोजनमाह आङोङि॰ तइति। अर्थंविशेषसंपादनार्थेङि॰ द्विशिष्टयोर्ग्रहणमित्यर्थः आच्छा
यायाइतिआङ् मर्यादावचनइतिकर्मप्रवचनीयसंज्ञापंचम्यआङ् परिभिरितिपंचमी। आच्छायमितिआङ् मर्यादाभिविध्योरित्य
व्ययीभावः। माच्छिददितिइरितोवेत्यङ् आच्छायाआच्छायेतिस्मरणेवात्राकारः वाक्यस्मरणयोरङित्। प्रमेतिप्रपूर्वीन्माङ् आतश्चो
पसर्गइत्यङ्। अत्रधातोर्ङि॰ त्वेविदांवतोनङि॰ तग्रमाङ्ग्रहणेपविशेषइतिलाक्षणिकस्याप्यस्यग्रसंगः अत्रोभयत्रापिपदांता
द्वेतिविकल्पएवभवति २९ ॥ ॥

टीका॰ प॰ १ दीर्घात्॥ ॥उभयनिर्देशे पंचमीनिर्देशो बलीयान् अवधिरितार्था च पंचमी तेन दीर्घादिति पंचम्यास्तु इत्यस्य सप्तम्याः षष्ठ्यां प्रकल्पितायां छका
३० रस्यैव तुका भवितव्यमिति प्राप्ते प्रयाकरोति दीर्घात्परो य इति। अनेन पंचम्या अन्वयो दर्शितः प्रक्रमाभेदाय तु छकारस्य निमित्तत्वं दीर्घ
स्य च कार्यित्वं दर्शयति तस्मिन्पूर्वस्य तस्यैव दीर्घस्येति। अत्र च लिंगं शाच्छाविभाषा सेनासुराच्छायेति निर्देशः। अव अवधिमद्भावस्य

दीर्घात्॥ ॥छे तु गिति वर्तते दीर्घात्परो यश्छकारः तस्मिन्पूर्वस्य तस्यैव दीर्घस्य तुगागमो भवति। ह्रीच्छति
म्लेच्छति अपवाच्छायते विवाच्छायते॥ ॥पदांताद्वा॥ ॥दीर्घाच्छे तु गिति च वर्तते पदांताद्दीर्घात्परो यः छ
कारः तस्मिन्पूर्वस्य तस्यैव दीर्घस्य पूर्वेणानित्ये प्राप्ते वा तुगागमो भवति कुटीच्छाया कुटीछाया कुवलीच्छाया कुव
लीछाया। विश्वजनादीनां छंदसि वा तुगागमो वक्तव्यः विश्वजनच्छत्रं विश्वजनछत्रं। नच्छायां कुरवो परां नछायां
कुरवो परां॥ ॥श्री४॥ ॥

विवक्षितत्वादधिकरणाभावस्य च विवक्षितत्वात्तस्मिन्पूर्वस्येति सप्तमी कृता ह्रीच्छतीति ह्री लज्जायां म्लेछ अव्यक्ते शब्दे। अपवाच्छा
यत इति छो छेदने यङ् दीर्घीकृतः॥ ॥पदांताद्वा॥ ॥प्रकृतेन दीर्घग्रहणपदविशेषणाद्व तदंतविधौ सिद्धे तद्ग्रहणं पदांतविधिरयं तु राम॰
कृपथा स्यात्पदविधिर्मा भूदिति तेन तिष्ठतु कुमारीछत्रं खट्वा सस्ते सत्रापि विकल्पो भवति॥ ॥७॥ ॥४॥ ॥७॥ ॥ ३०

॥इकोयणचि॥ ॥इकोयणादेशोभवतीति। इकांयणांच सामान्याद्यथासंख्यंभवति। ग्रांतयेतोवाभवस्याइकउति। किंमंजनस्यमाभूत्। वाग्यात्र
कुलजश्चवत्रं योरसिद्धत्वाच्चकारस्यपकारः प्राप्नोतियत्रचकुलादेरप्रसंगोपदांतेयवल्लिनित्तत्रापिप्रसंगः। नैषदोषः दीर्घादितिवर्त्तते
तत्रतत्रैवपंचमीनिर्देशोपिस्यान्निभूतमिहापितथैवानुवर्त्ततेयदिदीर्घस्ययणभवतिकथंदध्यत्रमध्वत्रेति। दूरस्थेप्येतत् दध्यनुवर्त्तते
तदेवंदूरस्थदीर्घयोर्यणविधानान्मंजनस्यप्रसंगः। प्लुतस्यचप्रकृतिभावेनभवितव्यं चयत्नंचापकइउत्राटावेचामयारयोपवादः नाप्रा
प्तेतस्मिन्नेशोगुणवृद्धीनाधिकेभविष्यतः यथामहत्यौग्नहगोरदधीदादोसवर्णदीर्घत्वं अतोनार्थग्रहणेनाइदंतर्हिप्रयोजनं

इकोयणचि॥ ॥अचिपरतइकोयणादेशोभवति। दध्यत्रमध्वत्रकर्त्रर्थंलाकृतिः। इकः प्लुतपूर्वस्यसवर्णादी
र्घबाधनार्थंयणादेशोवक्तव्यः। होइ३ंद्र होयिंद्र। अचीतिवायमविकारोयावत्संप्रसारणाच्चेति॥ ॥एचो
यवायावः॥ ॥एचः स्थानेऽचिपरतः अय् अव् आय् आव् इत्येते आदेशाभवंति यथासंख्यं। नयनंलवनं
नायकः लावकः। कयेतेययेतेवा। याववहणाद्धि ३०

इकोयणोवाचियथासायदस्यतप्राप्नोतितन्माभूदिति। किंचास्यतप्राप्नोतिशाकलंनवतस्याप्यस्तेनबाधः आरंभसामर्थ्यात एवंसति
सिन्नित्यसमासयोः शाकलप्रतिषेधइतियत्पूर्वाचार्यैः स्मर्यतेतदनेनेग्रहणेनसंपाद्यते। इकः प्लुतपूर्वस्येति। प्लुतः पूर्वोयस्मा
त्तथीकः प्लुतात्परस्येत्यर्थः। भो३इ३ंद्रेतिस्थितेभोशब्दस्यगौतिवशात्प्लुतइकारः स्वरादिपाठान्निपातः प्रगृह्यसंज्ञकत्वात्प्र
कृतिभावेप्राप्तेयणविधीयतेसवर्णदीर्घबाधनार्थमित्येतत्साद्यप्राप्त्यभिप्रायेणोक्तं प्लुतपूर्वस्येतिप्लुतग्रहणमपिमात्रिकद्विमा
त्रिकव्याप्तिरिक्तायपरिग्रहार्थं तेनचतुर्मात्रादावपिभवति तथाचछंदोगागायंतिसामान्येवचायमिष्यते भोयिंद्रंगायंतीत्येतदपि

दि का० प० १ वांतो यि प्रत्यये॥ ॥कस्य पुनरयं एच इति वर्त्तते यद्येवमेदैतोरपि प्राप्नोति चेयं जेयं रैयतीति एवं तर्हि वांतग्रहणं न करिष्यते एचोयवायाव
३१ इत्येव इहापि तर्हि यादेशः प्राप्नोति चेयं जेयमिति तस्माज्जय्यौ शक्यार्थे क्षय्यस्तु इत्येतान्नियमार्थं भविष्यति एतोपरि भवति हि
ज्यो रे वेति एवमपि रैयतीत्यत्रायादेशः प्राप्नोति रैशब्दश्छांदसः दृष्टानुविधिश्छंदसि भाषायां तु रैशब्दप्रयोगो भाष्यविरोधादसाधुः
यद्येवं नियमस्याप्यपि प्रसज्येत अनेकाचस्य परिभवति ह्रियमज्योरेवेति ततः शक्यार्थ इति हि ती पोयोगः ह्रियमाणपि शक्यार्थ एवेति नियम

वांतो यि प्रत्यये॥ ॥एच इति वर्त्तते योयमेचः स्थाने वांतादेशः ओकारस्य अव् औकारस्य आव् स यकारादौ प्रत्यये पर
तो भवति। बाभ्रव्यः माण्डव्यः शंकव्यं दारु पिचव्यः कार्पासः नाव्यमुदकं। वांत इति किं रायमिच्छति रैयति। यीति किं
गोभ्यां नौभ्यां। प्रत्यय इति किं गोयानं नौयानं। गोर्यूतौ छंदसि। गोशब्दस्य यूतौ परतश्छंदसि विषये वांतादेशो भवत्यवः
॥आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतं। छंदसीति किं गोयूतिः। अध्वपरिमाणे च। गोर्यूतौ वांतादेशो भवत्यवः।
गव्यूतिमात्रमध्वानं गतः॥ ॥छ॥ ॥

तिसूत्रस्य तु को निर्वाहः उच्यते वांतशब्दोयं संनिहिते वांते वर्त्तते न यत्र कुत्रचित् संनिहितश्चोदेश्यनिकः पूर्वत्र यथासंख्यसंबंधात् तत्र
यथा यः कश्चन वांतो देशो न भवति तथान्यस्यानिको न भविष्यति विशिष्टस्यैव ग्रहणं निधानात् न दिदमुक्तं योयमेचः स्थान इति बाभ्रव्य इ
ति मधुबभ्रोर्ब्राह्मणकौशिकयोरिति यञ् मंडुशब्दो गर्गादिः शंकुपिचुशब्दाभ्यां तदर्थं विकृतेः प्रकृताविस्त्रार्थे उगवादिभ्यो यत् नावा राम०
तार्यं नाव्यं नौवयोधर्मेत्यादिना यत्। अध्वपरिमाणे चेति भाषार्थमिदं गव्यूतिः क्रोशयुगम्॥ ॥छ॥ ॥छ॥ ॥ ३१

धातोस्तन्निमित्तस्यैव ॥ ॥धातोरिति किमिति। न तावद्विशेषेण नियमः यिप्रत्यये यदि भवति तन्निमित्तस्यैवेति एवं हि वांतो यि प्रत्यये तन्नि-
मित्तस्येति विशिष्टविधिरारभ्यता। यः योगविभाग एवकारो नियम इति सर्वमेतदनर्थकमापद्येत तस्मात्समस्तमपि धातुग्रहणे विशिष्ट-
विषयो नियमो भविष्यतीति प्रश्नः स तु विशिष्टो विषयः प्रातिपदिकेपि संभाव्येत सूत्रं। बाभ्रव्य इत्यत्रैव स्यादिति एवं स्तन्निमित्त-
त्वात्। अत्र न स्यादिति विपर्ययात्। उपोयत इति वेञः कर्मणि लट् आत्मनेपदं यक् यजादित्वात्संप्रसारणं अकृत्सार्वधातुकयो-

धातोस्तन्निमित्तस्यैव ॥ ॥एव इति वर्त्तते वांतो यि प्रत्यय इति च धातोर्यश्च तन्निमित्तः यकारादिप्रत्ययनिमित्तस्तस्य
यकारादौ प्रत्यये परतो वांतादेशो भवति लव्यं पव्यं अवश्यलाव्यं अवश्यपाव्यं। धातोरिति किं प्रातिपदिकस्य नियमो मा
भूत् तत्र को दोषः बाभ्रव्य इत्यत्रैव स्यात् इह न स्यात् गव्यं नाव्यमिति। तन्निमित्तस्येति किं अतन्निमित्तस्य मा भूत् उपोयते
औपयत लोयमानिः सोयमानिः। एवकारकरणं किं धातववधारणं यथा स्यात् तन्निमित्तावधारणं मा भूत् तन्निमित्तस्य धातो-
र्धातोश्च भवति बाभ्रव्यः लव्यं अवश्यलाव्यं ॥ ॥क्षय्यजय्यौ शक्यार्थे ॥ ॥क्षिजि इत्येतयोर्धात्वोर्यति प्रत्यये परतः श-
क्यार्थे गम्यमाने क्षय्यजय्ये परत्वेनैतयोरेकारस्य अयादेशो निपात्यते। क्षेतुं शक्यः क्षय्यः जेतुं शक्यः जय्यः शक्यार्थ इति किं क्षेयं
पापं जेयो वृषलः ३१ ॥
रिति दीर्घः आद्गुणात्तस्य परं प्रसारणादिवड्वायां धातुग्रहणेन ग्रहणं। औपयतेति कर्मण्येव लङ्। लोयमानिरिति अत इञ् आदिवृद्धिः। ननु
वांत्र गुणः परत्वाद्यायेत्वात् वृद्धिरपि बाध्यते तद्धितापेक्षत्वात् वृद्धिरिवसत्सं औपयते लत्रैतदुभयं नास्ति तदर्थमेवस्य योग आरब्ध-
व्यः अारब्धेनैनेव सिद्धत्वादुपोयत इत्यादिकं प्रत्युदाहृतं। एवकारकरणं किमिति सिद्धे सत्यारंभो नियमार्थे त्वेहेतुर्न त्वेवकारकरणमि-
यीति प्रश्नः इष्टतो वधारणार्थ इत्युत्तरं ॥ ॥क्षयजय्यौ ॥ ॥उदाहरणयोः शक्यार्थं हृत्यः प्रत्युदाहरणे त्वावश्यके ३१ ॥ ॥

६ का० प० १ क्रय्यस्तदर्थे॥ ॥क्रय्य इत्यत्र प्रसार्यार्थश्च कर्म विद्यते कर्मणि ह्यत्र विधानात् प्रकृत्यर्थश्च द्रव्यविनिमयः तत्र प्रसार्यार्थः प्रधानं प्रकृत
३२ र्थस्तूपसर्जनं तत्र यदि प्राधान्याद्दिश्येत तेन प्रसार्यार्थः प्रधानं स्यात् तदयुक्तं तथा हि परिक्रय एवार्थस्तदर्थ इति तत्सूत्रस्य भाष्ये पतंजलिना रूप
मेव क्रय्यशब्दस्य तस्मिन्नर्थे दत्तेन नार्थे स्तदर्थग्रहणेनान्यथ मोर्थायि स्यात्तदर्थः शब्दस्तस्मिन्नभिधेये परस्यार्थः तदप्ययुक्तं शब्दे शब्दस्य

क्रय्यस्तदर्थे॥ ॥क्रीणन्ते व्रतिभिस्तदर्थे क्रयार्थं यत्र स्मिन्नभिधेये यति परतः अयादेशो निपात्यते। क्रय्यो गोः
क्रय्यः कंबलः क्रयार्थं यः प्रसारितः स उच्यते क्रय्य इति। तदर्थ इति किं क्रेयं गोधान्यं न चेहास्ति क्रय्यं॥ ॥भय्यप्र
वय्ये च छन्दसि॥ ॥बिभेतेर्वीतेः प्रपूर्वस्य वीशेतस्य च यति प्रत्यये परतश्छन्दसि विषयेऽयादेशो निपात्यते भय्यः कि
लासीत्। वत्सतरी प्रवय्या। भय्येति कृत्यल्युटो बहुलमिति अपादाने यत्प्रत्ययः बिभेत्यस्मादिति भय्यः प्रवय्येति स्त्रिया
मेव निपातनं अन्यत्र प्रवेयमित्येव भवति। छन्दसीति किं भेयं प्रवेयं। ह्रदय्या आपः उपसंख्यानं ह्रदय्या आपः ह्रदे भवाः ह्र
दय्याः भवेच्छन्दसीति यत्॥ ॥छ॥ ॥छ॥ ॥श्रीरामचंद्राय नमः॥ ॥श्रीगोवर्धनाय नमः॥ ॥

असंभवात् अतो गुणभूतोपि प्रकृत्यर्थ एव निर्दिश्यत इति तदर्थ इति तदर्थं क्रियार्थं यस्मिन्नभिधेय इति। क्रयार्थं यः प्रसारित इति क्रेतारः ए० म०
क्रीणीयुरिति बुद्ध्या यस्तोपसमवस्थापितमित्यर्थः क्रेयमिति मूल्येनोपादेयमित्यर्थः। न चेहास्ति क्रय्य इति आपणे विक्रयाय प्रसारि ३२
तं यावत्संनास्तीत्यर्थः। केचित्तु क्रय्यशब्दे क्रीणातिर्विक्रयेऽवर्तन्त इत्याहुः तेनापणे विक्रयाय प्रसारितं इत्युच्यते॥ ॥भय्यप्रवय्ये॥ ॥
वीरेतस्येति वीगत्यादिषु अजेर्व्यघञपोरिति वा। ह्रदय्या इति अकारस्यायादेशः॥

एकः पूर्व॥ ॥वक्ष्यमाणप्रकरणेयोयो विपर्ययेणावस्थितौ दृश्येते आद् चिआदेचीत्यादितयोः पूर्वपरयोः स्थानेवक्ष्यमाणो गुणादिरेकादेशोभवतीति सूत्रार्थः अथ पूर्वपरयोरिति किमर्थं स्थानिनिर्देशार्थमसति हि तस्मिन्नाद्गुण इत्यादौ स्थानिनिर्देशाभावात्कस्य गुणादिरादेशः स्यात् नेन दृष्टि आदित्यादिकापंचमी अचीत्यादिकायाः सप्तम्याः षष्ठीप्रकल्पयिष्यतीत्यावत्सा तेनानयोरेव पूर्वपरयोर्गुणो भविष्यतीति नार्थ एतेन तत्राह पूर्वपरग्रहणमित्यादि। द्वयोरादेशप्रतिपत्त्यर्थं युगपदादेशप्रतिपत्त्यर्थमित्यर्थः। असति तु तस्मिन्कस्य स्यादित्यत आह एकस्यैव स्यादिति। ननु द्वयोरपि षष्ठीप्रक्लृप्तिः क्लृप्तात्राह नोभे सप्तमीपंचम्याविति। नोभे प्रकल्पिके भवतो युगपत्प्रकल्पिके भवत इत्यर्थः इतिकरणो हेतौ। तत्राद्गुण इत्यत्राचीत्येषा सप्तमी परत्वाद् द्विविधो चरितार्था आदित्येषा तु पंचमी न क्वचिच्चरितार्था ततश्चैषैव सप्तम्याः षष्ठीप्रकल्पयिष्य

॥एकः पूर्वपरयोः॥ ॥अधिकारोयं आख्यातपरस्येति यावत्। प्रागेतस्मादितउत्तरं यद्वक्ष्यामः तत्र पूर्वस्य परस्य च द्वयोरपि स्थानेएकादेशोभवतीत्येवं तद्वेदितव्यं वक्ष्यति आद्गुण इति पूर्वस्यावर्णस्य परस्याचः स्थानेएको गुणो भवति। उपेन्द्रः खट्वेन्द्रः मालेन्द्रः। पूर्वपरग्रहणं द्वयोरपि युगपदादेशप्रतिपत्त्यर्थं एकस्यैव हि स्यात् नोभे सप्तमीपंचम्यौ युगपत्प्रकल्पिके भवत इति ३२ ॥ ॥श्री॥ ॥

तीत्यस्य चास्यैव स्थाने गुणः स्यात् वृद्धिरेचीत्यत्र तु गुणाद्विधौ पंचमी कृतार्थेति तस्या एचीति सप्तम्यकृतार्था षष्ठीप्रकल्पयेदित्यवर्णस्यैव वृद्धिः स्यात् उपसर्गादृति धाताविस्यादौ द्वयोरप्यकृतार्थत्वे विपर्ययेणापरस्य षष्ठीप्रक्लृप्तिः स्यान्न युगपत्कार्यित्वं निमित्तत्वं च द्वयोर्युगपद्विरोधात्ततश्च कार्यमपि पर्यायेण स्यात् तस्मात्पूर्वपरयोरितिवक्तव्यं। नवक्तव्यमेकग्रहणसामर्थ्यादंतादिवच्चेतिवचनाच्च पूर्वपरयो युगपद्विरोधात् ततश्च कार्यमपि पर्यायेण स्यात् तस्मात्पूर्वपरयोरितिवक्तव्यं। नवक्तव्यमेकग्रहणसामर्थ्यादंतादिवच्चेतिवचनाच्च पूर्वपरयोर्द्वयोरेवादेशो भविष्यतीति नास्ति तर्ह्यस्य सुखप्रतिपत्त्यर्थं तु पूर्वपरयोरित्युक्तमन्यथा युगपत्षष्ठीप्रकल्पनद्वारेण विवक्षितप्रतिपत्तौ प्रतिपत्तिगौरवं स्यात्। अथ किमर्थमेकग्रहणं प्रथममनिर्दिष्टम। तिक्रम्य चरममनिर्दिष्टस्य पूर्वपरयोरित्यस्य प्राक्प्रयोजनमुक्तं पाठक्रमाद्धि अर्थक्रमस्य बलीयस्त्वात् कथं सततः कार्यिणः कार्येणाभवितव्यं कार्यस्य च गुणादेर्विशेषणमेकग्रहणं ३२

द्विका॰ प॰१ ननु बाहुगाइत्यादे विकस्यैवादेशस्य सत्त्वेउपात्तानां संख्याया विवक्षितत्वादुपात्तसंख्यात्यागे कारणाभावात्तत्रश्चैकस्वगुणाद्दिरादेशो भवि-
३३ ष्यति। स्यादेतत् आदेशस्य विधेयतया प्राधान्यात्तत्र ध्यानेव ग्रहणस्य पार्ष्टी त्वादेरसंख्याया अविवक्षितत्वादनेकादेशप्रसंगः इति तदसत्। ग्रहं शोवि-
तयो द्विरूपस्य मार्जेर्हि विधीयते। शास्त्रांतरे च विहितं शेपित्वमुपागच्छति। शास्त्रांतरे च विज्ञाता ग्रहाः संख्यांतरान्विताः। तत्रैकत्वविवक्षायां वा-
क्यभेदः प्रसज्यते। इति कृत्वा ग्रहैकत्वमविवक्षितमुच्यते। नैवं गुणादि सदेश्या इत्येकत्वं विवक्षितं। प्राजापत्यां नवग्रहणाति शास्त्रांतरविहितनवग्र-
होद्देशेन संस्कारः संमार्गो विधीयते तत्र श्रुतमप्येकत्वं नोद्देश्यकोटौ निवेशयितुं शक्यते तत्र संख्यांतराविततया विहितत्वात्ततश्च तद्विवक्षा-
यां तदपि विधेयं स्यात्ततश्च वाक्यभेदप्रसंगः वचनमपि भेदात्तयोर्ग्रहस्तत्संमार्ष्टीति चैकमिति इह तु विधेयतया गुणादेः प्राधान्येपि विशिष्टवि-

एकग्रहणं पृथगादेशनिवृत्त्यर्थं स्थानिभेदाद्धि भिन्नादिषु नत्ववद्द्वावादेशौ स्यातां

३३ श्रीरामनामः॥ ० ॥श्रीगंगात्रियाए नमः॥ ० ॥श्री४॥ ० ॥

धिसंभवात् न वाक्यभेदप्रसंगः अविवक्षाकारणाभावाद्विवक्षितमेकत्वं लोकवच्च यथा नयोर्मृत्तिंडयोर्घटं कुर्विति न चोच्यते एकमिति एकमेव घटमसौ
करोति न च प्रकरणादिना तत्रैकस्य कारणांतरभावेपि दर्शनात्तस्मात् अर्थ एकग्रहणेन तत्त्वाह एकग्रहणं पृथगादेशनिवृत्त्यर्थं यथा पुनः पृथगादे-
शप्रसंगस्तथा दर्शयति स्थानिभेदादिति। पूर्वपरयोरिति निर्दिष्टात्स्थानिभेदः प्रतीयते ततश्च तद्द्वारादेशोपि श्रुतमप्येकत्वमविवक्षितं स्यादित्यने-
कादेशप्रसंगस्त्यर्थः अवश्यं चैतदेवमभ्युपगंतव्यमिति दृष्टांतेन दर्शयति भिन्नादिषु नत्ववदिति। यथा रदाभ्यां निष्ठातो नः पूर्वस्य च द इति नत्वमेक- एअ॰
त्वाविवक्षणात् प्रतिस्थानि भवति तद्वदत्रापीत्यर्थः। भाष्ये त्वेकग्रहणं प्रत्याख्यातं ननु च द्वयोरभूतस्थानानुरोधेन प्रधानस्यादेशस्य भेदः कल्प्यतां गु- ३३
णप्रधानानुरोधी हि गुणो भवति न पुनर्गुणानुरोधि प्रधानं यथोक्तं भिन्नादिषु नत्ववदिति तत्र न खलु नत्वविधावेकत्वस्याविवक्षिततया द्वौ नका-
रौ भवतः॥ ॥छ॥ ॥छ॥ ॥

किंतर्हि पूर्वस्य चेति चकाराद्वाक्यभेदोवगम्यते तत्र पूर्वेण निष्ठातो नत्वं परेण धातु दकारस्य हवो भोसाभ्यासस्येति प्राणिशिषतीत्युपसर्गा
दनंतरस्य चेति चकाराद्वाक्यभेदोवगम्यते तत्र पूर्वेण निष्ठातो नत्वं परेण धातुदकारस्य हचो भो साभ्यासस्येति प्राणिशिषतीत्युपसर्गाद्
नंतरस्य नकारस्य णित्वे रिति वर्णत्वसिद्धेः स्यादिति निर्देशार्थमुभोग्रहणं नकत्रं मंउभौ नकारौ णत्वमापद्येते इति तस्मादादेशार्थमुभोग्र
हणं विज्ञायते साभ्यासस्यानिते यौ नकारौ द्वौ तयोरुभयोर्णो भवत इति तेनात्रापि नैकत्वस्याविवक्षितत्वाद्वयोर्द्वैर्भवतः किंतूभोग्रहणा
दिति न कश्चिद्दोषः ॥ इह श्रुतिस्मृतिविहितं कर्म किंचित्सकृदनुष्ठीयते यथाय नयनमधानमाचमनमिति नसुपनीतः पुनरुपनीयते न
हितः पुनराधीयते नाचान्तः पुनराचामति निमित्ते आचामति। किंचिदसकृद्यथा ज्योतिष्टोमादयः यथापूर्ववियाब्राह्मणाः प्रत्युत्थेयर
तियो होहद्ववयास्तस्य तस्यागमनं प्रत्युत्थीयते ब्राह्मणोनहंतव्यः सुरानपेयेति प्रतिमक्ति निषेधोनुष्ठीयते न पुनरेकं ब्राह्मणमहत्वे
कांच सुरामपीत्वा मन्त्रकामचारः माकरणं वस्मृतिस्तदिहाहुराम्नयास्त्यागुणाः कर्तव्य इति चोदितेयदिमसकृदनुष्ठानं खहु
इत्येकस्यां व्यक्तौ गुणो कृते कृतः शास्त्रार्थ इति कृत्वा मा लेइ स्मादि पुनः क्रियेत तस्मात्प्रत्युत्थानादिवदावर्तते किं पुनरत्र निबंधनं किंचि
त्सकृत्क्रियते किंचित्पुनः पुनरिति उपनयनं तावन्माणवकस्य संस्कारः स कृत्वा सो संस्कृतो ध्ययनादिष्वयोग्यो भवति आधानमप्यग्नि
संस्कारार्थं संपन्नेष्वग्निषु प्रयोजनाभावात्पुनर्न क्रियते आचमनमपि शौचार्थं अस तिनिमित्ते पुनर्न क्रियते ज्योतिष्टोमादयस्तु निमि
त्तत्वस्य गाय यदि दानाय वसंते क्रियते अयकाम्या अमुष्मिंल्लोके एन मन्यसो जाया भूत्वोपडौ नत इति तत्फलमभ्युदयं भूयो भूयः परास्तु
मिः पुनः पुनरनुष्ठाप्यते पूर्ववयो ब्राह्मणाप्रत्युत्थाना कारणो दोषः करणो चाभ्युदयो दर्शितः ऊर्ध्वं प्राणा ह्युत्क्रामंति यूनः स्थविर आयाति
। प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यत इति तत्र प्रत्युत्थानमनभिविशिष्टं अतो दोषनिर्हरणार्थं पुनः पुनरनुष्ठीयते ते निमित्तं कृत्वा ह्य
प्रतिनिमित्तमावर्त्तिः तथा ब्राह्मणवधेच सुरापाणे च दोषउक्तः स ब्राह्मणमात्रे सुरामात्रे च भवतीति ततो दोषवं तो मा भूमेति सर्वत्रैवा
नुष्ठीयते इह शब्दस्य ज्ञाने प्रयोगे चाभ्युदयो दर्शितः । एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुक् भवतीति यत्ल वापश्रुया
नेक मंगलपद शब्द प्रयोगे दर्शितः ते सुरा हेलयो हेलय इति आहिताग्निरपशब्दं प्रयुज्येति अत एतद्विगुणादिकं पुनः पुनरनुष्ठीयते न

टीका·प०१

३४

अंतादिवच्च ॥ ॥ अंतादिशब्दयोरवयवविशेषवाचित्वात् द्रव्यविशेषणापेक्षायां पूर्वपरयोरित्यनुवृत्तेस्तस्यैव च समासाद्गुणाद्यादेशविशेषणं
तादेकादेश इति लभ्यते तदिदमुक्तं एकः पूर्वपरयोरितिव र्ततइत्यादिकः पुनरत्रातिदेशार्थः किं यथैकादेशस्य स्थानिनो पूर्वपरयोरन्तादिवद्
भवति किं वा कृतएकादेशे तयैवैकादेशमयेस्य पूर्वापरयोः समुदायो तयोरंतादिवद्भवतीति यदि वैकादेशस्य स्थानिनो पूर्वपरयोरवयवयोर्विशेषः समु
दायो योऽन्तादीनयोरेकादेशोऽप्यन्तादिवद्भवतीति तत्राद्यपक्षे स्त्राबन्तंसंभवति एकादेशेन पूर्वपरयोः स्थानिनो निनोर्निर्वर्तितत्वात् कथ
मसतोः पूर्वपरयोरंतादिवत्स्यात् द्वितीयेपक्षेऽपि स्यादिसत्र वृक्षौ इति स्थिते खट्वसुयोरेकादेशः सुबपेक्षस्य कस्यचिदप्यभावाद्यस्यादिवत्
स्यात् अतस्तृतीयः पक्षोऽभ्याश्रीयते न च पक्षसप्रियपक्षोन संभवति वत्स्याहिव्र ब्रह्मबंधूरित्यत्र ब्रह्मबंधु इति स्थिते पूर्वोपयोगाउकारोयस्यां

अंतादिवच्च ॥ ॥ एक इति वर्तते पूर्वपरयोरिति च योऽयमेकादेशो विधीयते स पूर्वस्यांतवद्भवति परस्या
दिवद्भवति पश्चात् स्योतस्यादिर्वा ततः तद्ग्रहणेन गृह्यते तद्वदेकादेशोऽपि तद्ग्रहणेन गृह्यते ॥

तोऽव्रह्मबंधुशब्दस्य समएकादेशोनापत्त्येवोकारस्यानिवर्तितत्वात् यश्चात्र धकारांतो न तस्यान्तएकादेशस्य स्थानी ठकारः अनारंभकत्वात् ।
एवं तर्हि पक्षपदेशप्रयुक्तस्य स्थानिनोः पूर्वपरावंतादीतव्यपदेशप्रयुक्तसैकादेशोऽप्यंतादिवदित्यर्थः एतदुक्तं भवति सकादेशात्प्राक् पूर्व
परयोः पृथगवस्थितयोस्ताभ्यां सह योऽपदेशः पूर्वपरसमुदायविषयो दृष्टः प्रातिपदिकमिति वा सुबिति वा स व्यपदेशः एकादेशे कृतेऽपि
भवतीति तदिदमुक्तं पश्चात्स्यांतआदिर्वेति ततः अंजउसादिन स्फेसतेन एकादेशात्प्राग्वास्थितः पूर्वः परश्च समुदायो निर्दिश्यते अंतादि राम०
शब्दाभ्यां च एकादेशस्य स्थानिनो पूर्वपरौ तद्ग्रहणेन गृह्यतइत्यनेनाथैतदुक्तं भवतीसारम्भानेतायदुक्तमस्माभिस्तद्दर्शितं ॥ ॥ ३४

॥ ॥ ॥ ॥

एयोतिदेशार्थ इति। अतिदिश्यत इत्यतिदेशः। अतिदेशश्चासावर्थश्चेत्यतिदेशार्थः कर्मधारयोऽयमर्थोऽत्रातिदिश्यत इत्यर्थः। वर्णाश्रयविधावितो
दिवर्णस्वरूपमाश्रित्य यद्विधीयते तेन तदन्तादिवद्भावेनातिदिश्यत इत्यर्थः। तत्कथं नात्र तादृप्यनिबन्धनं कार्यमतिदिश्यते योऽयमन्तादिवत्
पूर्वपरयोरेकादेशः स्वस्थितः पूर्वः परश्च तद्रूपमेकादेशो भवति तत्प्रयुक्तं कार्यं लभत इति एवं वत्करणं स्यात्तत् तद्रूपेण पूर्वापरौ पर
म्रष्टेते एवं हि सिद्धे तादिवदिति वचनादन्तादित्वप्रयुक्तं कार्यमेकादेशस्य भवतु पूर्वपरस्वरूपप्रयुक्तं तु कार्यं केन भवेत् लिङ्गे चात्र भवति
तु अस्मिन् वचनेऽन्यथा धीसे साज्ञवेकादेशस्यादिवद्भावादेव तु कः सिद्धादनर्थकं तत्स्यात्। खट्वाभिरिति। न परकरणं तु यत्रैकादेशो

इत्येषोतिदेशार्थः। ब्रह्मबन्धूरित्यत्र ब्रह्मबन्धुरिति प्रातिपदिके जातिप्रातिपदिकं प्रातिपदिकात्प्रातिपदिकपोयएका
देशः स प्रातिपदिकस्यान्तवद्भवति यथा गृह्यते तेन तुं प्रातिपदिकादिति स्वादिविधिः। ह्रस्वादिनत्र सुखौ कारः आयोः
सुव सुयोरेकादेशः सुप आदिवद्भवति यथा ज्ञाकानेचक्रे सुबन्तं पदमिति। वर्णाश्रयविधावयमन्तादिवद्भावो नेष्यते तथा
ह्रिखट्वाभिरित्यत्रान्तवद्भावादतो भिस ऐसिति न भवति ह्वयतेर्जुहावेति संप्रसारणं पूर्वस्यादिवद्भावाभावादात्त औ
णल इति न भवति अस्येऽऽप्सुः अस्याऽऽप्स्व इति ह्रुद्धिरेवीतिहन्द्धिः एङः पदान्तादतीत्यत्र विधावादिवन्न भवति ३४

नास्तितदर्थं स्यात्सुभंयाभिरिति। जुहावेति अप्यत्तस्य चेतिदृपतेः संप्रसारणे कृते जुहु अ इति यत्सर्वरूपत्वमाकारस्यात्तत्रादिव
द्भवति योपमाहिरकारस्तद्वन्न भवति तेन आत औ णल इति न भवति। अस्ये अप्स्व इति सावेो विभक्तेरेकारस्य योऽयं हि दिरेवीतिह द्धिरे
कादेशः स परस्यादिवन्न भवति तेन एङः पदान्तादतीति न भवति। यत्र च पुनः पदुभयमाश्रीयते अन्तश्चादिश्च तत्राप्यन्तादिवद्भावो
न भवति यथैतैलिङिति दृश्वद्युपसर्गादिरस्येणा विधीयमानं अभीयस्येरीयादित्यादीत भवति यदिह्यमेकादेशः पूर्वप्रसवबुध्या
गृह्येत सतदानीमिवकथं परप्रसादिवत्स्यात् एवं परप्रसादिवत्त्वेतदानीमेव पूर्वप्रसन्तवद्भावोप्युपपन्नः एकः सोभयायेत्पापुगण

टीका·प०१
३५

पूर्वपरेति योपेन निवर्त्यते सत स्पस्थानी यथा भुवोस्तिः समुदायश्चात्र विवक्षितेन ततश्च तत्स्य पुक्प्रेवकार्यं स्थानिवद्भावात्स्यान् यदि किंचित्स्ति
ननु प्रत्येकं पूर्वपरयुक्तः स्यादेतद्वयवयोरपि निवर्त्यमानत्वात्तयोरप्यस्थानित्वमिमत आह जन्वेति। इतिकरणाद्द्वयमपि हेतोत तत्र समुदायस्यैव स्था
नित्वं वयवयोर्यत्स्थानित्वं तदानुमानिकं अवयवनिहंत्रिपंतुरेणावयववतिनो निवर्त्यपितुमशक्यत्वाद्वयवयोनिर्हेत्रिः न त्वादिष्टत्वा
दित्यर्थः ततश्च तदाश्रयं कार्यं स्थानिवद्भावान्नप्राप्नोति मासोप्युभुन स्येवव स्थानिनस्तत्राश्रयणात् रूपमेव तदर्थमंतादिवद्भावो विधीय
ते। ननु विपरीतमिदं स्यादवयवयोरानुमानिकं स्थानित्वमिति पूर्वपरयोरिति द्विवचननिर्देशात् ततयोरेव स्थानित्वं श्रुतं न समुदायस्यशब्दे
स्तिद्वयोस्तन निवर्त्यमानयोरानुमानिकं तथापि सिद्धः स्थानिवद्भावः कथं स्थानिवदादेश इत्यत्र संबंधिशब्दत्वादेवादेशापरिग्रहे सि

पूर्वपरसमुदायस्यैकादेशस्य स्थानी समुदितेन निवर्त्यते तत्रावयवयोरानुयानिकं स्थानिकं स्था
नित्वमिति तदाश्रयं कार्यं स्थानिवद्भावाद्प्राप्नमित्यंतादिवद्भावो विधीयते॥ ० ॥

द्धेश्चादेशग्रहणादानुमानिकस्याप्यादेशस्य स्थानिवद्भावार्थे ततश्च स्थानस्याप्यानुमानिकस्याश्रितः यथा एतः पचावित्यत्र हिर
कारेणाकारांतः स्थानमनुमीयते उकारेणाप्युकारांत आदेशः तस्य स्थानिवद्भावान्तिङं तंपदमिति पदसंज्ञा भवत्येवमत्राप्यवयवयो
रानुमानिके स्थानित्वे सिद्धः स्थानिवद्भावः एवं तर्हि नाल्विधो स्थानिवद्भावउक्तोल्विधर्थमिदं यथा द्योरयेणामुरायेरणात्रपद
विभक्त्योरेकादेशस्यांतद्भावादेकाजुत्तरपदेणा इति णत्वमल्विधिरपि भवति। नन्वेवं नाल्विधाविति प्रतिषेधः स्यात्सलाश्रयेषु व
कार्येषु अस्यत्वेकादेशस्योत्रापदं प्रसंपवत्वमेव स्थानित्वेन प्रार्थनीयमन्त्वं नु स्वत एव सिद्धं जनतश्च यथा रुदितामित्यत्र त्वाश्रयं व
लादित्वं स्थानिवद्भावेन नेवसार्वधातुकत्वमाश्रित्य रुदादिभ्यः सार्वधातुक इतीड् भवति न इदिहापि स्थानिवद्भावेन तमुत्तरपदा
वयवत्वेनास्त्रपंचान्त्वमाश्रित्य णत्वं भवति य तु स्थान्मलत्वस्य प्रतिषेधनं तत्रेष्यत एव यथा रवद्धा भिरित्यादौ वेत्यभादेत स्थाश्चिंस

रामं०
३५

षत्वतुकोः ॥ ॥ षत्वे तुकि चेति । षत्वशास्त्रे तुक्शास्त्रे चेत्यर्थः एकादेश इति । एकादेशशास्त्रमाद्गुणादीत्यर्थः । असिद्धो भवतीति निमि
त्तो निष्पन्नस्ततो सो सिद्धः तत्र शास्त्ररूपं तावत्त्रिष्वन्त्रमिति परत्र परशब्दप्रयोगादिवार्थविगमप्ततत्कार्यकारणाद्वसादृश्येन दा
ह । सिद्धकार्याणि न करोतीत्यर्थ इति । यत्वतुक्शास्त्रं संनिधावेकादेशशास्त्रं स्वकार्यमेकादेशाश्रयेन करोति न प्रवर्तयति न प्र
तिपादयतीत्यर्थः सूत्रस्य प्रयोजनमाह असिद्धवचनमिति । आदेशोक्तेः पक्कार्यं तद्धेतुकं प्राप्नोति तदादेशलक्षणं आदे
शो लक्षणो निमित्तं यस्येति कृत्वा तस्य प्रतिषेधार्थमसिद्धवचनं । उत्सर्गः स्थानी सामान्येनोत्सृष्टत्वात् लक्षणं यस्य तदुत्सर्ग

षत्वतुकोरसिद्धः ॥ ॥ षत्वे तुकि च कर्तव्ये एकादेशः सिद्धो भवति सिद्धकार्याणि न करोतीत्यर्थः । असिद्धव
चनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणाभावार्थं च । कोऽसिंचद्योऽसिंचदित्यत्र एङः पदान्तादतीत्येका
देशस्य परं प्रत्यादिवत्वात् अपदादेशिणात्परस्यादेशसकारस्य षत्वं प्राप्नोति तदसिद्धत्वान्न भवति ।
कोस्य योस्येति प्रत्ययसकारस्य षत्वं न भवति ३५

लक्षणं तस्याभावः प्रवृत्तिर्यथा स्यादित्येवमर्थं वासिद्धवचनं । कोसिचदिति लिविसिविधातोर्लङि तिप् हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् इति लोपः सस्य रुत्वं । अ
तो रोरप्लुतादप्लुते उत्वं गुणः एङः पदान्तादति । परं प्रत्यादिवद्भावादिति आदिवद्भावे इको सिचदितिपदं ततः सकारः
पदादिर्न भवतीति सात्पदाद्योरिति निषेधाभावादेकादेशमोकारमिणाश्रित्य षत्वं प्राप्नोति तदसिद्धत्वान्न भवति असि
द्धत्वे हि षत्वशास्त्रं प्रत्येकादेशशास्त्रस्याप्रतिपादकत्वात् कोऽसिचदित्येवमवस्थितं रूपं भवति तत्राकारेणान्तरधाना
त्वाभावः । कोस्येति इदमः षष्ठ्येकवचनं सप्तस्य ङस् सिद्ध सामिनात्स्याः इति लोपः शेषं पूर्ववत् ३५ ॥ ॥

एवमादेशलक्षणास्योदाहरणानि दर्शितानि उत्तरस्य दर्शयति अधीत्य प्रेत्येति। एकादेशस्यासिद्धत्वादित्यादि। असिद्धत्वे हि तु कथं शास्त्रम् असं
निधावधिस्य ह्रस्वस्यैवमवस्थितं पदरूपं भवति ततश्च ह्रस्वाश्रयस्तुक् प्रवर्त्तते परिमुख्यस्यैकादेशस्यैव कार्यस्यासिद्धत्वमुक्तं तदाभत्वे नास्ति शेषः
कथमोकारस्तावत्स्वकार्यं यत्वं न करोतीति पोतु ततः एवं किं कारणं करोति तदाश्रयमपि यत्वं न भवतीति तेनैवोकारणमवधानात् तु किं नेष्टसिद्धिः क
थमेकादेशेन ह्रस्वस्य निवर्त्तितत्वान्न चैकादेशः स्वकार्यं न करोतीति [redacted] न चैकादेशः स्वकार्यं न करोतीति अनेनस्थानिनः प्रत्याहृत्तिः
शंकातस्मात् तु किं शास्त्रासिद्धत्वमेवाश्रयणीयं आह च स्थानिवद्भावनानर्थकं च शास्त्रासिद्धत्वादिति। संप्रसारणङी इत्यत्रेति संप्रसारणे ङी इति च

॥ तुग्विधौ अधीत्य प्रेत्येत्यत्र एकादेशस्यासिद्धत्वात् ह्रस्वस्य पितीति तुग् भवति संप्रसारणाङी इत्सु प्रतिषेधो वक्तव्यः संप्रसारणे।
शकहूषु परिवीषु संप्रसारणपूर्वत्वस्यासिद्धत्वात्सत्वं न प्राप्नोति। ङी इ सेच्छत्रं॥ हृषेच्छत्रं। शं अपचेच्छत्रं अपचेच्छत्रं। आङ्गुणास
सिद्धत्वाद्ध्रस्वलक्षणो नित्यस्तुक् प्राप्नोति दीर्घात्पदान्ताद्वेति विकल्प इष्यते· ३६ ॥ श्रीकृष्णाय नमः॥ ॥ श्री॥ ॥

य एकादेशस्यासिद्धत्वप्रतिषेधो वक्तव्यः। शकहूष्विति अपचेच्छत्रमिति· पचेर्लङ् उत्तमैकवचनमिट् शप्· आद्गुणस्यासिद्धत्वादिति· असि
द्धत्वे हि न स्यात् क्षरच्छत्रं अपचरच्छत्रं शेषमवस्थितं रूपं भवति अत्र संप्रसारणोनावसातिषेधोन वक्तव्य एकादेशोऽसिद्धस्तुमतेन चात्रैकादेशं
पश्यामः दीर्घेणनिवर्त्तितत्वात् न च च दीर्घस्य स्थानिवद्भावादेकादेशग्रहणोग्रहणमल्विधित्वात् ङीटोस्तु प्रतिषेधो वक्तव्य एव। अथवा
लावृवार्थं पदस्येति विकल्पम् अन्तादित्वग्रहणं च पूर्वसूत्रादनुवर्त्तनीयं तेन पदान्तस्य पदादेश्च य एकादेशः सोऽसिद्ध इत्येषोऽर्थो भवति। यद्येवं सुपिप्य
लाओषधीस्वधीत्य ओषधिशब्दाद् द्वितीयाबहुवचनं ओषधेश्च विभक्तावप्रथमायामिति दीर्घः ततः प्रथमयोः पूर्वसवर्णः हत्वविसर्जनी
यो॥ ॥७॥ ॥७॥ ॥

राम०
३६

अत्रेदानीं कः करत्करोति कृधीति षत्वमिष्यते तत्र प्राप्नोति पदान्तपदाद्योरिति वचनात् एकादेशस्यासिद्धत्वाभावात् इणः उत्तरो विसर्जनीय इ
ती णः षः इति षत्वं प्राप्नोति अविशेषेणासिद्धत्वे ओषधीः अस्य कृधीत्येवमवस्थानादिणः उत्तरत्वाभावात् इणः उत्तरो विसर्जनीय इती णः षः इति
षत्वं प्राप्नोति अविशेषेणास्ति द्वत्वे ओषधीः अस्य कृधीत्येवमवस्थानादिणः उत्तरत्वाभावात्पत्वाप्रसंगात्षत्वं सिध्यति । न्यायकार्त्तिद्वयं यद्यं क
स्कादिषु भ्रातुः पुत्रः शब्दं पठति तज्ज्ञापयति नैकादेशात्परस्य विसर्जनीयस्य षत्वं भवतीति पदिस्याज्ञात शङ्काऽङ्गं स्ति अत उदित्सु त्वे एकादेशे अप
रेहि तेण त्सएते ति सकारलोपे कृते षष्ठीसमासे अतो विधायो निसंबंधे भ्प इत्सलुकि रेफस्य विसर्जनीये अत उदित्तु कारस्येकादेशस्यासि
द्धत्वादिदुदुपधस्य चेत्येव षत्वे सिद्धे कस्कादिषु तन्न पठेत् पठति ततो ज्ञापयते नैकादेशात्परस्य षत्वमिति । इक ह्रस्वात्रापि तत्र हि न प्राप्नोति
। नैष दोषः तुल्यजातीयस्य ज्ञापकं भवति कश्च तुल्यजातीयः कुघोरनन्तरः इह च विजः क्विपि संप्रसारणे पूर्वत्वे ह्रस्वस्यापि तकृतीति तुक्कि
मान्ते पूर्वत्वस्य सत्रेणासिद्धत्वे प्राप्ते पि पदान्तपदाद्योरिति वचनादसिद्धत्वाभावादुदिति तुग्भवत्येव न हि उआ इत्येकादेशात्मागवस्थायामाका
रः पदान्तो नाप्युकारः पदादिः विभक्तेरभावात् न चैकादेशात्मागेव कृदन्तत्वाद्विभक्तसुत्पत्तिरेकादेशस्यान्तरङ्गत्वात् अथापि प्रागेव विभक्तिरेव
मपि उआम् इति स्थिते उकारः पदादिः सकारः पदान्तः सुबन्तं हि पदं तत्तु ततः पूर्व अथापि भ्याम् प्रभृतावु आभ्यामिति स्थिते स्यादिति प
दसंज्ञायां पदान्तपदाद्योरेकादेशस्तथापि न दोषः पूर्वपरयोरिति वर्त्तते अन्तादिवद्ग्रहणाच्च तत्र यथासंख्यं संबन्धात् पूर्वपदस्य योन्तः परस्य चादि
स्तयोरेकादेशो सिद्ध इत्यर्थः संपद्यते आकारस्य चात्र पदत्वाद्बहिरङ्गस्यैकादेशस्यैकपदाश्रयत्वेनान्तरङ्गयोः षत्वतुकोरसिद्धं बहिरङ्गमन्तरङ्ग इ
त्येवासिद्धत्वं सिद्धं न्यायनार्थं तु एतज्ज्ञापयति यत्र बहिरङ्गस्यान्तरङ्गस्य च वाचोऽनन्तर्यं निमित्तत्वे नास्ति तत्र बहिरङ्गपरिभाषा न प्रवर्त्तत इ
ति तेन अक्षद्यूरित्यत्र बहिरङ्गस्याप्यूठो सिद्धत्वाभावाद्यणादेशः सिद्धो भवति अयमेवार्थः परिभाषारूपेणाप्युच्यते नाजानन्तर्ये बहिष्ट्वप्र
कृप्तिरिति ३६ ॥ ॥श्री॥ ॥७॥ ॥

ई का० पृ० १ आद्गुणः॥ ॥गुणग्रहणं किमर्थं वृताचीतिवर्त्ततेएकः पूर्वपरयोरितिच तत्रांतर्यतः कंठतालव्ययोरकारेकारयोः स्थानेतालव्य एवेकारो भवि-
ष्यति कंठोष्ठ्ययोरप्याकारोकारयोः स्थानेतादृशएवौकारो भविष्यति नचैकारौकारयोरपि प्रसंगः वृद्धिरेचीति वृद्धिविधानात्तन्नियमार्थं एवो-
३१ रनेनैव सिद्धत्वात् एचश्च वृद्धिर्भवति वभयथा नियमश्च आख्यास्यते वृद्धिरेचीति इहतर्हि खट्वर्श्यः मालर्श्य इति प्रमाणतोंतरतमो ऋवर्णस्य
अकारः प्राप्नोति। उभयोर्योंतरतमस्तेन भाव्यं नच कोऽप्युभयोरंतरतमः अकारस्तु द्विमात्रमात्राएवपरो भवतीति स्थानतउभयोरंतरतमः आ-
कारस्तर्हि प्राप्नोति उपसर्गादृति धाताविति सेत्स्यति नियमार्थं भविष्यति ऋति धातावेवाकारो नान्यत्रेति। प्लुतस्तर्हि प्राप्नोति खट्वे३ ऋश्यः प्लुतश्चावि-
षयेऽस्मतः प्लुतविधाने हि सति यस्मिन्विषये प्लुतो विहितस्तस्मिन्नप्यनेनैवत्तायं अस्मिन्कर्त्तर्गे आश्रमिकस्य प्लुतस्यासिद्धत्वात् ततश्च

॥आद्गुणः॥ ॥अचीत्यनुवर्त्ततेअवर्णात्परोयोवृ अचिपरतः पूर्वोयोऽवर्णः तयोः पूर्वपरवर्णयोः स्थाने ए-
कोगुणआदेशो भवति। तवेदं खट्वेंद्रः तवेहते खट्वेहते तवोदकं खट्वोदकं तवर्श्यः खट्वर्श्यः तवल्कारः ख-
ट्वल्कारः॥ ॥श्रीः॥ ॥

पक्षेऽनुवादद्दोषं प्रसंगात्प्लुतो न भविष्यति इह तर्हि खट्वार्श्या खट्वैषा खट्वानठा खट्वोढा तस्यांतर्यतस्त्रिमात्रः आदेशः प्राप्नोति गुण-
ग्रहणे तु क्रियमाणे गुणसंज्ञायां तपरकरणं सवर्णार्थमिति त्रिमात्रचतुर्मात्राणामगुणत्वात्प्रसंगः तस्माद्गुणग्रहणं। ओत्त्वेग्रत्र
भवतः। आदेकस्य गुणः केन स्थानेन्तरतमो हि सः। एदोतौ नैव तावुक्तावकारो नोभयांतरः। आकारेण त्रिधालोपः प्लुतश्चाविषयेऽस्मतः।
ओत्तर्यात्रि च तुर्मात्रो गुणस्त्वतपरः स्मृतः। इह हलश्शाद्यनि: वृक्षं इमिति स्थिते अकारेकारयोर्गुणः प्राप्नोति कारयोः सवर्णदीर्घत्व- राम०
तत्रशाह्य परविप्रतिषेधाद्दीर्घप्रसंगः तथा तच्छत्राञ्जपश्यामोः इदं पचेरुत्तमैकवचनमिट्शपूर्यपचरे इदं नैवदोषः एकस्मदात्प्रयत्ना- ३१
दंतरंगो गुणो भविष्यति प्रागेव पदांतरसंनिधानात्॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीश्च॥ ॥श्रीः॥ ॥

लृकारस्यस्थानऽइति।यथाचैतल्लभ्यतेतथालणिसूत्रआख्यातं।। ।।एत्येधत्यूठ्सु।। ।।नपुनरेधतेरव्यभिचारादितिवाकूल्याभिप्रायेणोक्तदु
क्तं।अस्तिह्यस्यापिव्यभिचारः उपधाह्रस्वत्वेमाभवानेदिधदितिवेलाकुः।प्रष्ठौहइतिप्रष्ठंवहतीतिछंदसिसहः वहश्चेतिण्विः।वाहऊठिसंप्र
संप्रसारणे।पूर्वत्वंततोवृद्धिः।एत्येधत्योरेङि पररूपापवादइति।वृद्धिविधावेतरस्यानुषंगः यथैवत्ताहिएङि पररूपंधातेएवमाङि पररूपमपिबा

लृकारस्यस्थानेयोणाल्तस्यलपरत्वमिष्यते।। ।।वृद्धिरेचि।। ।।आदितिवर्त्तते अवर्णात्परोयएच् एचिचपूर्वोयएच्
तयोःपूर्वपरयोःस्थानेआद्गुणापवादोवृद्धिरेकादेशोभवति।। ब्रह्मैलकाखट्वैलकाब्रह्मैतिकायनः खट्वैतिकायनः ब्रह्मौ
दनंखट्वौदनंब्रह्मौपगवः खट्वौपगवः।। ।।एत्येधत्यूठ्सु।। ।।वृद्धिरेचीतिवर्त्ततेआदितिचतदेतदेज्ग्रहणमेतेरेवविशेषणं
नपुनरेधतेरव्यभिचारात् ऊठश्चासंभवात् इण्गतावित्यस्मिन्नेतावेधवृद्धावित्यस्मिन् ऊठिचपूर्वोयद्वर्णात्तस्मात्परो
यएच्तयोः पूर्वपरयोर्वृद्धिरेकादेशोभवति।उपैति उपैषि उपैमि उपैधते प्रैधते।उह।प्रष्ठौहः प्रष्ठौहा प्रष्ठौहे।ऊठ्ग्रहणं गुणा
पवादोवृद्धिर्विधीयते एत्येधत्योरेङि पररूपापवादः।ओमाङोश्चेत्येतत्पररूपंनबाध्यतेयेननाप्राप्तेयोविधिरारभ्यतेसतस्य
बाधकोभवतीतिपुरस्तादपवादाअनंतरान्विधीन्बाधंतेनोत्तरानितिवातेनेहनभवतिउपआइतः उपेतः।एवीत्येवउ
पतः उपेतः ३७ ।। ।।श्रीः।। ।।७।। ।।

बाधेतनाप्राप्तेपररूपेतस्माद्वृद्धेरारंभात् इत्यतआह ओमाङोश्चेतत्त्विति।कुतइत्याह येनेति।सतस्यबाधकोभवतीतितस्यैवबाधकोभ
वत्बाधस्याश्यंभावित्वात्तावतैवबाध्यत्वेविनार्थत्वात् नचाप्राप्तेएङि पररूपेपिवृद्धिरारभ्यतेआङि पररूपेतुआइतः एतः प्रेतः
परेतःइत्यत्रप्राप्तेउपेतिप्रेतीत्यत्रत्वप्राप्तेतस्मात्तन्नबाधते।यदिहाणंतरमाहपुरस्तादिति।अनंतरेबाध्येनिर्ज्ञीतेत न्यायाध्यवचनेस्य
चरितार्थत्वात् तु उत्तरेणसहस्पर्धायांपरत्वात्तदेवभवतीतिभावः ३९

५(ज)

स्का॰ ५०१ अक्षौहिणीति। अक्षैरूहते व्यूहतीति वा ऊहकेणिनिः साधनं कृतेति समासः। स्वैरमिति ईरगतौ ईरणमीरः भावे घञ् स्वेनाभिप्रायेणेरणं स्वैरं
३८ कर्तृकरणे कृता बहुलमिति समासः। क्रियाविशेषणत्वाल्लोकाश्रयत्वाल्लिंगस्य नपुंसकत्वं। स्वेनाभिप्रायेणेरितुं गच्छतीति स्वैरी सुप्यजातौ
णिनिः। ईरिग्रहणमनर्थकं पदात्स्वैरिबाह्येतिनिपातनात्त्रिरूपं स्वैरशब्दादिनामत्वर्थीये न सिद्धं णिनिस्त्वनभिधानान्न भविष्यति। प्रादि
त्वादि ऊह ऊढि एष एष्य इमेतासु न रपदानि दृश्यन्ते रिच्छन्ते रिच्यमाने तेर्वा ये दाराय त ततः प्रेष्यः प्रेष्यः यत्र अजत दो प्रेषः एङि पररूपापवादोऽयं

अक्षादूहिन्यांवृद्धिर्वक्तव्या। अक्षौहिणी। स्वादीरेरिणोर्वृद्धिर्वक्तव्या। स्वैरं स्वैरी। प्रादूहोढोढ्येषैष्येषु वृद्धिर्वक्तव्या। प्रौहः प्रौ
ढिः प्रैषः प्रैष्यः। ऋते च तृतीयासमासे। अवर्णाद्वृद्धिर्वक्तव्या। सुखेन ऋतः सुखार्तः। ऋत इति किं सुखेन इतः सुखे
न इतः सुखेनेतः तृतीयाग्रहणं किं परमर्तः। समास इति किं सुखेन ऋतः। प्रवत्सतरकंबलवसनानामृणे वृद्धिर्वक्तव्या। प्रा
र्णं वत्सतरार्णं कंबलार्णं वसनार्णं। ऋणार्णदशाभ्यां चेति वक्तव्यं। ऋणार्णं दशार्णं।। ।।आटश्च।। ।।एचीति निवृत्तं अ
चीति वर्तते आटः परो योऽच् अच्च पूर्वे आटश्च यौ पूर्वपरयोराडचोः स्थाने वृद्धिरेकादेशो भवति। ऐक्षिष्ट ऐक्षत ऐक्षि
ष्यत। औभीत् औब्जीत् आर्च्छीत्। चकारोऽधिकविधानार्थः उस्योमाङ्क्ष्वपररूपबाधनार्थः।। ।।७।। ।।

ढिः ईष्यशब्दे तु प्रेष्य इति भवति तथा आऊहः आ ओढः प्रोढः सोमाङोश्चेति पररूपं भवति पूर्वोपात्तस्य अणस्यापनयनाय यदृणमन्यदुपात्तं त
दृणार्णं। दशार्णाशब्दो नदीविशेषस्य देशविशेषस्य च संज्ञा।। ।।आटश्च।। ।।ईक्षि दर्शने उभं उभ पूरणे उब्ज आर्जवे ऋच्छ हृष्टौ इत्येतेषामुदाह
रणानि चकारोऽधिकविधानार्थ इति अस्यैव विवरणं उस्योमाङ्क्ष्वपररूपबाधनार्थ इति उसि ओमि आङि च पररूपं प्राप्नोतीति तद्बाधनार्थमिति स्क॰
र्थः अन्यथा परत्वात्तदेव पररूपं स्यात्।। ।। ३८

ओस्त्रीयदिति। अनर्थके प्युसिप रूपविधानात्तत्रप्रसंगः॥ ॥उपार्च्छतीति ऋच्छगतीद्रियप्रलयमूर्त्तिभावेषु प्रर्च्छकोटेश इति अत्र यत्कि
याप्रयुक्ताः प्राद्यइति गामिंशति प्रशब्दस्योपसर्गत्वेनर्च्छतिं प्रतीति भवति प्रत्युदाहरणं। वासुप्यापिशलेरिति हि विकल्पः स्यादिति नो अत्रार्थ
तयरकरणमिति भावः॥ धातुग्रहणमनर्थकं उपसर्गेणैव धातोराक्षेपात् यत्र चोपसर्गत्वं न संभवति तत्रोपसर्गग्रहणेन प्राद्यो पिल ॥

ओस्त्रीयत् ओंकारीयत। आ जढा ओ गता मेच्छत् ओढीयत॥ ॥उपसर्गादृति धातौ॥ ॥आदित्येव अवर्णान्तादु ॥
पसर्गादृकारादौ धातौ आद्गुणापवादः पूर्वपरयोर्वृद्धिरेकादेशो भवति तया र्च्छति प्रार्च्छति उपा र्ध्नोति प्रार्ध्नोति। उपसर्गा
दिति किं खट्वर्च्छति। प्रगता ऋच्छका अस्मादेशात् प्रर्च्छको देशः। ऋतीति किं उपइतः उपेतः। तपरकरणं किं उपॠकारीयति उ
पकारीयति वासुप्यापिशलेरिति हि विकल्पः स्यात्। उपसर्गग्रहणादेव धातुग्रहणे सिद्धे धातुग्रहणं शाकलनिवृत्त्यर्थं अ
सक इति शाकल्यस्य मते प्रकृतिभावः प्राप्नोति॥ ॥वासुप्यापिशलेः॥ ॥आदित्येव उपसर्गादृति धातावित्येव। सुब
न्तावयवे धातावृकारादौ परत अवर्णान्तादुपसर्गात्पूर्वपरयोरापिशलेराचार्यस्य मते न वृद्धिरेकादेशो भवति। उपर्षभीय
ति उपार्षभीयति। उपल्कारीयति। उपाल्कारीयति ॠकारलृकारयोः सावर्ण्यविधिरिति ॠतीति लृकारो गृह्यते। आ
पिशलिग्रहणं पूजार्थं वेति पुंस्त्रत एव ३८
संते यथा नासिकायां नसभावविधौ ग्रहणमुख्यमेवोपसर्गत्वं संभवति तत्किं धातुग्रहणेनेत्यत आह उपसर्गग्रहणादेवेति। शाकल्यस्ये
दं शाकलं तस्य निवृत्त्यर्थं पुनर्धातुग्रहणं सति तु धातुग्रहणे योगविभागे न पुनर्वृद्धिर्विधीयते इति शाकलं बाध्यते असति तु तस्मिन्
शाकल्यमते न प्रकृतिभावः स्यादेव॥ ॥वा सुपि॥ ॥सुबन्तस्य धातोरसंभवात्सुपीत्येतद्धातोरवयवव्यवहारकं विशेषणमित्याह सु
बन्तावयवे धाताविति। आचार्यग्रहणेनैव संज्ञाविकल्पयोर्विसिद्धयोः पुनर्वाग्रहणमाचार्यग्रहणस्य प्राधा

[illegible] ३९

टीका·प·१
३९

औतोम्॥ ॥गांपश्येति। ननु वात्र गोतो णिदिति णित्त्वे सति परत्वाद् वृद्धौ कृतायामोकाराभावादात्त्वेन नं भाव्यं अलविधानं तु घोशब्दार्थं स्या
न्नहि तत्र णित्त्वमस्ति गोतइति वचनादित्यत आह घोमहो पीत्यादि। सत्यं यदि तत्र णित्त्वं न स्यात् अस्ति तु तत्रापि णित्त्वं गोतइत्यस्यौकारांतोप
लक्षणत्वात् वर्णनिर्देशो वा तपरत्वप्रसिद्धेः ततः किमित्यत आह तेनेति शब्दा हृच पर्यादिति सुपस्वबहिशात्सोत्रसंभवः नान्यस्या वीत्यधिकारात् अ
चिनवम सुनवमिति चिनोतेः सुनोतेश्च लङ् तस्य मियामिस्यमि कृते विकरणस्य गुणावादेशौ॥ ॥एङि· पररूपं॥ ॥इत्यमेः सोऽचुरादिः

औतोम्शसोः॥ ॥ओतः अमि शसि च परतः पूर्वपरयोराकारादेशो भवति। गां पश्य गाः पश्य। घोशब्दो घ्योकारांतो
विद्यते ततोपि सर्वनामस्थानं णिन्निदिष्टे तेन वृद्धौ प्राप्तायामपवादाकारो विधीयमानः तां बाधते अमिति द्वितीयैकवचनं
गृह्यते शसा साहचर्यात् सुपीति वाधिकारात् तेनाचिनवमसुनवमित्यत्र न भवति॥ ॥एङि· पररूपं॥ ॥आदिति चउप
सर्गाद्धातोरिति च। अवर्णान्तादुपसर्गादेङादौ धातौ परतः पूर्वपरयोर्वृद्धिरेचीत्यस्यापवादः पररूपमेकादेशो भवति।
उपेलयति प्रेलयति। उपोखति प्रोखति। केचिद्धासुप्यापिशलेरित्यनुवर्तयंति तद्धा कामेरेन सुब्धातौ विकल्पं करोति।
उपेलकीयति उपैलकीयति॥ उपोदनीयति उपौदनीयति। शकंध्वादिषु पररूपं वक्तव्यं। शकन्धुः शकंधुः। कुलटा
टाकुलटा। सीमंतः केशेषु। सीमन्तः सीमंतः अन्यत्र सीमांतः॥ ॥श्रीकृष्णाय नमः॥ ॥श्री ॥

ओरत्वश्चारहरति भ्वादौ पद्यते। केचिद्धासुप्यापिशलेरित्यनुवर्तयंतीति। यद्येवं तेन सह्यास्यैकवाक्यतायां असुब्धातुषु नास्य प्रवृत्तिः स्या राम०
तदित्यत आह तद्धेति अत्र मारस्यानमेव शरणं। शकंध्वादिष्विति। शकंध्वादयः प्रयोगतोनुसर्तव्याः तेषु पररूपं वक्तव्यं कुलटायां वा ३९
कृतं तेभ्य इत्यादि निर्देशो भिन्नार्थे लिंगं अंधुः कूपः वहति कुलान्यटति नैकस्मिन् कुले वा स्थितेति कुलटा पचादिष्वयं पठितव्यः अ
न्यथा कर्मण्यण् स्यात्॥ ॥

।एतेवानियोगइतिनियोगोवृद्ध्यभावोनियमोवधारणंततोऽन्यत्रार्थेपररूपंभवतिउदाहरणेनवक्तव्यावेवशब्दः यथाक्वेवभोक्ष्यसइतिअ
वधारणेतुवृद्धिरेवभवतिअमेवाव्ययेनथातोऽन्यत्रमित्रसेवाइहेवसंतः प्रजितघातयामः ममेवमच्चइहक्वान्यत्रइत्यादि।ओतुविरालः।
उवोविनिपातउपसंख्यानंवीतिसप्तमीनिर्देशात्तस्यादिविधिः वकारादौनिपातेपरतः तुतुइत्येतयोः पररूपंभवति।तुवेत्ते।एक
एववार्थनिपातः अर्थभेदात्पदान्तरेणनिपातेनैकत्वादिति अतएववनेतद्धितिकारेणपठितं। सूत्रेपररूपग्रहणमुत्तरार्थमिहत्वे

।एवेवानियोगेपररूपंवक्तव्यं।इहाएवइहेव।अद्यएव अद्येव।अनियोगइतिकिं इहैवभवमान्यत्रगाः ओत्वोष्ठयोः
समासेवापररूपंवक्तव्यं। स्थूलओतुः स्थूलोतुः।स्थूलौतुः।बिंबओष्ठी।बिंबोष्ठी। समासइतिकिं निष्ठदेवदत्तोष्ठं
पश्य।एमन्नादिषुछंदसिपररूपंवक्तव्यं।अपांत्वाएमन् अपांत्वेमन् मादयामि।अपांत्वाओद्मन् अपांत्वोद्मन्
॥ ॥ओमाङोश्च॥ ॥आदित्येवअवर्णान्तादोमिआङिचपरतः पूर्वपरयोःपररूपमेकादेशोभवति।कात्रोमि
त्यवोचत कोमित्यवोचत।आङि।आ ऊढा ओढा।अद्य ऊढा अद्योढा।कदा ओढा कदोढा।हृद्धिरेचीत्यस्यापवादः।इहतु
आ अर्श्यः अर्श्यः अद्य अर्श्यः अद्यर्श्यः इत्यकः सवर्णे दीर्घत्वं बाध्यते॥ २९॥ ॥श्री४॥ ॥श्री४॥ ॥

ङीमेवसिद्धे आङि परत एकादेशो भवतीति।रूपग्रहणंचिंत्यप्रयोजनंतथाचामिपूर्वइत्यत्ररूपग्रहणंनकृतं॥ ॥ओमाङोश्च॥ ॥
अद्योढेति। आ ऊढा इत्येकादेश आङ्ग्रहणेन गृह्यत इति भवत्युदाहरणं।अत्रेवथान्तरपसर्गयोः कार्यमंतरंगमिति पूर्वमाद्गुणे कृते
पश्चात्थशब्देन संबंधे वृद्धिः प्राप्नोति एवं लोढरूपमपि नष्टमथमागतइत्यादौ तत्र सवर्णदीर्घत्वेमसिद्धंरूपं। अकः सवर्णे दीर्घत्वं
बाध्यतइति। ननुचमध्येऽपवादन्यायेन वृद्धेरेवबाधोयुक्तो न तु दीर्घत्वस्य नैष दोषः वकारोऽत्र क्रियते स पुनर्विधानार्थो भविष्यति २९

टिका॰प॰१

५०

उस्यपदांतात॥ ॥ रेभिंधुरितिभिदेर्लिङ् यासुट् झेर्जुस् रुत्वं असोरल्लोपः लिङः सलोपोऽनंत्यस्येति सलोपः भिंद्यात् उस् अनेन पररूपं अदुरि
ति दाञो लुङ् गातिस्थेत्यादिना सिचो लुक् आत इति झेर्जुस् अदा उस् अनेन पररूपं। क्षोस्त्विति ननु वानर्थकत्वादेवास्यासोग्रहणं न भ
विष्यति एवं तर्हि एतत् ज्ञापयति अनर्थकस्याप्युसोग्रहणमिति तेन भिंद्युरित्यादाविव उसि पररूपं भवति अत्र हि याम्रशादिः समुदायोऽर्थवानन्तु न
द्वयवयवउसः। कोषितेति। वसेः क्तः वसतिक्षुधोरिडित्यत्र दिना सम्प्रसारणं शासिवसिघसीनां चेति षत्वं तेन स्यात् सिद्धत्वात् उसि न पररूपं भ

उस्यपदांतात॥ ॥ आदित्येव अवर्णादपदांतात् उसि परतः पूर्वपरयोराद्गुणापवादः पररूपमेकादेशो भवति। भिं
द्यात् उस् भिंद्युः छिंद्यात् उस् छिंद्युः अदा उस् अदुः अधा उस् अधुः। अपदांतादिति किं का उस्रा का उस्रा। का उषिता कोषि
ता आदित्येव चक्रुः अबिभयुः॥ ॥ अतो गुणे॥ ॥ अपदांतादिति वर्त्तते। अकारादपदांतात् गुणे परतः पूर्वपर
योः पररूपमेकादेशो भवति। पचंति यजंति। अकः सवर्णे दीर्घ इत्यस्यापवादः। पचे यजे। अत्र हि वृद्धिरेचीति वृद्धिः प्राप्नोति
अतः इति किं यांति वांति। गुणे इति किं अपचे अपचते। अपदांतादित्येव दंडाग्रं यूपाग्रं॥ ॥ श्रीकृष्णायनमः ४ ॥

वति अस्य तु लाक्षणिकत्वादेवाग्रहणं सिद्धं अबिभयुरिति भियो लङ् शपः श्लुः सिजभ्यस्तेत्यादिना झेर्जुस् जुसि चेति गुणः॥ ॥ अतो गुणे॥
॥ अकः सवर्णे दीर्घ इत्यस्यापवाद इति ननु च मध्येऽपवादान्यायेन वृद्धिरेवापवादो युक्तो न दीर्घस्य। गुणग्रहणाद्दीर्घस्यापि बाधको भविष्यति अ
न्यथा तो यद्यंतादिति वक्तव्यं एङि पररूपवत् तत उसि च अपदांतादित्येव एवं सिद्धे गुणग्रहणात् गुणमात्रे यं विधिः प्रवर्त्तमानो दीर्घमपि बाधिष्यते। राम
अतः इति किमिति आदिति वर्त्तत एवेति प्रश्नः। तपरकरणे तात्पर्यमित्युत्तरं॥ ॥ छ॥ ॥ छ॥ ॥ = = ॥ = = ॥ ॥ ५०

अव्यक्तानुकरणस्य ॥ ॥अव्यक्तमपरिस्फुटवर्णमिति। अपरिस्फुटा अनभिव्यक्ता अकारादयो वर्णा यस्मिंस्तत्तथा। कथं घेवं तदनुकरणेनापि तथा
विधेनैव भाव्यं सदृशं ह्यनुकरणं भवतीति तत्रश्चानुकार्यस्वतन्त्राऽपि नैवाव्यक्तो ह्यवधार्यते अनवधारिते चाउकं पररूपं कर्तुं तत्राह तदनुकरणं परिस्फुटवर्ण
मेवेति। अथ कथं तर्हि तेनानुक्रियते तेन हि विसदृशमनुकरणं भवत्यतिप्रसंगो वा स्यात् अत आह केनचित्सादृश्येनेति। तत्पुनः सादृश्यं ध्वनेस्तुल्यता यया तेन
स्यमक्तमनुकार्यमनुकरोति पुरुषः नत्वनुकरणं कर्तृ अव्यक्तं कर्मानुकरोतीति करणस्य कर्तृत्वविवक्षया कर्तृप्रत्ययः। अनुकरणाउ ह्यस्तुकर

अव्यक्तानुकरणस्यात इतौ ॥ ॥अव्यक्तमपरिस्फुटवर्णं तदनुकरणमपरिस्फुटवर्णमेव येन केनचित्सादृश्येन तदव्यक्तम
नुकरोति अव्यक्तानुकरणस्य योऽच्छब्दस्तस्मादितौ परतः पूर्वपरयोः पररूपमेकादेशो भवति। पटत् इति पटिति। पठत् इति प
ठिति। अव्यक्तानुकरणस्येति किं जगत् इति जगदिति। महत् इति महदिति। इताविति किं पटत्त्र। अनेकाच इति वक्तव्यं
इह मा भूत् श्रदिति। कथं घटदिति गंभीरमंबुदैर्नदितं इकारांतमेवैतदनुकरणं द्रष्टव्यं ५० ॥ ॥श्री४॥ ॥

णास्याधन एव। पररूपमेकादेशो भवतीति। अच्छब्दग्रहणाद्पि सर्वस्मिन्नालोन्त्यस्य नामर्थकेऽलोन्त्यविधिरिति वचनात् ज्ञापकाद्वा यदयं नाम्रेडितस्यो
न्त्यस्य तु वेति अन्त्यग्रहणं करोति तत् ज्ञापयति नात्रालोन्त्यपरिभाषा प्रवर्तत इति। किंच पूर्वापरसमुदायस्यैकादेशस्य स्थानीत्युक्तं ततश्च तदेक
देशे पूर्वस्मिन् खल्वेतत्परिभाषाप्रवृत्तिः कीदृशीति चिन्त्यम्। पटत् इतीति प्रक्रियावाक्यमेतत् न प्रयोगार्हं पररूपस्य नित्यत्वात्। पटितीति। कथं पु
नः पररूपे कृते तेन द्वकार्यस्य प्रतिपादकं भवति कुतश्चास्यानुकरणत्वं। नैष दोषः। यथा गवित्ययमाहेति लक्षणाद्देशमपि गोशब्दस्यानुकर
णं भवति शास्त्रवासनयात ऋदत्राऽपि भविष्यति। इकारान्तानुकरणमेतदिति। तकारान्तानुकरणोऽनुरूपमेवैतत्र स्यात् अपदत्वेन जश्त्वाभावाद्घ
याद्वा टितिकरोतीति ५० ॥ ॥छ॥ ॥

टीका·प०१
४१

नाम्रेडितस्य॥ ॥अव्यक्तानुकरणस्यात इति तस्येति अधिकरणे षष्ठी। अव्यक्तानुकरणस्य पदस्य यदवयवस्तस्मान्नाम्रेडितं ततस्येत्यर्थः। नित्यवीप्सयोरिति द्वि
र्वचनमिति वीप्सायोगस्तु यथा कथंचिद् द्रष्टव्यः। अपर आह। नित्यवीप्सयोरित्युपलक्षणमेतत् डाचि बहुलं द्वे भवत इत्यत्र बहुलवचनात् डाच्यपि द्वि
र्वचनमिति। पटत्विति। द्विरुक्तस्य समुदायानुकरणस्य चार्थभेदो भवति॥ ॥नित्यमाम्रेडिते॥ ॥वार्त्तिकमेवेदं वृत्तिकृता सूत्ररूपेण पठितं डाचि वि
हित इति आम्रेडितग्रहणं तत्रैवेति भविष्यति कः। विधिरित्यर्थः अन्यथा द्वे वचनस्यात् डाजन्तस्य भागान्तस्य डाज्विधावुक्तं पदस्य च
द्विर्वचने डाजन्तस्य भावात्। अपर इति अपरमेव वदन्ति डाचीति विषयसप्तमीति। डाचि विधित्सितः एव द्विर्वचनं क्रियत इत्यस्य प्रयोजनान्तरमा

नाम्रेडितस्यान्त्यस्य तु वा॥ ॥अव्यक्तानुकरणस्याम्रेडितस्य योऽच्छब्दस्तस्य इतौ परतः पूर्वपरयोः पररूपमेकादेशो न
भवति। तस्य योऽन्त्यस्तकारस्तस्य तु वा भवति। पटत्पटदिति पटत्पटेति करोति। नित्यवीप्सयोरिति द्विर्वचनं। यदा तु समुदायानु
करणं तदा भवत्येव पूर्वेण पररूपं पटत्पटिति करोति॥ ॥नित्यमाम्रेडिते डाचि॥ ॥अव्यक्तानुकरणस्यात इतावित्येत
दनुवर्त्तते डाचि परं यदाम्रेडितं तस्मिन्पूर्वस्याव्यक्तानुकरणस्याच्छब्दस्य योऽन्त्यस्तकारस्तस्य पूर्वस्य परस्य वा देवर्णस्य
नित्यं पररूपमेकादेशो भवति। पटपटाकरोति दमदमाकरोति। पटदित्यस्मादव्यक्तानुकरणाद् डाचि विहिते डाचि बहु
लमिति द्विर्वचनं तच्च टिलोपात्पूर्वमिष्यते॥ ॥अकः सवर्णे दीर्घः॥ ॥अकः सवर्णे दीर्घः॥ ॥अकः सवर्णे अचि
परतः पूर्वपरयोर्दीर्घ एकादेशो भवति। दण्डाग्रं दधीन्द्रः मधूदकं होतृ ऋश्यः। अक इति किं अग्नये। सवर्ण इति किं दध्यत्र म

त्वश्चेति। अयमर्थः तद्धि द्विर्वचनं टिलोपात्पूर्वमिष्टं एवं च पूर्वं सिद्ध्यति यदि डाचि विधित्सित एतद्द्विर्वचनं भवति। नान्यथा। पटदिति परत्वे द्वि
र्वचनं स्यात् ततो नान्तरङ्गत्वात्पूर्वं टिलोपे कृते एकाचं तस्य द्विर्वचने पटपटेति न सिध्येत्। यद्वा डाचि विहिते तत्सूत्रार्थः। ननु चोक्तं डाजेव
नस्याद् इति नैष दोषः डाजवयवं द्वे इति भाविषयदेशो यं यस्य डाजवयवं द्वे भविष्यति द्विर्वचनाद् द्विर्वचने कृते टिलोपः समर्थः॥ ॥अकः
सवर्णे॥ ॥अग्नय इति वेरिति गुणे कृते दीर्घप्रसङ्गः दध्यत्रेति अस्मिन्सवर्णग्रहणे यणादेशस्य दीर्घस्य च विषयविभागेन ना

एम०
४१

कुमारीशेतइतिवत्तुचतुल्यास्यप्रयत्नत्वेपिसावर्ण्यमात्रनास्तिनाज्झलाविति प्रतिषेधादित्यतआह नाज्झलाविसूत्रेति। अएकारिस्त्रवर्णस्य चाप्र
त्ययइतिग्रहणाकवाक्यंतत्र नाज्झलाविमस्य प्रवृत्तिसमये नाभिनिर्वृत्तंतस्याहि सवर्णसंज्ञां तेन यावत्तान प्रवर्त्तते तावद्‌नाभिनिर्वृत्तं सवर्णस
ज्ञाविधायपवादेनाज्झलाविमस्मिन्प्रवृत्ते नप्रवर्त्तितेतनश्च पूर्वं नाज्झलाविमस्य प्रवृत्तिः पश्चात्सवर्णसंज्ञायाः प्रवृत्तिः पश्चाद्ग्रहणकवा
क्यस्येति एष क्रमः॥ तेनना ज्झलावित्यत्रागृहीतसवर्णानामेवाग्रहणमितीकारशकारयोः सावर्ण्यप्रतिषेधः सिद्धमिति अचीत्यनुवर्त्तमिति॥

अचीत्येव कुमारीशेते॥ नाज्झलाविसूत्रयदजितिप्रत्याहारग्रहणंतत्रग्रहणकशास्त्रस्यानभिनिर्वृत्तत्वात्सवर्णानग्रहणंतइति
सवर्णत्वमीकारशकारयोरप्रतिषिद्धमेव। सवर्णदीर्घत्वेऋतिऋवावचनं। ऋतिसवर्णेपरभूतेऋवाभवतीतिवक्तव्यं। होतृऋकारः
होतृकारः। पक्षान्तुनऋतदादीर्घः होतृकारः। लृतिलृवावचनं। लृतिसवर्णेपरतः लृवावक्तव्यः। होतलृकारः होतॢकारः
॥ ऋकारलृकारयोः सवर्णविधिर्वक्तव्यः। दीर्घपक्षेतुसमुदायांतरतमस्य लृवर्णस्यदीर्घस्याभावादृकारएवक्रियते ४१
॥श्रीः॥ ॥श्री॥ ॥छ॥ ॥

तिऋवाचवचनमितिमध्येरेफभक्तीद्वेआदितोऽन्तभक्तिरर्द्धमात्राएवमन्ततः एवंलृतीत्यत्रापिपक्षे द्वे लकारभक्तीअमितः पूर्ववत्। एवंद्विमात्रयोर
प्येतयोरीषत्स्पृष्टत्वाद्धिहताभ्यामृकारलृकाराभ्यामसावर्ण्येपिग्रहणाद्दीर्घसंज्ञायाअभावाद्वचनंऋऌतीपमात्रत्वादकालत्वाभावादिप
त्येतत्त्वसवर्णसंज्ञायांप्रपंचितं। दीर्घपक्षेत्वितिऋकारलृकारयोः समुदायःस्थानीनचनस्यान्तरतमोदीर्घः संभवतिऋतोवयवस्यपोन्तरत
मः सएवभवतितत्रापिलृवर्णस्यदीर्घासंभवादृकारस्ययोन्तरतमः सऋकारएवभवति ४१ ॥ ॥श्री॥ ॥छ॥ ॥
॥ छ छ छ छ छ ॥

टीका०प०१

५२

॥प्रथमयोः॥ ॥प्रथमा शब्दो विभक्तिविशेषे रूढ इति। सुपामाद्यत्रिके सप्तस्वीया: प्रथमायाः सप्तमीपंचमीप्रथमाःमकस्मादेतस्यैव ग्रहणा
त्। ननु च हस्वी लिंगाः प्रथमाशब्दोऽत्र रूढो न चास्य हस्वी। लिंगात्वे प्रमाणामस्ति प्रस्तुत प्रथमशब्दः क्तिङां त्रिकद्वये अस्मिन्नेव शास्त्रे संज्ञात्वेन विनि
युक्त इति तस्यैव ग्रहणं युक्तं तत्र अयचतिपचतः पचंति। पचते पचेते पचंते। चकार चक्रतुः चक्रुः। चक्रे चक्राते चक्रिरे इत्यादौ पथामास
विधिंतावाधेनायं विधिर्युक्तः किंचैवं सति मुख्येऽपि प्रथमशब्दे प्रथमयोरिति द्विवचनमुपपद्यते आत्मनेपदपरस्मैपदभेदेन प्रथमस्य
भेदात्। उच्यते एवं सति द्विवचननिर्देशोऽनर्थकः लुटः प्रथमस्येत्यादिविभक्तिरूपत्वात्तत्पद्मा वा सुप्यापिशलेरित्यतः सुपीत्यनुवर्त्तिष्यते तेन

प्रथमयोः पूर्वसवर्णः॥ ॥अक इति दीर्घ इति चानुवर्त्तते प्रथमाशब्दो विभक्तिविशेषे रूढः तत्साहचर्या
त् द्वितीयापि प्रथमेत्युच्यते तस्यां प्रथमायां च द्वितीयायां च विभक्तावचि परतः अकः पूर्वपरयोः पूर्वस
वर्णो दीर्घ एकादेशो भवति। अग्नीवायू॥ ॥अग्नीः॥ ॥अग्नीः॥ ॥अग्नी॥ ॥

न सुप एव प्रथमस्य ग्रहणं लिंगाच्च किं लिंगं दीर्घाज्जसि च तस्माच्छसो नः पुंसीति अत एव लिंगात्सुपापि प्रथमेत्युक्तेति। द्विर्वचनं चात्र
प्रमाणं। ननु सकृच्छ्रुतः शब्दो मुख्यवृत्तिरेव वा भवति जघन्यवृत्तिरेव वा न पुनरुभयवृत्तिः। प्रथमा द्वितीया समुदायेऽत्र जघन्यवृत्तिरेवा
यं सवचस मुदायउक्तातावयवे भेदइति द्विवनोपपत्तिः यथा छत्रिणो गच्छंतीति॥ ॥७॥ ॥७॥ ॥७॥ ॥ एत०
ष्ठ्याः॥ ॥पश्यतोहर इति षष्ठी चानादरे इति षष्ठी यश्चं तमनादृत्य हरतीत्यर्थः। शुनःशेप इति अकारान्तोऽप्यत्ति शेषशब्दः न केवलं सकारा
न्तः शुन इव शेपमपस्येति बहुव्रीहिः एवं पुच्छलांगूलाभ्यामपि बहुव्रीहिः एवं पुच्छलांगूलाभ्यामपि बहुव्रीहिः अविविक्षेषाणामे
ताः संज्ञाः॥ ॥अनतः॥ ॥विद्या च योनिश्च विद्यायोनी अभ्यर्हितत्वाद्विद्यायाः पूर्वनिपातः तत्कृतः संबंधो येषां ते विद्यायोनिसंबंधाः

॥षष्ठ्या आक्रोशे॥ ॥आक्रोशे गम्यमाने उत्तरपदे षष्ठ्या अलुग्भवति। चौरस्य कुलं। दासस्य कुलं। वृषलस्य कुलं। आक्रो
श इति किं ब्राह्मणकुलं। षष्ठीप्रकरणे वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु यथासंख्यमलुग्वक्तव्यः। वाचोयुक्तिः दिशोदण्डः। पश्य
तोहरः। आमुष्यायणामुष्यपुत्रिकामुष्यकुलिं दासस्य कुलं। वृषलस्य कुलं। आक्रोश इति किं ब्राह्मणकुलं। षष्ठीप्रकेति
चालुग्वक्तव्यः। अमुष्यापत्यमामुष्यायणः। नडादित्वात्फक्। अमुष्यपुत्रस्य भाव आमुष्यपुत्रिका मनोज्ञादित्वाद्वुञ्। त
था आमुष्यकुलिकेति। देवानांप्रिय इत्यत्र षष्ठ्या अलुग्वक्तव्यः। सेमपुच्छलांगूलेषु शुनः संज्ञायां षष्ठ्या अलुग्वक्तव्यः। शु
नःशेपः। शुनःपुच्छः। शुनोलांगूलः। दिवश्च दासे षष्ठ्या अलुग्वक्तव्यः। दिवोदासाय गायति॥ ॥पुत्रेऽन्यतरस्यां॥ ॥पुत्रश
ब्दे उत्तरपदे आक्रोशे गम्यमाने अन्यतरस्यां षष्ठ्या अलुग्भवति। दास्याःपुत्रः दासीपुत्रः। वृषल्याःपुत्रः वृषलीपुत्रः। आक्रो
श इत्येव ब्राह्मणपुत्रः॥ ॥ऋतो विद्यायोनिसंबंधेभ्यः॥ ॥ऋकारान्तेभ्यो विद्यासंबंधवाचिभ्यो योनिसंबंधवाचिभ्यश्चोत्तरस्याः ष
ष्ठ्या अलुग्भवति। होतुःपुत्रः होतुरन्तेवासी। पितुःपुत्रः पितुरन्तेवासी। ऋत इति किं आचार्यपुत्रः मातुलपुत्रः। विद्यायोनिसंबंधे
भ्य इत्यत्र पूर्वपदोत्तरपदयोर्ग्रहणं कर्तव्यं। विद्यायोनिसंबंधवाचिन्येवोत्तरपदे यथा स्यात् इह मा भूत् होतृधनं। होतृगृहं
आक्रोशे गम्यमानत्वाद्बहुव्रीन प्रयुज्यते पितुःपुत्र इति प्रख्याता पितुरुत्पन्न इत्यर्थः। विद्यायोनिसंबंधेभ्यः पूर्वोत्तरपदग्रहणमिति सूत्रे यच्च मी
निर्देशात्पूर्वपदानामेव विद्यायोनिसंबंधवाचित्वं लभ्यते नोत्तरपदानां अथ सप्तमीनिर्दिष्टः क्रियेत उत्तरपदानामेव लभ्यते न पूर्वपदानां तस्मादु
भयेषामपि तद्वाचित्वे यथा स्यादिति वक्तव्यमित्यर्थः। अन्यनिवृत्तिपरत्वाद्वास्य नैषा परस्परस्मात्। तेनैकोऽपि भवति होतुःपुत्रः पितुरन्तेवासीति

॥आनङ्॥ ॥अत्र पद्यकारस्य द्वंद्वे आनङ् भवतीत्येवं विज्ञापेत पितृपितामहाद्येष्वानङ् स्यात् ऋत इत्येत स्यानर्थकं प्रकृतत्वात्तस्माद् द्वंद्वविशेषणमृतः
निज्ञातो चेद्येकवचनमिति मत्यमान आह ऋकारांतानामित्यादि इहकार्यार्थः श्रवणार्थो वा वर्णानामुपदेशः नकरस्थापनेन किं चिद् दृश्यते सर्वत्रास्य तल्लो
पः प्राप्ति यदि कोत स्येतिलोपेन भवितव्यं कार्यमपि वा स्य न किंचिदुपलभ्यते तस्मान्नार्थस्तेनेत्यत आह नकारो चारणमित्यादि असतिनकारे टेः स्थाने अ
गो वशिष्यत इति उरण्रपर इति परत्वं स्यात् तस्मिंस्तु सति नायमणो वशिष्यते किं तर्हि णा वाम्य चेति नाम्नि परत्व प्रसंगः तस्मादपरत्व निहत्यर्थं नकारोच्चार
णोऽकारोऽपि चेत्येसादेशार्थः यत्र च निर्दिश्यमानं का प्रीतो विशेषणं न त्रनिर्दिश्यमानस्यादेशा भवंतीत्येत न्नतिनात्र ऋत इतिकार्यणो विशेषणं किं तर्हि

विभाषास्वसृपत्योः॥ ॥स्वसृपतिरित्येतयोरुत्तरपदयोः ऋकारांतेभ्यो विद्यायोनिसंबंधवाचिभ्य उत्तरस्याः षष्ठ्याः अलुग्भवति विभाषा
मातुःष्वसा मातुःस्वसा मातृष्वसा पितुःष्वसा पितुःस्वसा पितृष्वसा यदा लुक् तदा मातृपितृभ्यां स्वसेति नित्यं षत्वं यदा त्वलुक् तदा
मातुःपितुर्भ्यामन्यतरस्यामिति विकल्पेन षत्वं यतिदुहितुःपतिः दुहितृपतिः ननांदुःपतिः ननांदृपतिः॥ ॥आनङृतो द्वंद्वे॥ ॥
ऋकारांतानां विद्यायोनिसंबंधवाचिनां यो द्वंद्वस्तत्रोत्तरपदे पूर्वपदस्यानङादेशो भवति होतापोतारौ नेष्टोद्गातारौ प्रशास्ताप्रतिहर्त्तारौ
योनिसंबंधवाचिभ्यः मातापितरौ याताननांदरौ नकारोच्चारणं रपरत्वनिवृत्त्यर्थं ऋत इति किं पितृपितामहौ पुत्र इत्यत्रानुवर्त्तते
ऋत इति च तेन पुत्रशब्दे ऽप्युत्तरपदे ऋकारांतस्यानङादेशो भवति पितापुत्रौ मातापुत्रौ॥ ॥देवताद्वंद्वे च॥ ॥देवतावाचिनां यो द्वं
द्वस्तत्रोत्तरपदे पूर्वपदस्यानङादेशो भवति इंद्रावरुणौ इंद्रासोमौ इंद्राबृहस्पती द्वंद्व इति वर्त्तमाने पुनर्द्वंद्वग्रहणं सत्यत्र पूर्वपदस्य ग्र
हणं प्रसिद्धसाहचर्यग्रहणार्थं अत्यंतसहचरितेलोकविज्ञाते द्वंद्वमिति निपात्यते तत्र ये लोकप्रसिद्धसाहचर्या वेदे च सहभावेन ये निर्दि
ष्टास्तेषामिह ग्रहणं भवति तेन ब्रह्मप्रजापती शिववैश्रवणौ विसेवमादौ न भवति॥ ॥
द्वंद्वस्य विशेषणं पुत्र इत्यत्रानुवर्त्तत इति पुत्रेऽन्यतरस्यामित्यतः यद्यत्र पुत्र इति वर्त्तते विभाषा स्वसृपत्योरित्यत्राप्यनुवर्त्तेत ततश्च भ्रातुःपुत्र इत्यादा
वनाक्रोशेऽपि विकल्पप्रसंगः एवं तर्हि व्याख्यानात्तत्रैव संबध्यते अन्ये त्वाहुः तत्रैव पुत्र उत्तरपदे पूर्वपदस्यात्रस्यानङ् प्राप्नोति कार्यिणो
निर्देशात् ऋत इति श्रुतस्य द्वंद्वविशेषणत्वात् तत आह ऋत इति चेति अनुवर्त्तत इत्यनुषंगः ऋतो विद्यायोनीत्यत ऋत इत्यनुवर्त्तते तत्कार्यिणां विशेष
विष्यतीत्यर्थः यद्यपि तत्पदं सम्यक् तथापि तदिह व्याख्यानात् षष्ठ्यंतं विपरिणम्यते॥ ॥देवता॥ ॥ऋकारांतार्थमविद्यायोनिसंबंधार्थं च वचनं द्वंद्व
इति वर्त्तमाने इत्यादि प्रकृतं हि द्वंद्वं इहस्येत्यत्राभिव्यक्तिग्रहणेनासंनसहचरित युगले द्वंद्व इति णवत् साहचर्यमेव विशिनष्टि तत्रेति सहवापः स

टीका-प०१

१२७

उभयत्रेति पूर्वपदत्वेनोत्तरपदत्वेनेत्यर्थः॥ ॥इद्वृद्धौ॥ ॥अत्र वृद्धिमदुत्तरपदं वृद्धिशब्देनोच्यते वृद्ध्यात्मकस्योत्तरपदस्यासंभवात्। अग्नीवरु
णौ देवते अस्य आग्नावरुणौ देवते अस्येति विग्रहः पूर्वत्रेत्वमुत्तरस्यानङ् षष्ठ्यर्थेन देवतात्वमिति देवतैकवचने आनङ् ईत्वं च बाधितुमिति वरुणे
ति तस्य प्रसंगः आनङ्॥ यद्यपि प्राग्वृद्धेर्विग्रहे आनङीत्वयोः प्रसंगस्तथापि वदर्थविषयत्वात् प्रक्रियावाक्येन क्रियेते लौकिके तु वाक्ये भ
वत एव वृद्धौ विष्णोः प्रतिषेधः आग्नावैष्णवमेकादशकपालं निर्वपेत ७ ॥दिवसः॥ ॥दिवस इति प्रथमान्तं अकारोच्चारणं किमर्थं पा

उभयत्र वायोः प्रतिषेधो वक्तव्यः। आग्निवायू। वायग्नी॥ ॥ईदग्नेः सोमवरुणयोः॥ सोमवरुणयोरित्येतयोरुत्तरपदयोर्देवताद्वन्द्वे अग्नेरीका
रादेशो भवति। अग्नीषोमौ। अग्नीवरुणौ। अग्नेः स्तुत्स्तोमसोमा इति षत्वं॥ ॥इद्वृद्धौ॥ ॥कृतवृद्धावुत्तरपदे देवताद्वन्द्वे अग्नेरिकारा
देशो भवति। आग्निवारुणीमनड्वाहीमालभेत। आग्निमारुतं कर्म क्रियते। अग्नीवरुणौ देवते अस्य अग्नामरुतौ देवते अस्येति च विग्र
हे तद्धितः तत्र देवताद्वन्द्वे चेत्युभयपदवृद्धौ कृतायामानङ् ईत्वं च बाधितुमिकारः क्रियते। वृद्धाविति किं आग्नेन्द्रं। नेन्द्रस्य परस्येति वृद्धिः
प्रतिषिध्यते। इद्वृद्धौ विष्णोः प्रतिषेधो वक्तव्यः। आग्नावैष्णवं चरुं निर्वपेत ७ दिवो द्यावा॥ ॥दिव इत्येतस्य द्यावा इत्ययमादेशो भवति दे
वताद्वन्द्वे उत्तरपदे। द्यौश्च पृथिवी च द्यावापृथिव्यौ। द्यावाभूमी॥ ॥दिवसश्च पृथिव्यां॥ ॥पृथिव्यामुत्तरपदे देवताद्वन्द्वे दिवो दिव
स इत्ययमादेशो भवति चकाराद् द्यावा च। दिवस्पृथिव्यौ। द्यावापृथिव्यौ। अकारोच्चारणं सकारस्य विकाराभावप्रतिपत्त्यर्थं तेन रु
त्वादीनि न भवन्ति। कथं द्यावा चिदस्मै पृथिवी नमेते इति। कर्तव्योऽत्र यत्नः॥ ॥उषासोषसः॥ ॥उषस उषासा आदेशो भ
वति देवताद्वन्द्वे उत्तरपदे। उषाससूर्यं। उषासानक्ता॥ ॥मातरपितरावुदीचां॥ ॥मातरपितराविति उदीचामाचार्याणां मतेन अ
रङादेशो मातृशब्दस्य निपात्यते। मातरपितरौ। उदीचामिति किं मातापितरौ॥ ॥पितरामातरा च छन्दसि॥ ॥पितरामातरा इति छन्द
सि निपात्यते॥ आमागतो पितरामातरा च। पूर्वपदस्य आरङादेशो निपात्यते उत्तरपदे तु सुपां सुलुगिति विभक्तेराकारादेशः। तत्र अ
वताप्रयोजनाभावात्सकारस्येत्संज्ञा न भविष्यतीति तत्राह अकारोच्चारणमिति अ ॥ तोडि सर्वनामस्थानयोरिति गुणः। छन्दसीति किं माता
सति तस्मिन् पृथिव्या आद्ये परतः सकारस्य रुत्वं विसर्जनीयः कुप्वोः ≍क≍पौ चेत्येते विकाराः प्राप्नुवन्ति अकारस्योच्चारणं भवति तेन प्रयोगे स्याद् विकृतस्यैव ग्रह
णं भवति। कथमित्यादि। इदं द्यावाद्वन्द्वे वर्तते नैव प्राप्नोतीति प्रश्नः कर्तव्योऽत्र यत्न इति छान्दसोऽयं प्रयोगः दृष्टानुविधिश्छन्दसीत्येषोऽत्र यत्नः॥ ॥उषासा॥

म०

१२७

स्त्रियाः पुंवत्॥ ॥अत्र त्रयः पक्षाः संभवंति स्त्रियाः इति स्त्रीप्रत्ययग्रहणं अर्थग्रहणं शब्दग्रहणं चेति तत्र यदि स्त्रीग्रहणं स्वर्यते स्वरितेनाधिकार एव
गतिर्भवतीति स्त्र्यधिकारविहितानां टाबादीनां ग्रहणं स्यात्तेषां यथा गोस्त्रियो रुपसर्जनस्येत्यत्र लटाद्याप्य समर्थो भवति भाषितपुंस्कात्परे टाबादि स्त्रीप्रत्य
यो यथा पुंसि न भवंतितथा उत्तरपदेन भवंतीति न च श्रुतक्रियापरेषु वाक्येषु भवतीत्यध्याहारो मत्वर्थः उच्यते वतिनिर्देशोऽयं प्रधाने सत्त्वा अ
सत्त्वा सप्यप्रसिद्धा सोऽयमेवेति दृष्टान्तो यथोशीनरवन्मद्रेषु यवाः संतिन संतीति तथा पुंसि स्त्रीप्रत्ययस्याभावात्स्त्रियामप्यभावोऽतीति दृष्यते इति न
भवतीत्येव वाक्यशेषः परिकल्पनीयः तदा च डि- त्यनेन सामानाधिकरण्यात् स्त्रियाः इति प्रथमार्थे षष्ठी पुंवदिति सप्तमी समर्थाद्वतिः तत्र च प्रागेव
समासात् स्त्रीग्रहणं स एव स्त्रीप्रत्ययस्य कृतत्वात् न तस्योत्तरपदे परतो न कोऽपि विद्धः चरितिवत् प्राग्भावः शक्यः प्रतिपादयितुं मेति लुक्कृदि
तलुकी स्यादिवत्कृतस्यानिवृत्तिरेव प्रतिपाद्या प्रिग्रहणे काएव कृताः स्त्रीप्रत्ययात् उत्तरपदे परतो निवर्त्तंते लुप्यंते इत्यर्थः। यदा तु स्त्र्यर्थवाची श

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु॥ ॥भाषितः पुमा
न्येन समाना यामाकृतावेकस्मिन्प्रवृत्तिनिमित्ते स भाषितपुंस्कः शब्दः ९ ॥ ॥

दः स्त्रीशब्देनोच्यते तदा शब्दग्रहणं स्त्रियाः स्त्रीलिंगस्य शब्दस्येव रूपं भवतीति रूपातिदेशः प्रवृत्तिविषये पुंशब्दसंबंधिनः कार्यस्यातिदेशस्य
स्याभावात् तत्र च प्रसामस्तेः पुंभावभाजः स्त्रीशब्दस्य प्रयोगांतरे पुमांसमाचष्टाणस्य यद्रूपं तदेवातिदिश्यते न यस्य कस्यचित् अनड्डितिषष्ठ्यर्थे
पथमात् तत्रार्थग्रहणे स्त्रीशब्दो मुख्यः अर्थस्य तु न परेणैव पर्यंसमनड् त्वं स्वतो नुपपन्नमिति शब्दद्वारकमाश्रयणीयं तयोस्तु पक्षयोः
स्त्रीशब्दोऽतोऽणः पौर्वापर्याद्विकं तु समंजसमिति न प्रमाणतः पद्मविशेषपरिग्रहः संभवतीति निर्दिष्टिस्य पक्षे परिन्यासः तत्राद्ये पक्षे एतभार्यस्येत
श्येन्द्ववर्णादनुदात्तादिति ङीपितकारस्य च नकारे एकदेशविकृतस्यानन्यत्वादेनशद्भाद्भाषितपुंस्कास्परईकारइति निवृत्तावप्यर्थस्य स्त्रीत्व
मनिवृत्तमिति नकारः श्रूयते न च संनियोगशिष्टानां टीकारनिवृत्तौ नकारस्यापि निवृत्तिः उत्तरपदनिमित्तायाः स्त्रीप्रत्ययनिवृत्ते नकारनिवृत्त्या
स्येप्रर्वविधो स्या निवद्भावे समस्तरा भावस्या सिद्धे। न च नकारस्यापि स्त्र्यधिकारविहितत्वात् टाकारवत्तु वद्भावेनैव निवृत्तिः तस्य भाषितपुंस्का
त्परत्वाभावात् अप्रत्ययत्वेनोऽङ् सादृश्याभावाच्च तथा पट्वी भार्या यस्य पटुभार्य इति निवृत्तस्यापि स्त्रीप्रत्ययस्यानिवद्भावाघणादेशः स्यात् अय

ई का० ५०२

१२८

न्नरूपदेयतोत्रङ् स्त्रीप्रत्ययो भाषितपुंस्कमेतत्तदेतद्दोषाभावेपि लुगलुगस्त्रीविषयश्चिस्त्रीप्रत्ययेपुदोषः। लुक्का वर्जनं उस्यापत्यं स्त्रीवनंडाश्च लुक स्त्रियांशा
र्ङ्गरवादिपाठात् ङीरन्वर्तंडीचासौ वृन्दारिकावाता तेयः ह्रंदारिकेतिपुंवत्कर्मधारयेति ईकारस्यनिवृत्तावपि अर्थगतस्य स्त्रीत्वस्यानिवृत्तत्वात् लुक् स्त्रियामि
तिपञोलुक् प्राप्नोति एवादेर्तत्। स्त्रीईस्त्रीतिइकारप्रश्लेषेण स्त्रियांपर ईकारस्तत्रयरनीलोपः अत्र तु पुंवद्भावेनेकारस्यानुपपन्नत्वाल्लुङ् भविष्यतीति
तन्नश्तरेतए अश्रयप्रसंगात् कथं शार्ङ्गरवादिषु वर्तते आह: कृतयत्र लुक् पद्यतेत तत्र श्वाकृतेलु कि ईकारोनास्ति अकृते वेकारे लुकोप्रसंगः। अलुक्
।गार्ग्यस्यापत्यं स्त्रियः गार्ग्यादिभ्यो यञ् यञश्चेति ङीपुगार्ग्यः स्त्रियः गार्ग्यश्चताहृंदारिकाश्च यगीहृंदारिकाइति ङीपि निवृत्तेपि स्त्रीत्वस्यापि वृत्तत्वा
घञतोश्च स्त्रियामितिलुङ् प्राप्नोतिवाक्यवत् लुगेवस्यात्। अस्त्रीविषमः। कुंजस्यापत्यं स्त्री गोत्रे कुंजादिभ्यश्च्फञ् गोत्रे वचरणैः सहेति जातित्वा
न्नाव्रकौञ्जायनी चासौ वृन्दारिका च कौञ्जायन्यवृंदारिका ङीपि निवृत्तेपि स्त्रीत्वस्यानिवृत्तेर्प्रातव्फञोऽस्त्रियामिमस्त्री
विषयेन स्यात्। द्विस्त्रीप्रत्यययोः गार्ग्यस्यापत्यं स्त्री गार्ग्यादिभ्यो यञ् प्राचां ष्फ तद्धितः षिद्गौरादिभ्यश्चेति ङीष् गार्ग्यायणी चासौ वृन्दारिका च गार्ग्यवृन्दारिकेत्यत्र दोष
त्र द्वौ प्रत्ययौ तत्र यो भाषितपुंस्कात्परः ष्फः नासावुत्तरपदे ङीषा व्यवधानात् यश्चोत्तरपदे ङीष् नासौ भाषितपुंस्कात्परः ष्फेण व्यवधानात् तस्य चास्त्रि
यामेव विहितत्वात् इति पुंवद्भाव एव न स्यात् तथा ऋदुदिदीयत्यं स्त्री जनपदशब्दात्क्षत्रियादञ् दरदोपत्यं स्त्री द्व्यञ्मगधेत्यण् तयोरजश्चेति लुक् दरद्भवि दरत्
सा चासौ वृन्दारिका च एउदरिद्वृन्दारिका दरद्वृन्दारिका अत्र पुंवद्भावेन स्यात् तस्मिन्निकारविहितस्य कस्यचित्प्रत्ययस्याभावात्। द्वितीये तु पक्षे अर्थस्य
पुमर्थत्वे निर्दिष्टे तद्वाचीशब्दः प्रवर्तत इति नैते दोषाः किं तु स्त्रियामनपुंसकस्येति ह्रस्वस्य स्थाने पुंवद्भावस्य प्रतिषेधो नोपपद्यते भिन्नविषयत्वात् अत्र चोद्
ह्रस्वत्वमर्थस्य पुंवद्भावः ततः कालिमन्येतात्र विप्रतिषेधेपरमिति ह्रस्वत्वमिष्टं तन्न प्राप्नोति शब्दपक्षे तु द्वयोरप्येकविषयत्वाद्विप्रतिषेधोस्ति पुंवद्भावस्या
वकाशः पत्राविदंतं नास्ति दर्शनीयभार्यः ह्रस्वत्वस्यावकाशः यत्र पुंवद्भावो नास्ति कालिमन्युः भुमानिनि कालिमन्या स्त्री सत्रोभयप्रसंगे परत्वाद्
ह्रस्वत्वं भवति न च कृतेपि ह्रस्वत्वे पुनः प्रसंगविज्ञानात् पुंवद्भावप्रसंगः सकृद्गतिन्यायस्याश्रयणात् न चार्थपक्षे प्यस्त्येकविषयत्वे असंभवाद्विप्रति
षेधः असंभवादित्यस्यैवासिद्धेः। यद्यपि हि पुंवद्भावे सति स्त्रीप्रत्ययस्य निवृत्तौ दीर्घान्तत्वाभावाद् ह्रस्वस्याप्रवृत्तिः तथापि ह्रस्वे प्रवृत्ते प्यर्थस्यानिवृत्तत्वात्पु
वद्भावः प्राप्नोत्येवेत्येवमाद्यपोदुष्टत्वात् नोपपद्यते अपि स्यात् भाषितः पुमान्येनेत्याद्भाषितः पुमान्येन शब्देनेति शब्दे न पदार्थे बहुव्रीहिराश्रीयते तेन ततः
स्त्रियां पुंसि च वर्तमानस्य यस्य प्रवृत्तिनिमित्तं भिद्यते तस्यापि प्राप्नोति द्रोणीभार्यः द्रोणी भार्य इति द्रोणशब्दः परिमाणे पुल्लिंगः गवाद्यस्मां स्त्रीलिंगः पञ्चस
र्द्धकारिकत्वात् परिमाणे पुल्लिंगः भाजनविशेषे तु स्त्रीलिंगः सर्वत्राप्यत्र प्रवृत्तिनिमित्तभेदेपि य एव प्रयोगान्तरेषु पुंसमानाधिकरणस्य स एवोपि प्रति स्त्रियामवर्तत इति

पुंवत्कर्मधारयजातीयदेशीयेषु ॥ ८

का० १२८

यथा पुनरयमर्थः सूत्राक्षरैरेव लभ्यते तथा एव द्युतितं देवमित्यादि तदेतदर्थरूपं एवंप्रकारं कथं भवतीत्यर्थः। प्रवृत्तिनिमित्तलक्षणोऽन्यपदार्थः सम
म्यर्थे बहुव्रीहिरिति सूत्रं एतदुक्तं भवति यस्मिन्प्रवृत्तिनिमित्ते पुमान्भाषितः पुमांसमानवृत्ताण्यस्य प्रवृत्तिनिमित्तं ते नपुंसके उक्तमर्थमाचक्षाणो भा
षितपुंस्क इति नन्वेवमपि द्रोणी भार्य इत्यादौ स्यादेव कथं यस्माद्गगावाद्मा द्रोणीशब्दो वर्तते सोऽपि यदा अर्थ इत्युच्यते तदा भाषितपुंस्के न प्रवृ
त्तिनिमित्ते नपुंस्यते नत्र चार्थशब्दप्रवृत्तिनिमित्तं प्रयुज्यमानत्वं गवादेर्मासदृशं निहितमिति तत्र वर्तमानो द्रोणीशब्दः स्वयं तत्प्रवृत्तिनिमि
त्तमनभिदधानोऽपि वस्तुतस्तदुक्तमर्थमाह नैतदस्ति एवं हि भाषितपुंस्कग्रहणमनर्थकं स्यात् सर्वत्र सुलभत्वात् अतो यः शब्दो भाषितपुं
स्केन प्रवृत्तिनिमित्तेन पुंस्कं विवर्थिते नैव रूपेणाह न स्यात् तेन स भाषितपुंस्को गृह्यते द्रोणीशब्दस्तु द्रोणी स्वजातियुक्ते न रूपेणागवादिना

तदेवं कथं भवति भाषितः पुमान्यस्मिन्नर्थे प्रवृत्तिनिमित्ते से स भाषितपुंस्कः शब्दो नोच्यते तस्य प्रतिपादकोऽपः शब्दः सो
ऽपि भाषितपुंस्कः तत्र अभावो नञ् भाषितपुंस्कादनूङ् यस्मिन् स्त्रीशब्दे स भाषितपुंस्कादनूङ् बहुव्रीहिरयमलुक्च निपा
तनात्संयम्यः तस्य भाषितपुंस्कादनूङः स्त्रीशब्दस्य पुंशब्दस्य ॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥

वर्तते नार्थ्यमानतया एवमपि योर्भार्यापस्य पुभार्य इत्यत्र दिवशब्दस्य स्त्रीलिंगस्य स्वर्ग इति पुल्लिंगः प्राप्नोति येनैव रूपेण स्वर्गशब्देनोच्यते तेनैव
रूपेण दिवशब्देनापीति कृत्वा एवं तर्हि प्रत्यासत्त्या यस्य पुंवद्भावो विधीयते तेनैव यत्र पुमान्भाषित इति विज्ञायते अन्यत्रासनः प्रयोगान्तरे पुमा
समानवृत्ताण्यस्य प्रवृत्तिनिमित्तं तद्युक्तं स्त्रार्थं संप्रत्याचक्षाणस्य स्त्रीशब्दस्य पुंभाषणं द्रष्टव्यां यद्रूपं तदेव ग्राह्यं भवतीत्यर्थः। आतिदेशिका
नातिदेशिकभेदाच्च पुंवदिति वतिनिर्देशः। अनूङिति पर्युदासेऽस्मिन्नञिवयुक्तन्यायेन ऊङ्सदृशस्य रावादेर्ग्रहणात् दे [illegible] शकेस्मा
द्रोस्त्री प्रसज्यप्रतिषेधात्स्यादिति प्रसज्यप्रतिषेधं दर्शयति ऊङोऽभावो ऽनूङिति भाषितपुंस्कादनूङिति पञ्चमीसमासः स्यात् अनूङिति तत्राप्र
थमासमासात् लुमष्टप्रीकं वा षष्ठीयत्से यमर्थो भवति भाषितपुंस्कात्परस्य स्त्रीशब्दस्य पुंशब्दस्येव रूपं भवति नञ्-तस्य तु नेति ततश्च पुंवद्भावमान ॥

टीका प०१
१२९

स्त्रीशब्दस्य भाषितपुंस्कत्वं विशेषणं न स्यात् तत्र को दोषः उच्यते प्रसज्येत अंगारकानाम शकुनयः तेषां कालिकाः स्त्रियः तत एताः कालिकावृन्दारिका
इति एतच्छब्दा ह्यभाषितपुंस्काः स्युः कालिकावृन्दारिका इति तस्य स्त्रीविषयस्याङ्गारकशब्देनाभिधानं तथा प्यस्य वृन्दवा पुरुषस्य योषित् हंसस्य वरटा कच्छ
पस्य डुली सा हि वृषिप्रसंगाः दर्शनीयभार्य इत्यादौ च न स्यात् न ह्यत्र दर्शनीयशब्दो भाषितपुंस्कास्यः प्रथमा यां तु भाषितपुंस्कादित्यनेन समानाधिक
रणात्स्त्रियाः इति पंचमीषष्ठ्योः कस्यचिदर्शस्यासंभवात् ततश्चाभाषितपुंस्कात् स्त्रीलिंगात् परो जङ् स्यः प्रत्ययः पुंवदित्यर्थो भवति तत्र स एव दोषः यः प्र
थमपक्षे तदेवमसमासे दोषाद्व्यधिकरणपदो बहुव्रीहिराश्रयणीय इत्याह भाषितपुंस्कादनूङिस्यादि अलुक् निपातनात्सं च स्याद्वति अलो
किकत्वादस्य निपातनाद्वा इत्यस्य परिहारः लुगपि तर्हि न प्राप्नोति अलौकिकत्वादेवेति यालिङ्गविशेषेण न अनूङिति षष्ठ्यर्थे प्रथमा तदयमर्थोऽत्र स्थितः भा

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणी
प्रियादिषु ६।३।३४
स्त्रीशब्दस्य पुंशब्दस्येव रूपं भवति समानाधिकरणे उत्तरपदे स्त्रीलिंगे पूरणी
प्रियादिवर्जिते। दर्शनीयभार्यः। शोभनभार्यः। श्लक्ष्णचूडः। दीर्घजंघः १०

षितपुंस्कात्तस्मात् ऊङो भावो यस्मिन्नर्थः यस्मिन् स्त्रीशब्दे भाषितपुंस्कात्परो जङ् कृतः इत्यर्थ इति। अपर आह भाषितपुंस्कादिति षष्ठ्यर्थे पंचमी सर्व
नामवत्सर्ववत् भाषितपुंस्कस्य स्त्रीशब्दस्य पुंशब्दस्येव रूपं भवति ऊङः तस्य तु नेति न त्वेवमाश्रीयमाणे यत्र भाषितपुंस्कसंबन्धानन्तरमुत्तरपदं तत्रैव
स्यात् दर्शनीयभार्य इत्यादौ अत्र हि भाषितपुंस्कस्य टाप् श्वे कादिभिः पूर्वमप्यनेन ङ्गाग ङ्गाषितपुंस्कग्रहणेन गृह्यते गार्गी चासौ वृन्दारिका च गा
र्ग्यवृन्दारिकेत्यादौ न स्यात् यो ऽत्र भाषितपुंस्को गार्ग्यशब्दो न तस्यानन्तरमुत्तरपदं ङीपा व्यवधानात् यस्य चानन्तरं गार्गीशब्दस्य नासौ भाषितपुंस्कः स्या
देतदेवं यदि प्रयोगान्तरे भाषितपुंस्कस्य संप्रति स्त्रियां वर्तमानस्य पुंवद्भाव उच्येत न वयं तु स्त्रियां वर्तमानस्यैव भाषितपुंस्कस्य पुंवद्भावं ब्रूमः संभवति
चास्त्रियां वर्तमानस्यैव भाषितपुंस्कत्वं भाषितपुंस्केन प्रवृत्तिनिमित्तेन युक्तः स्त्रियमाहेति कृत्वा एवं च स्त्रीशब्दस्यैवानन्तरमुत्तरपदे पुंवद्भाव इति स
वात्र सिद्ध्यति १० ॥ ॥छ॥ ॥

रामं० १२९

यामणीदृष्टिरस्येति अत्र ग्रामणीशब्दो परिदृष्टक्लिंगएव दृष्टिशब्देन समानाधिकरणो भवति। अत्र यदि पुंवद्भावः स्यान्नपुंसकह्रस्वत्वं निवर्त्तेत।
कथमित्याह। अनवयवभूतगर्भसंबंधः स्त्रियां गर्भिणीशब्दस्य प्रवृत्तिनिमित्तं पुंसि त्ववयवभूतगर्भसंबंधः प्रसूतप्रजातशब्दयोरपि स्त्रियां ग
र्भमोचनं निमित्तं पुंसि तु गर्भधारणं कर्त्तृ सोत्र यत्न इति अंतर्वत्नि वस्तुसंबंधमात्रं गर्भिणीशब्दस्य प्रवृत्तिनिमित्तं अवयवत्वानवत्वेन तत्रं एवं प्रस

स्त्रिया इति किं ग्रामणी ब्राह्मणकुलं दृष्टिरस्य ग्रामणीदृष्टिः। भाषितपुंस्कादिति किं खट्वाभार्यः। समानायामाकृताविति किं
द्रोणीभार्यः। कथं गर्भिभार्यः प्रसूतभार्यः प्रजातभार्य इति कर्त्तृ सोत्र यत्नः। अनूङिति किं ब्रह्मबंधूभार्यः। समानाधिक
रण इति किं कल्याणी माता कल्याणीमाता। स्त्रियामिति किं कल्याणी प्रधानमेषां त इमे कल्याणीप्रधानाः। अपूरणी
मिति किं कल्याणी पंचमी यासां रात्रीणां ताः कल्याणीपंचमा रात्रयः। कल्याणीदशमाः। प्रधानपूरणीग्रहणं कर्त्तव्यं इह मा
भूत्॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

तप्रजातशब्दयोरपि आधानविमोचनरूपेणापत्यसंबंधमात्रं निमित्तमाश्रीयत इत्ययमत्र यत्नः। ब्रह्मबंधूभार्य इति ऊङो निवृत्तिर्न भवति। न को
पधाया इत्यत्रैवोङ्ग्रहणे कर्त्तव्ये पृथक् प्रतिषेधादस्यैव लक्षणस्यं ज्ञापयते ने न ब्रह्मबंधूहंदारिकेयुंवत्कर्मधारयेति षेधविषये विधीयमानोपि पुं
वद्भावो न भवति एष एवार्थो नूङि। त्यस्यत्रानुहत्तैर्लभ्यते अपूरणीप्रियादिष्विस्यं तु प्रतिषेधो भवतीति वक्ष्य मित्यर्थः। एतच्च प्रधाने कार्य
संप्रत्ययात्लभ्यते॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

कल्याणीपंचमीकः पक्ष इति अत्र तिरोहितावयवभेदः पक्षोऽन्यपदार्थः इति तत्र पूरण्या अननुप्रवेशान्नास्ति प्राधान्यं । कल्याणीपंचमा रात्रय इत्यादा
वुद्भूतावयवभेदा रात्रयोऽन्यपदार्थः तत्र यथा प्रथमा रात्रयः समासाभिधेयाः एवं पंचम्यपीति पूरण्याः प्राधान्यं । अथ दृढभक्तिः शोभने भक्ति
रस्येत्यत्र कथं पुंवद्भावः यावता प्रियादिषु भक्तिशब्दः पठ्यते अत आह दृढभक्तिरित्येवमादिष्विति स्त्रीत्वाविवत्वं पूर्वपदस्याविवक्षितमनो दृढभक्तिरिते

कल्याणीपंचमीकः पक्ष इति । अप्पूरणीप्रमाण्योरित्यत्रापि प्रधानपूरणीग्रहणमेवेत्यप्र
त्ययो न भवति । अप्रियादिष्विति किं कल्याणीप्रियः । प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा भक्तिः
सचिवा स्वा कान्ता क्षान्ता समा चपला दुहिता वामना । दृढभक्तिरित्येवमादिषु स्त्रीपूर्वपदस्यावि
वक्षितत्वात्सिद्धमिति समाधेयं ११ ॥श्रीकृष्णायनमः॥ ॥श्रीरामनमः॥ ॥

वमादिष्विति स्त्रीत्वाविवत्वं पूर्वपदस्याविवक्षितमनो दृढभक्तिरित्येवमादिसिद्धिरित्येवं चोद्यसमाधानं कर्त्तव्यमित्यर्थः । दृढशब्दोत्यत्रादार्थनिवृत्तिप
रस्तत्रादार्घे निवृत्तिघ्रणयां चोदनायां स्त्रीलिंगोपादानमकिंचित्करमिति भावः । नैवं सूत्रस्यानादरणीयत्वं लिंगविशेषविवक्षायां दर्शनीयाभा
वैरस्यापि निष्प्रसंगात् । अथेह कथं भवितव्यं पट्वीमृद्वीभार्यो अस्येति षट्कीमृदुभार्य इति भगिन्नमंपत्नोत्तरपदमनंतरं तस्य पुंवद्भावो नेत्तरस्ये
ति ११ ॥ ॥७॥ ॥७॥ ॥

तसिलादिषु॥ ॥अनुवृत्तपदार्थसंबन्धः॥ तत्र तस्त्रेति प्राग्दिशो विभक्तिरिति अद्यायत्तसंयत्प्रत्ययेनेन पुंवद्भावः। इह केचित्तसिलादिषु पठ्यन्ते तेषु पुंवद्भावो
नेष्यते केचिच्चामन्त्रपठ्यन्ते तेषु पुंवद्भाव इष्यते तस्मादाह परिगणनमिति तत्र तसो रूपदाहृतं तत्र तरप्तमपोर्दर्शनीयतरा दर्शनीयतमा चरट्जातीयरोः प
टुचरी पटुजातीया कल्पदेशीयरोः दर्शनीयकल्पा दर्शनीयदेशीया देश्यप्रत्ययस्य नास्ति पाठः रूपप्पाशपोः दर्शनीयरूपा पटुपाशा थम्थालोः

तसिलादिष्वाकृत्वसुचः॥ ॥पंचम्यास्तसिलित्यतः प्रभृति संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुजिति प्रागेतस्माद्ये प्रत्य
या विहितास्तेषु स्त्रियाः भाषितपुंस्कादनूङः पुंवद्भवति। तस्याः शालायाः ततः तस्यां तत्र यस्याः यतः यस्यां यत्र तसिलादिषु प
रिगणनं कर्तव्यं। त्रतसौ तरप्तमपौ चरट्जातीयरौ कल्पदेशीयरौ रूपप्पाशपौ थम्थालौ दार्हिलौ तिल्तातिलौ शस्बहु
ल्पार्थात् पुंवद्भावो वक्तव्यः बह्वीभ्यो देहि बहुशो देहि अल्पाभ्यो देहि अल्पशो देहि। त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः
पट्व्या भावः पटुत्वं पटुता। गुणवचनस्येति किं कठ्या भावः कठीत्वं कठीता। भस्याढे तद्धिते पुंवद्भावो वक्तव्यः। हस्तिनीनां स
मूहो हास्तिकं। अढ इति किं श्यैनेयः रौहिणेयः। कथमग्नायीदेवताऽस्य आग्नेयः स्थालीपाक इति कर्त्रेयोऽत्र पठ्यते। ठक्छसोश्
च पुंवद्भावो वक्तव्यः। भवत्याश्छात्राः भावत्काः भवदीयाः ११ ॥ ॥श्रीकृष्णायानमः॥ ॥श्री॥ ॥

इदमस्थमुः किमश्चेति विहितस्थमुः प्रकारवचने थाल् अनया प्रकृत्या इत्थं कया प्रकृत्या कथं तया तथा दार्हिलोः तस्यां वेलायां तदा तर्हि ति
ल्तातिलोः वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसि सेहकी प्रशस्ताह कृतिः तातिलो नास्ति पाठः अजाविभ्यां थ्यन् अजाये हिता अजथ्या अत्र
वरूपकल्पेषु द्यांतस्य परत्वात् ह्रस्वः पट्वितरा पाटुतमा पट्विकल्पा यद्विरूपा कासित बहल्पार्थस्योति बहल्पार्थादिस्य यस्यापि इस्त तसिलादि

टीका·प०१
१३१

बुद्धत्वमहत्त्वर्थः । हास्तिकमिति यद्यत्र पुंवद्भावो न स्यात् तदा हस्तिनीशब्दात् यस्येति लोपे कृते तस्य स्थानिवत्त्वादस्मिन्नवस्त्रयमादिस्तमिद्धत्वाच्च नस्त
द्धिते इति टिलोपो न स्यादिति पुंवद्भावो विधीयते । ननु छसोऽश्वीत्यनेन पुंवद्भावो न लभ्यते छत्रासहचरी तस्य ठको ग्रहणात् ढ्गे नेयः रौहिणेय इति ढ्के
नरोहिताभ्यां वर्णादनुदात्तादिति ङीप्प्रकारो अत्र पुंवद्भावे सति ढके तेयोरोहितेय इति स्यात् कथमित्याद्यादिपदे पुंवद्भावः प्रतिषिध्यते ततो ग्रे:
स्त्रीवृषाकप्यग्निकुसितकुसीदानामुदात्त इति अग्निशब्दाद् ङीपि कृते ऐकारश्चादेशे च अग्नायी सा देवतास्य अग्नेर्ढगिति वा सर्वत्राग्निकलिभ्यां
ढगिति ग्रामठकि पुंवद्भावप्रतिषेधादाग्नायेय इति प्राप्नोतीति तत्कथमाग्नेय इति कर्त्तव्योऽत्र यत्न इति केचिदाहुः । अत इञ्यपत्येनीयानपत्य इति वक्त
व्यं इय इति सिद्धं भवति कुं ड्मिमा अपत्यमिति गार्गी इञ्योयत्र तत्र पुंवद्भावाभावाद् यस्येति लोपे न स्यस्यानिवद्भावात्रस्तद्धिते इत्यससतिटिलो
पे कौण्डिन्य इति भवति पुंवद्भावे तु प्रतिकौञ्ज इति आपत्ये तु न भवति ढ्गे नेयोरोहिणेय इति यद्यनपत्य इत्युच्यते गार्गस्यापत्यं स्त्री गार्ग्या यणी
तस्याः अपत्यं गोत्रे स्त्रियाः कुत्सने णश्चेति णप्रत्यये कृते पुंवद्भावो न प्राप्नोतीति ततश्च गार्ग्यायणो जाल्म इति स्यात् गार्ग्यो जाल्म इति चेष्यते
तस्मादनपत्य इति न शक्यं वक्तुं कथं कौण्डिन्यः आगस्त्यकौण्डिन्ययोरिति निपातनात् सिद्धं कथं सापत्नः । शत्रुपर्यायः सपत्नशब्दोऽस्ति अ
स्य पत्न इति लिंगात् सशाङ्कं· स्वादिषु पठितव्यः ततः शिवाद्यण् तस्मान्त्वी भ्योठगित्यत्रैव पुंवद्भावप्रतिषेध इति व्याख्यानमेवात्र शरणं ठ
कछसोरिति छसः सिद्धान्तमिति चेति यदसंज्ञाविधानादृद्धत्वाभावाद्दुवनं ठग्रहणं किमर्थं इकादेशे कृते भस्या ढ इत्येव सिद्धं ढाचस्यायामेव य
था स्यात् किमेवं सति भवति इत्सु मुक्तजालक इति कादेशः सिद्धो भवति अन्यथा यदीकादेशे कृते पुंवद्भावः स्यात् ततो यथा प्राप्तिरिति क इत्यत्रैका राम०
देशे कृते कादेशो न भवति एवं भावत्क इत्यत्रापि न स्यात् १२ १३१

स्यङ्॥ ॥अप्रथमस्या इयमस्या इति वैयधिकरण्यप्रदर्शनार्थमिदमुक्तं पूर्वेणैव सिद्धमिति एकस्या एव कर्मत्वात्कर्तृत्वाच्च सामानाधिकरण्यभावा
त्।नकोः॥ ॥मद्रेषु भवा मद्रिका हूणिका मद्रहूणयोः कन् वैलेपिकमिति अण् महिष्यादिभ्यः अत्र भस्याढे तद्धिते इति योपसंख्यानेन कोपधाप्राप्तिः प्र
तिषिध्यते पूर्वेषु तु सौत्री तद्धितवुग्रहणमिति तद्धितस्य यः ककारः यो वा यः ककारः तस्येति वक्ष्यमाणसमर्थः।पाकभार्य इति पाकशब्दः प्रथमव

स्यङ्मानिनोश्च॥ ॥क्यङि परतो मानिनि च स्त्रिया भाषितपुंस्कादनूङः पुंवद्भवति। एनी। एतायते। श्येनी। श्येनायते।
यते। मानिनि। दर्शनीयमानी अयमस्याः दर्शनीयमानिनी इयमस्याः। मानिन्ग्रहणमसमानाधिकरणार्थं च। इ
ह तु दर्शनीयामात्मानं मन्यते दर्शनीयमानिनीति स्त्रियाः पुंवदित्यनेनैव सिद्धं॥ ॥न कोपधायाः॥ ॥ककारोपधायाः स्त्रियाः पुंव
द्भावो न भवति। पाचिकाभार्यः। पाचिकाभार्यः। कारिकाभार्यः मद्रिकाभार्यः पद्रिकाकल्पा। हूणिकाकल्पा। मद्रिकायते। हू
णिकायते। मद्रिकामानिनी। हूणिकामानिनी। विलेपिकाया धर्म्यं वैलेपिकं। कोपधप्रतिषेधे तद्धितवुग्रहणं कर्तव्यं। इह मा
भूत् पाकाभार्यः अस्य पाकभार्यः एकभार्यः॥ ॥संज्ञापूरण्योश्च॥ ॥संज्ञायाः पूरण्याश्च स्त्रियाः न पुंवद्भवति। दत्ताभा
र्यः गुप्ताभार्यः दत्ताप्राशा गुप्ताप्राशा दत्तायते गुप्तायते दत्तामानिनी गुप्तामानिनी। पूरण्याः पञ्चमीभार्यः दशमीभार्यः
पञ्चमीपाशा दशमीपाशा पञ्चमीयते दशमीयते पञ्चमीमानिनी दशमीमानिनी॥ ॥छ॥ ॥ ॥ ॥ ॥

योवाचीत तो ङीबयवा दो ऽनादित्वाद्दाप्॥ ॥संज्ञा॥ ॥संज्ञाशब्दा ये दत्तादिक्रियानिमित्ताः पुंसि च स्त्रियां च लोके प्रयुज्यन्ते तत्तदर्थः
संज्ञाप्रतिषेधः ये त्वेकद्रव्यनिमित्ता दृशानिमित्ता गार्गी संज्ञाशब्दाः तत्राभाषितपुंस्कत्वादेवाप्रसंगः दत्तायते गुप्तायत इति अत्र यद्यपि सत्यपि सति
वा प्रतिषेधे विशेषाभावः तथापि वस्तुजः प्रतिषेधस्य विषयप्रदर्शनार्थः उपन्यासः॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

ई॰का॰प॰१
१३२

॥वृद्धिनिमित्तस्य॥ ॥वृद्धेर्निमित्तं ञणकाः इति निमित्तग्रहणं न कर्तव्यं वृद्धेस्तद्धितस्येव विशेषणं वृद्धेर्यस्य तद्धितः कस्य वृद्धेस्तद्धितः वस्तस्य
निमित्तं यस्मिन् वृद्धिनिमित्तग्रहणाद् धिकरणप्रधानो बहुव्रीहिः अपर आह षष्ठीसमासो द्रष्टव्यः आ घञ्प्रत्यय इत्यर्थः वृद्धिनिमित्तग्रहणाद् बहुवचनान्तस्य
समासः वृद्धीनां निमित्तं णमपि निमित्तं वृद्धिनिमित्तमिति च तुल्यकारस्येगनिमित्तं इह तु सर्वस्येति नास्य भार्या सामान्या भार्या इत्यत्रापि सर्व
पुरुषाभामिति एणप्रत्यये आकारस्य वृद्धिर्भवति तथापि न सो स्वरूपेण वृद्धेर्निमित्तं किं तर्हि णितेन तत्र चेति सरणमपि तत्र मित्त्वमध्ये भ

वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे॥ ॥नेति वर्तते इह वृद्धेर्निमित्तं यस्मिन्स वृद्धिनिमित्तस्तद्धितः स यदि रक्तेऽर्थे विकारे च
न विहितस्तदन्तं तस्य स्त्रीशब्दस्य न पुंवद्भवति स्रौघ्नीभार्यः माथुरीभार्यः स्रौघ्नीपाशा माथुरीपाशा स्रौघ्नीयते माथुरीयते स्रौ
घ्नीमानिनी माथुरीमानिनी वृद्धिनिमित्तस्येति किं मध्यमभार्यः तद्धितस्येति किं काण्डलावभार्यः बहुव्रीहिपरिग्रहः किं
वध्वार्यः पाव द्वार्यः अरक्तविकारे इति किं काषायेण रक्ता काषायी काषायी बृहतिका यस्य स काषायबृहतिकः लोहस्य वि
कारो लोही लोही ईषा यस्य रथस्य स लोहेषो रथः स्वादिरेषः॥ ॥स्वाङ्गाच्चेतो मानिनि॥ ॥स्वाङ्गाद्य उत्तर ईकारस्तदन्तायाः स्त्रिया न पुंवद्भवति अमानिनि परतः दीर्घकेशीभार्यः श्लक्ष्णकेशीभार्यः दीर्घकेशीपाशा श्लक्ष्णकेशीपाशा
दीर्घकेशीयते श्लक्ष्णकेशायते स्वाङ्गादिति किं पटुभार्यः ईत इति किं अविद्यमाना वाः केशा यस्याः सा अकेशा अकेशा
भार्या अस्य अकेशभार्यः अमानिनीति किं दीर्घकेशमानिनी॥ ॥जातेश्च॥ ॥जातेश्च स्त्रिया न पुंवद्भवति अमा
निनि कठीभार्यः बह्वृचीभार्यः कठीपाशा बह्वृचीपाशा कठीयते बह्वृचीयते अमानिनीत्येव कठमानिनी बह्वृचमानिनी
(॥३॥) अयं प्रतिषेधः आ उपसर्जनस्य पुंवद्भाव

पामध्यमाभ्यान्तः काण्डं लुनातीति काण्डलावी कर्मण्यण् टिड्ढाणञिति ङीप् प्र
वदे तेभ्यः परिमाणे वतुप् आ सर्वनाम्नः उगितश्चेति ङीप् स्तावतीत्युक्ताः अपरो स्यापि प्रतिषेधः स्यात् बहुव्रीहौ तु रक्तादेरन्य
न भवति काषायीति तेन रक्तं रागादिति सण् लोहीति प्राणिरजतादिभ्योऽञ् तस्य वा ईषा शब्दः पलाशादिः इति स्वादिरेषः खदिरस्यावयवविशेषः॥ ॥स्वाङ्गात्॥ ॥
अमानिनीति वार्तिकेऽदर्शना तत्र प्रतिषेधं स्वाङ्गाच्चोपसर्जनादिति ङीष् दीर्घकेशीत्यत्र नञ् विद्यमान पूर्वं चेति प्रतिषेधादकेशा॥ ॥

स्थानेष्वते हस्तिनानां सप्त हो हस्ति पं १३

जातिश्च॥ ॥कठबह्वृचयोर्जातित्वं चरणयोः स्त्रेहेति जातिलक्षणो ङीष्
अयमिस्मादिव्याख्यानमत्र शरणं॥ १३

राम० १३२

पुंवत्॥ ॥ ननु कर्मधारये स्त्रियाः पुंवदित्यादिनैव सिद्धः पुंवद्भावः जातीयदेशीययोरपि तसिलादिष्विति किमर्थोयमारंभ इत्यत
आह प्रतिषिद्धार्थोयमिति प्रतिषिद्धोपि पुंवद्भावो यथा स्यादित्येवमर्थमित्यर्थः। प्रतिषेधार्थोयमिति पाठे प्रतिषेधविषयः प्रतिषेध
शब्देनोक्तः निवृत्तिवचनो वार्थशब्दः कुक्कुट्यादीनामित्यादि। अस्यार्थः समानाधिकरणार्थं वचनं न वेत्यादि उपसंख्यानं प्रत्या
चष्टे नत्वात्र क्रमं किं कारणं स्त्रीपूर्वपदस्याविवक्षितत्वात् नात्र स्त्रीलिंगं पूर्वपदं विवक्षितं कथं तदुभयोरप्युभयोः शावः तत्र प्रकरणात्

पुंवत्कर्मधारयजातीयदेशीयेषु॥ ॥ कर्मधारये समासे जातीयदेशीययोश्च प्रत्यययोर्भाषितपुंस्कादनूङः स्त्रियाः पुं
वद्भवति। प्रतिषिद्धार्थोयमारंभः। न कोपधाया इत्युक्तं तत्रापि भवति पाचकवृन्दारिका पाचकजातीया पाचकदेशीया।
संज्ञापूरण्योश्च इत्युक्तं तत्रापि भवति दत्तवृन्दारिका दत्तजातीया दत्तदेशीया। पूरण्याः पंचमवृन्दारिका पंचमजातीया
पंचमदेशीया। वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे इत्युक्तं तत्रापि भवति स्रौघ्नवृन्दारिका स्रौघ्नजातीया स्रौघ्न
देशीया। स्वांगाच्चेतोमानिनी इत्युक्तं तत्रापि भवति। श्लक्ष्णमुखवृन्दारिका श्लक्ष्णमुखजातीया श्लक्ष्णमुखदेशीया। ॥
जातेश्च इत्युक्तं तत्रापि भवति। कठवृन्दारिका कठजातीया कठदेशीया। भाषितपुंस्कादित्येव खट्वावृन्दारिका। अनू
ङित्येव ब्रह्मबन्धूवृन्दारिका। कुक्कुट्यादीनामण्डादिषु पुंवद्भावो वक्तव्यः। कुक्कुट्या अण्डं कुक्कुटाण्डं। मृग्याः पदं मृगप
दं। मृग्याः क्षीरं मृगक्षीरं। काक्याः शावः काकशावः। न वा स्त्रीपूर्वपदस्याविवक्षितत्वात्। स्त्रीत्वेन विना पूर्वपदार्थोत्र
जातिः सामान्येन विवक्षितः पुंवद्भावाद्ध्रस्वत्वं खिद्घादिषु भवति विप्रतिषेधेन। खित्। कालिंमन्या हरिणिं

दिनास्त्रीत्वावसायः आरभ्यमाणेपि पुंवद्भावे समासश्रयणीय अनारब्धेपि तथा भविष्यति यदि तर्हि स्त्रीलिंगेन समासः क्रियते तदा स्त्री
प्रत्ययस्य श्रवणं प्राप्नोति। एवं तर्हि नाभिधानात् स्त्रीलिंगेन समासो न भविष्यति प्रत्ययितावदत्रैतच्छक्यते वक्तुं इह तु कथं मृग्याः क्षीरं मृगक्षी
रमिति नहि पुंसः क्षीरेण संबंधोस्ति अत्रापि जात्यंतरनिवृत्तिपरत्वाच्चोदनायाः स्त्रीत्वमकिंचित्करत्वादविवक्षितं यत्र तु लिंगविशेष उपकारे
कस्तत्रासौ विवक्षित एव यथा अजापुत्रेण यष्टुं शिक्षितेदातव्यमिति। पूर्वपदार्थोत्र जातिरिति कुक्कुटाण्डे पूर्वपदार्थो जातिः स च सामान्येन

ह्का०प०१ बादिषु नघाद्ध्रस्वो भवतीत्यस्यावकाशः नर्त्तकितरा नर्त्तकितमा नर्त्तकिरूपा नर्त्तकिकल्पा यत्र पुंवद्भावः प्रतिषिध्यते तेन कोपधायाः इति न तसि
१३३ लादिष्विति पुंवद्भावस्यावकाशः पटुज्ञातीन भवति दर्शनीयतरेत्यादि पट्वितरेत्यादावुभयप्रसंगे विप्रतिषेधः केणोऽद्ध्रस्वो भवतीत्यस्या
वकाशः नर्त्तकिका पुंवद्भावस्यावकाशो दरदो पसंख्यायाघज्मगधेभ्यः तस्मात्स्वेति लुक्कृते ततः प्राग्दीव्यतः तसिलादिष्विति पुंवद्भा

वादि। पट्वितरा। पट्वितमा। पट्विरूपा। पट्विकल्पा। पट्विका। मृद्विका। इह दरदउ विदूरदरकस्य उशिज इत्ये
ते जनपदशब्दाः क्षत्रियवाचिनः तत्र तद्राजप्रत्ययस्य स्त्रियामतश्चेति लुकि कृते दरउ विद्यासो दर
रिका चेति विग्रह्य समासः क्रियते तत्र पुंवद्भावेन दरउ विद्याद्यः पुंशब्दाः क्रियन्ते दरउ विदद्दारिका
। दारदद्दारिका। पार्थद्दारिका। औशिजद्दारिका ४२ ॥ ॥छ॥ ॥छ॥ ॥

पाद्दारदशब्दः प्रत्ययस्यादिति त्वदारदिका ननु च परिगणितास्तसिलादयः न च कप्रत्ययस्तेषु समाम्नातः स्वं तर्हि विप्रतिषेधा
देव कप्रत्यये पि तत्राभ्युपगम्य तदुपलनुमीयते पट्विका मृद्विके त्यादावुभयप्रसंगे परत्वाद्ध्रस्वः सर्वत्र चात्र सत्यङ्गेति न्यायाश्र
यणात्पुनः पुंवद्भावाभावः अत्र डि. तिप्रसज्यप्रतिषेध इति पटु कृतेन तस्य प्रयोजनं दर्शयति इहेत्यादि तद्राजप्रत्ययस्येति ये च तस्तेषु घज्मग ए०
धेभ्यः शेषे तु जनपदशब्दादिष्यजष्टच्य इति याकारान्तः १४ १३३

ब्रह्मण।। ।।चेलडादीनां हन्तेर्विषये कुत्सनवचनत्वात्ते; कुत्सितानि कुत्सनैरिति समासः। ड्वप्रत्ययस्त्वाष्ठं इति सिद्धकृत्वमिति सादिव्याकरणम्:
प्राप्तः सो च त्वा न्न ह्रस्वः इत्यात इति न नुवर्त्तांग वेतस्थत इत्यपचनुवर्त्तिष्यते एवमपि ग्रामणीतरः अत्रापि प्राप्नोति स्त्रियामिति निवर्त्तते एवम
पि ग्रामणीतरा अत्रापि प्राप्नोति स्त्रियाः इत्यनुवर्त्तते स्त्रियाः इति: स्त्रीवाचिनः ईकारस्येत्यर्थः ग्रामणीशब्दे त्वनर्थकः ईकारः शेषप्रकृत्यर्थे
ङ्यां ग्रहणात्क्रियमाणे ङ्याङ्ग्रहणे ङ्योऽनेकाच इति श्रुतत्वात्तदपेक्षः शेषो लभ्यते अड्ी ब्रुयान नद्यः इति नमत्ययदेकाजिति अन्तरेणापि ङी ब्रह्म
णोऽप्रकृतः शेषः कथं इत्यत इति क्रीते अनीयपानद्यः इति तं नयदेकाजिति तत्र ईन्ती ग्रहणं तिष्ठतु तावत्।। ।।नघाः।। ।।भाषितपुंस्कादनूङ:

घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः।। ।।घरूपकल्पचेलड्ब्रुवगोत्रमतहत इत्येतेषु परतो भाषितपुंस्का
न्ङो ङ्यो प्रत्ययान्तस्यानेकाचो ह्रस्वो भवति। ब्राह्मणितरा ब्राह्मणितमा। ब्राह्मणिरूपा ब्राह्मणिकल्पा। ब्राह्मणिचेली ब्रा
ह्मणिब्रुवा। ब्राह्मणिगोत्रा। ब्राह्मणिमता। ब्राह्मणिहता। घरूपकल्पाः प्रत्ययाः। चेलडादीन्युत्तरपदानि ब्रवीतीति ब्रुवा पचाद्य
च्। वच्यादेशोऽगुणश्च निपातनान्न भवति। ङ्य इति किं दत्तातरा गुप्तातरा। अनेकाच इति किं नघाः शेषस्यान्यतरस्यामिति वक्ष्य
ति भाषितपुंस्कादित्येव आमलकीतरा। कुवलीतरा।। ।।नघाः शेषस्यान्यतरस्याम्।। ।।नघाः शेषस्य वा इति ह्रस्वो भवत्यन्य
तरस्यां कश्च शेषः अङी ब्रुयात नदी ङ्यन्तेनपदेकाच ब्रह्मबन्धूतरा ब्रह्मबन्धुतरा ब्रह्मबन्धुतमा स्त्रीतरा स्त्रितरा। कथं घाः प्र

ति निर्दिष्टं कश्च शेष इति यदि च यत्र पूर्वसूत्रेण ह्रस्वो न विहितः स शेषः ततोऽपरभाषितपुंस्कं य ((ः निषेधो वक्तव्यः लक्ष्मीतरा तन्त्रीतरा।।
त्वा भेत्रायणामा ह्रस्वो भाषितपुंस्कमनेकाच ङीतस्यापि ह्रस्वत्वं प्रसज्यते आमलकीतरा ट्रोणीतरेति अत्रापि पूर्वेण विहितत्वादिति प्रश्नः। पूर्वस
त्रे यत्साहात्कृतं तदपेक्षः शेषः इत्युत्तरं। शेषग्रहणं हाकमकर्तुं कथं नघा अन्यतरस्यां ह्रस्व इत्युत्सर्गः तस्यानेकाच इतो नित्यं ह्रस्वत्वमपवा
दः तस्मिन्नित्ये प्राप्ते उगितश्चेति विभाषारभ्यते पक्षेवं नघा अन्यतरस्यां नित्यत्र भाषितपुंस्कादित्यनुवर्त्तते तेनानवायघनुवर्त्तनात् स्त्रितमा अ
न प्राप्नोति अथ नानुवर्त्तते ड्रोणीतरा अत्रापि प्राप्नोति तस्मात्कर्त्तव्यं शेषग्रहणं तस्मिंश्च क्रियमाणे श्रुतापेक्षं शेषत्वं यथा विज्ञायते निष्
वस्त्रे ङी ग्रहणमधिकर्त्तव्यं लक्ष्मीतरेति अविहस्ततं त्रिमर्द्दुलक्ष्मेर्मुडुत्तीकारप्रत्ययान्तो लक्ष्मीशब्द इति कृदन्तो भवति सतर्हि प्रतिषेधोव

कथ्यः नवक्रमः स्त्रियाः इत्यनुवर्त्तते तेन नदी विशेषणं स्त्रियामः स्त्रि
या न घ इति न च ह्रस्वः दीर्घावाचि नी नदीसंज्ञा पितृहिन्नाप्नोति ङ्को
त्रयसि ह्रोणे नदीसंज्ञा प्रकरणे॥ ॥

उगितश्च॥ ॥पुंवद्भावोप्यत्रपक्षेवक्तव्यइतिभाष्येनैतदुक्तं।प्रकर्षयोगात्प्रागित्यादिनावक्ष्यमाणत्वाच्चेष्टेविवक्षादिशब्दप्रयुक्तत्वेःप्रधानंकार
णंनचेहप्रकर्षयोगात्प्राक्स्त्रीत्वंविवक्षतेतस्मात्स्त्रीप्रत्ययांतादेवातिशायनप्रत्ययःक्रियतेनेतदंतस्यतुस्त्रीत्वविवक्षायांस्त्रीप्रत्ययइतिमन्यते॥
॥आन्महतः॥ ॥महतःपुत्रोमहत्पुत्रइतितनुचान्महतइत्येतावानेवयोगःकर्त्तव्यःतत्रोजातीयेचेतिद्वितीयःतत्रपूर्वस्मिन्योगेउत्तरपदे

उगितश्च॥ ॥उगितश्चपरस्यानद्याघादिषुपरतोन्यतरस्यांह्रस्वोभवति॰श्रेयसितरा॰श्रेयसीतरा॰श्रेयस्त
प॰विदुषितरा॰विदुषीतरा॰विद्वत्तराः॰पुंवद्भावोत्रपक्षेवक्तव्यः॥प्रकर्षयोगात्प्राक्स्त्रीत्वस्याविवक्षितत्वात्सिद्धं॥
॥आन्महतःसमानाधिकरणजातीययोः॥ ॥समानाधिकरणउत्तरपदेजातीयप्रत्ययेचपरतोमहतआ
कारादेशोभवति॰महादेवःमहाब्राह्मणःमहाबाहुःमहाजातीयःसमानाधिकरणजातीययोरितिकिंम
हतःपुत्रोमहत्पुत्रःलाक्षणिकत्वादेवात्रनभविष्यतीतिचेत॰बहुव्रीहावपिनस्यात्महाबाहुरिति॰तदर्थं
समानाधिकरणग्रहणंकर्त्तव्यं १५ ॥ ॥छ॥ ॥

नसमासःसंनिधाप्यतेसवललक्षणप्रतिपदोक्तपरिभाषयामहदित्यादिनायोविहितःसएवग्रहीष्यतेसचसमानाधिकरणएवेतित्र
नर्थकंसमानाधिकरणंतदेतदाशंकतेनावत्लक्षणोक्तत्वादितिनिराकरोतिबहुव्रीहावपीतितदर्थमितिबहुव्रीहावपिपथ्यास्यादि
त्येवमर्थमित्यर्थःलक्षणप्रतिपदोक्तपरिभाषायानित्यत्वमितिभावः १५ ॥ ॥छ॥ छ॥ ॥छ॥ ॥

इह अमहान्महान्संपन्नो महद्भूतश्चंद्रमा इति महच्छब्दो भूतशब्देन कस्मिन्नर्थे च्विं स्मरन्निवर्तेति इति सामानाधिकरण्यादात्वं प्राप्नोति स्यादेतत् अभूततद्भा
वो च्विर्विधीयते अभूततद्भावे च्विर्विधीयते अभूततद्भावश्च कः कारणस्य विकारात्मना अभूतस्य तदात्मभावः तत्र प्रकृतिः कर्त्री न विकृतिः तथा च
संज्ञी भवंति ब्राह्मणाः पटी भवंति तंतवः अत्वं त्वं संपद्यते त्वद्भवतीति प्रकृत्याश्रयेणैव वचनं प्रथमपुरुषो दृश्यते न विकृत्याश्रयेणैकवचनम
पुरुषो न तत्र अभूत इति कथमस्य योभवनं क्रियायाः कर्त्र्यर्थं महत्संपन्नो न तु विकारे महदिति ततः किं अमहतो भूतेन सामानाधिकरण्यं न तु महतः न
यवस्थावत एकत्वेप्यवस्थयोः सामानाधिकरण्यं संभवति न हि भवति बालश्चासौ स्थविरश्चेति भवति तु बालश्चासौ देवदत्तः स्थविरश्चेति अतो वैयधिक
रण्यादात्वाभाव इति यद्येवम् अमहती संपन्ना ब्राह्मणी महद्भूता ब्राह्मणीति पुंवद्भावोपि न स्याद्वैयधिकरण्यादेव। यथा च प्रकृतेः कर्तृत्वं दृष्टं तथा विकृतेर
पि दृश्यते तथा च यस्य शाखायां भाष्ये सुवर्णं पिंडः खदिरांगारवर्णे कुंडले भवति इति तथा क्लृपि संपद्यमाने च चतुर्थी वक्तव्येति संपद्यकर्तरि विधीयमाना च

अमहान्महान्संपन्नो महद्भूतश्चंद्रमाः इत्यत्र गौणत्वान्महदर्थस्य न भवत्यात्वं ॥ १६

तुर्थी विकाराद्भवति मूत्राय कल्पते यवागूरिति न प्रकृतेः तथा असंघो ब्राह्मणाः संघो भवंति अपटस्तंतवः पटो भवतीति विकाराश्रयं वचनं दृश्यते
तत्र यदि विकृतेः कर्तृत्वाद्वैयधिकरण्यादात्वं न स्यात् पुंवद्भावोपि न स्यात् तदुच्यते दर्शितं नागृहीतं यथा द्विविषये द्वयोरपि प्रकृतिविकृत्योः कर्तृत्व
मिति युक्तं चैतन्न परिणतिविषयो हि च्विप्रत्ययः यत्र चैकोर्थः प्रकृतिविकारात्मकतया द्व्यात्मकत्वमाश्रीयते तत्र परिणामव्यवहारः। उक्तं च। जहद्धर्मा
तरं पूर्वमुपादत्ते यदा परं। तत्त्वादप्रच्युतो धर्मी परिणामः स उच्यते इति यत्र त्वमत एव स्थानं विवक्षितं तत्र च्वेरभावः तंतवो भवंति पटो भवतीति तत्र
यो यं पूर्वकं धर्मं जहदुत्तरं चोपाददत् तं संमूर्छितोर्थः संपद्यमानः संपद्यकर्तेति चोच्यते तदभेदाच्च सर्वत्रैवावस्थयोरपि कर्तृत्वं अत एव दर्शितं निर
स्ते असतः उत्पत्तिरेव स्याद्यथा उत्पन्नो शशविषाणमपि संपद्येत असत्त्वात्पूर्वावस्थाया उत्पत्तौ सर्व एव पदार्थाः सर्वदा उत्पद्यमाना एव भवेयुरिति कथं निरस्तं
किं सदुत्पद्यते किं वा सत एवेति तयोरवस्थयोरनुवर्तमानं वस्तु तस्मात्त्वभिन्नेन तदात्म्यभिन्नेन केनचिद्रूपेणोत्पद्यते यथा मृद्वस्तु घटरूपेणोत्पद्येतैवं पूर्वा
वस्थया किमपराद्धं पत्नेव नोत्पद्यते न किं विरूपराद्धं असती तु सा कथं कर्त्री स्यात् विनष्टापि हि तस्या मृत्त्वरूपावस्थोत्पद्यते यथा घटः पिंडावस्थायां असतो

टीका-प० १
१३५

महत्त्वे वर्तते न तेन पिंडादिरूपेण परिणमत इत्युक्तं एवमामूलप्रकृतेः । सा तु प्रकृत्यन्तरनिरपेक्षैव तेन तेन घटादिरूपेण परिणमत इति तदेवं स्थि
तमेतत्संमूर्छितोर्थात्मा संपद्यकर्मा तदभेदाच्च सर्वोत्र व्यवस्थयोरपि कर्तृत्वमिति । उक्तं च । एवंविधस्यामपि जहत्स्वार्थवृत्तौ सूर्मसुत्ररां संमूर्छित इवार्थो
त्मा ज्ञायमानो भिधीयत इति । तदेवं सति अर्थवाक्ये एकवचनत्वमुक्ते रेव कर्तृत्वं घटन्त स्यात् । तिङ्कृतीनां च क्रियाविशेषणत्वात् स्मिद्धि भवनं तत्र सद्धि
संबंधीभवनं तत्र केवले भवने संबंधः कर्मा संबंधी भवने तु प्राधान्यात् । यथा आकरणस्य सूत्रे करोतीति सूत्रं तद्विशेषणं आकरणं सूत्रयति । यत्र वि
शिष्टकर्मो ते र्मा करणं कर्मतद्धत्वापि तत्र महद्भूतश्चंद्रमा इति वृत्तौ महच्छब्दो भूतशब्दस्य प्रवृत्तिनिमित्ते भवने यद्यर्थ वर्तते तथा महत्सु म
हत्वेन संप्रश्नः चन्द्रमाः स्वरूपेण इति वैयधिकरण्यात्तदभावः महद्भूता ब्राह्मणी मत्र तु महच्छब्दो द्रव्ये वर्तते पदस्याविवक्षितत्वात्सिद्धं यत्र
तु स्त्रीत्वं विवक्षितं तन्न भवत्येव पुंवद्भावः अगोमती गोमती संपन्ना गोमतीभूता ब्राह्मणीति । हविकारस्तु विकृतेः कर्तृत्वाश्रयेण सामाना
धिकरण्ये मतुपि परिहारमाह गौणत्वान्महदर्थस्येति । गौणमुख्ययोर्हि मुख्ये संप्रत्ययो भवति तद्यथा गौरनुबंध्यो जो ग्नीषोमीय इति न
गाहीको नुबध्यते स्वशास्त्रे पि स्वेस्वप्रसिद्धत्रुप्रत्यय ग्रहणेन ज्ञापितरूपवदर्थो पि तत्रापि तिमहदर्थस्य महच्छब्दस्यात्र ग्रहणाद्गौणार्थस्याला
भावः अंते बुद्धि एकस्यैव वस्तुनः प्रकृतिविकारात्मकतया द्व्यात्मकत्वं गम्यते परीभवंतीति युक्तं प्रागपरः संप्रतिपत्त्यात्मना परिमाणमंतरिति
प्रतीयते परीभवतीत्युक्ते नैवं प्रतीयते किंतु परस्य रूपेणाभवतीत्यपि गम्यते तत्र केवलविकारावस्थावाचकस्य परशब्दस्य प्रागवस्था
यामनुगतावस्था यां च वृत्तिर्नलक्षणामंतरेणोपपद्यते अपर आह महत्त्वेन परिणामोस्य भवः महतिमहच्छब्दस्य वृत्तिः अत्र च प्रमाणम
योभवति तिर्को रक्तादिरूपेण भवतीत्यपि गम्यते परीभवतीत्यत्र परः यदो भवतीत्येव गम्यते एवमर्थे प्रवृत्तिरुपचारमंतरेण नोपपद्यत इति गो
णार्थत्वादात्वाभाव इति पत्तमं पठित हि पुंवद्भावस्तु विशेषमनुयायिनाय विधीयमानो गौणार्थस्यापि भवति शब्दविशेषोपादाने हि गौणस्य
न्यायः एवं तु गोमतीभूते स्पष्टत्वपुंवद्भावनिवृत्तये यति तत्र संपठित हि शास्त्रेषु मुख्यार्थस्य ग्रहणं कथं न हि वाहीके स्यात्तेभ्यतः गौर्वाहीको
गोवाहीकमिति ज्ञायते परान्तरसंबंधेमतियत्र स्याद्गौणार्थत्वाभिमतिः प्रभवत्यन्तं च परान्तरेण संबध्यते तत्र अपरस्य परान्तरसंबंधेमतियत्को
र्यप्राप्ते तत्र वा सो न्यायः न प्रातिपदिककार्ये ष्विति सुत्यमपरस्वार्थमास्ताम् इति हि स्यात्वेतत्तु भयगोशब्दो वाहीके वर्तिष्यते इह तु महच्छब्द एष्
त्वरपदे परतो विधीयमाना मात्वं तस्या मवस्थायां मुख्यार्थस्यैव भवितुमर्हतीति अनेनैव न्यायेन छंतस्य गोशब्दस्य गोमवदित्यत्र यो दितिप्रत्ययस

॥ ३६
एम०
१३५

महद्राल इत्यादिसमुच्चये चकारो नाचाचये तेन पत्यैव पुंवद्भाव इत्येवालं। अष्टाकपालमिति अष्टसु कपालेषु संस्कृतमिति तद्धितार्थसमासः संस्कृ तं भक्षा इत्यण् तस्य द्विगोरिति लुक् अष्टाकपालमिति समाहारे द्विगुः पात्रादित्वात् स्त्रीत्वाभावः। अष्टागवेनेति अष्टौ गावो युक्ता अस्मिन्निति त्रिपदे बहुव्रीहिः पूर्वयोर्द्वयोरुत्तरपदे द्विगो गोरतद्धितलुकीति टच् समासान्तः तत्र दीर्घत्वेन पुंस्त्वार्थं संप्रत्यया युक्तशब्दस्य निवृत्तिः समाहारद्विगो वा समाहृच र्योरभेदोपचाराद्युक्तार्थनिवृत्तिः तपरकरणं विस्पष्टार्थमिति न भिन्नकालानां निवृत्त्यर्थं मतणत्वात् तत्कालानां ग्रहणं अने

महद्घासकरविशिष्टेषूपसंख्यानं पुंवद्वचनं च। असमानाधिकरणार्थं वचनं। महतो घासो महाघासः महतः करो म हाकरः महतो विशिष्टो महाविशिष्टः। अष्टनः कपाले हविष्युपसंख्यानं कर्त्तव्यं अष्टाकपालं निर्वपेत्। हविषीति किं अष्टकपा लं ब्राह्मणस्य। गवि च युक्तेष्टन उपसंख्यानं अष्टागवेन शकटेन। युक्त इति किं अष्टगवं ब्राह्मणस्य। तपरकरणं विस्पष्टार्थं॥ ॥

द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः॥ ॥ द्वि अष्टन इत्येतयोराकारादेशो भवति संख्यायामुत्तरपदे अबहुव्रीह्यशीत्योः। द्वादश। द्वाविंशतिः। द्वात्रिंशत्। अष्टादश। अष्टाविंशतिः। अष्टात्रिंशत्। द्व्यष्टन इति किं पंचदश। संख्यायामिति किं द्वैमातुरः। आष्टमातुरः। अबहुव्रीह्यशीत्योरिति किं द्वित्राः द्विदशाः द्व्यशीतिः। प्राक्शतादिति वक्तव्यं। इह माभूत् द्विशतं अष्टशतं। द्विसहस्रं अष्टसहस्रं॥ ॥त्रेस्त्रयः॥ ॥छ॥ ॥

इकलादुत्तरस्यानोऽयानङ् प्रकरण एवास्मिन्वक्तव्येत्रादिति वचनं योगविभागार्थं तेनाष्टाकपालादावात्वसिद्धिः एवं चैकादशे सत्याप्यात्वं भवति न यावत्प्रागेकादशभ्यो छन्दसीति प्रयोगाः॥ ॥द्व्यष्टनः॥ ॥अत्र संख्यानानुदेशो न भवति यदि स्यात् अष्टनोऽशीतौ प्रतिषेधः स्यात् तथा च तस्यैव यथा प्रतिषिद्धत्वात्सवर्णदीर्घत्वेन भवितव्यं द्वादशद्वाविंशतिरित्यादौ समाहारे द्वन्द्वः स नपुंसकमिति प्रसंगेन भवति लोकाश्रयत्वाल्लिंगस्य द्वित्रा इति द्वौ वा त्रयो वेति वार्थे संख्ययाव्ययासन्नेति समासः बहुव्रीहौ संख्येये डच्। द्विर्दश द्विदशाः सुजर्थे समासः॥ ॥छ॥ ॥छ॥ ॥

ह्र्का·प·१ ॥त्रेस्त्रयः॥ ॥संधिवेलादिषु त्रयोदशशब्दस्य ग्रहणात्मकापांतोयमादेशः॥ ॥विभाषा॥ ॥सर्वेषां ग्रहणमित्यादि अप्राप्तिहितमिन्न अनंतरस्य त्रेस्त्र
१३६ यः स्यैव विकल्पः स्यात्॥ ॥हृदयस्य॥ ॥अणांतस्य ग्रहणमिष्यत इति आम्नानात् अत्र आवर्त्तादर्शयनिवृत्तिरिति यद्यावातांतस्य ग्रहणं

त्रेस्त्रयः॥ ॥त्रिइत्येतस्य त्रयस् इत्ययमादेशो भवति संख्यायामुत्तरपदे अबहुव्रीह्यशीत्योः। त्रयोदश। त्रयोविंशतिः। त्रयस्त्रिंशत्। संख्यायामित्येव त्रैमातुरः। अबहुव्रीह्यशीत्योरित्येव त्रिदशाः। अशीतिः। प्राक्शतादित्येव त्रिशतं त्रिसहस्रं॥ ॥विभाषा चत्वारिंशत्प्रभृतौ सर्वेषां॥ ॥चत्वारिंशत्प्रभृतौ संख्यायामुत्तरपदे अबहुव्रीह्यशीत्योः सर्वेषां द्व्यष्टनत्रित्येतेषां यदुक्तं तद्विभाषा भवति। द्विचत्वारिंशत् द्वाचत्वारिंशत्। अष्टचत्वारिंशत् अष्टाचत्वारिंशत्। त्रिचत्वारिंशत् त्रयश्चत्वारिंशत्॥ द्विपंचाशत् द्वापंचाशत्। अष्टपंचाशत्। अष्टापंचाशत्। त्रिपंचाशत् त्रयःपंचाशत्। प्राक्शतादित्येव द्विशतं अष्टशतं त्रिशतं सर्वेषां ग्रहणं त्रयाणामपि यथा स्यात्॥ ॥हृदयस्य हृल्लेखयदण्लासेषु॥ ॥हृदयस्य हृदित्ययमादेशो भवति लेख यत् अण् लास इत्येतेषु परतः। हृदयं लिखतीति हृल्लेखः। यत् हृदयस्य प्रियं हृद्यं। अण् हृदयस्येदं हार्दं। लास हृल्लासः। लेख इत्यणंतस्य ग्रहणमिष्यते घञि तु हृदयस्य लेखो हृदयलेख इत्येव भवति। एतदेव लेखग्रहणं ज्ञापकं उत्तरपदाधिकारे प्रत्ययग्रहणे तदंतविधिर्नास्तीति॥ ॥वा शोकष्यञ्रोगेषु॥ ॥शोक ष्यञ् रोग इत्येतेषु परतो हृदयस्य वा हृदित्ययमादेशो भवति। हृच्छोकः। हृदयशोकः। ष्यञ्। सौहार्द्यं सौहृद्यं। ब्राह्मणादित्वात् ष्यञ् हृदादेशपक्षे हृद्भगसिंध्वंते पूर्वपदस्य चेत्युभयपदवृद्धिः। रोग। हृद्रोगः। हृदयरोगः। हृदयशब्देन समानार्थो हृच्छब्दः प्रकृत्यंतरमस्ति तत एव सिद्धे विकल्पविधानमिदं प्रपंचार्थं १७ ॥ राम०

नघञंतस्य तदा लेखग्रहणस्य ज्ञापकत्वमुपपद्यते॥ ॥वाशोक॥ ॥हृदयशब्देन सादि यदुक्तं तन्नानुमन्यंते अत एव विकल्पविधानात् पद १३६
ने मम स हृदित्यत्र हृदादेशविधानाच्च १७ ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

पादस्य ॥ ॥ अकारान्तोयमादेशो विभक्तिकः अस्यतिष्यामिति अजगतिक्षेपणयोः अतश्चात्र गमनेपदग इति प्रकरणोऽन्यत्रापि दृश्यत इति डः
उपदेश एवेति सम्मसनक्रियानन्तरमेव प्राग्विसमासस्य प्राप्नात् चरणाद्विस्पर्धः अन्तोदात्तो निपात्यत इति अमथान्तर्यत आद्युदात्तः स्यात् नेनेमादि
नान्तोदात्तनिपातनस्य प्रयोजनमाह पदाजिरित्यादिनोपदेशाय हणस्य यदि कृत्स्वरेण तेन सुत्तरकालेयद शब्दोन्तोदात्तः अरिडाः स्यात् सदासति

पादस्य पदाज्यातिगोपहतेषु ॥ ॥ पादस्य पद इत्ययमादेशो भवति आजि आति गो उपहत इत्येतेषु उत्तरपदेषु पादाभ्यामजतीति
पदाजिः पदिभ्यामततीति पदातिः अजपतिभ्यां पदे चेत्यौणादिक इण् प्रत्ययः तत्राजेर्वीभावो न भवत्यत एव निपातनात् पादा
भ्यां गच्छतीति पदगः पादेनोपहतः पदोपहतः पादशब्दोयं वृषादित्वादाद्युदात्तः तस्य स्थाने पदादेश उपदेश एवान्तोदात्तो निपात्यते
तेन पदोपहत इत्यत्र तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वेनान्तोदात्तत्वं भवति । पदाजिः पदातिः पदगः इत्येतेषु कृत्स्वरेण समा
सस्यैवान्तोदात्तत्वं भवति ॥ ॥ पद्यत्यतदर्थे ॥ ॥ यत्प्रत्यये परतः पादस्य पदित्ययमादेशो भवति तृतीया कर्मणीति पूर्वपदप्रकृ
अतदर्थे । पादौ विध्यन्तीति पद्याः शर्कराः पद्याः कण्टकाः ॥ ॥ [illegible] ॥ ॥ [illegible] ॥ ॥ [illegible] ॥

शिष्टत्वात्तेन कृत्स्वरो बाध्येत उपदेश एवान्तोदात्तत्वे आदेशे कृत्स्वर एव सति शिष्टो भवतीत्यन्तोदात्तनिपातनस्यैव वैयर्थ्यं पदोपहत इत्यत्र अप
प्राप्तत्वादिति पिण्डार्थः ॥ ॥ पद्यति ॥ ॥ इके च एतावितिचरत्यर्थे यत् इकुप्रत्ययः छन्दसि तत्रेत्यर्थः एतद्वार्त्तिकादर्शनान्मर्यादिषु पाठाय चेति
पठितं शरीरावयवस्येति प्राप्ते नमत्रग्रहणम् ॥ ॥ छ ॥ ॥

अपर आह पद्वत्वेनावच्छेदावयवस्य ग्रहणं तस्यैवाश्वादिषु करणत्वसंभवात् इहापि स एवानुवर्तते ऋचः शे इत्यत्र ऋग्विषये शरीरावयवस्यासंभवाच्च
तुर्यभागवचनस्य ग्रहणमिति तेनेत्यादि यत्पादमाषशतादिसूत्रं हि परिमाणवचनैः पणादिभिः साहचर्यात्परिमाणस्य पादस्य ग्रहणं न शरीराव
यवस्य द्विपाद्यमिति। तेन क्रीतमित्यर्थे यत्प्रत्ययः। इदमप्यत्र शक्यं वक्तुं पादेन यद्विशेष्यते पादस्य यो यत् कश्चित् पादस्य पत्प्रत्ययेन तो विहितः द्विपा

अतदर्थ इति किम्। पादार्थमुदकं पाद्यम्। यद्यप्यत्र केचन तादर्थ्ये उपसंख्यानं पादाभ्यां त्रतीयादिकः पद्यादिम्भिस्तन्त्रिति ठनप्रत्ययः। शरीरावय
ववचनस्य पादशब्दस्य ग्रहणमिष्यते तेन पणपादमाषशताद्यदित्यत्र यत्पदादेशो न भवति द्विपाद्यं त्रिपाद्यम्॥ ॥हिमकाषिहतिषु च
॥ ॥हिमकाषिन्हति इत्येतेषूत्तरपदेषु पादस्य पदित्ययमादेशो भवति। हिमा। पद्धिमम्। काषिन्। पत्काषिणो यान्ति। हति।
पद्धतिः॥ ॥ऋचः शे॥ ॥ऋचः पादस्य शे परतः पदित्ययमादेशो भवति। पच्छो गायत्रीं शंसति पादं पादं शंसति। संख्यैकवच
नाच्च वीप्सायामिति शस्प्रत्ययः। ऋच इति किम्। पादशः कार्षापणं ददाति॥ ॥वा घोषमिश्रशब्देषु॥ ॥घोषमिश्रशब्द इत्येते
षूत्तरपदेषु पादस्य वा पदित्ययमादेशो भवति। पद्घोषः पादघोषः। मिश्र। पन्मिश्रः पादमिश्रः। शब्द। पच्छब्दः। पादशब्दः। निष्के
चेति वक्तव्यम्। पन्निष्कः १८ ॥श्री॥ ॥

घमित्यत्र तु पादशब्दान्ताद्विगोर्यद्विहित इति॥ ॥हिमकाषि॥ ॥पादस्य हिमं शीतं पद्धिमं तं दोषं कषन्तीति पत्काषिणः पादचारिणः सुप्यजातौ णि
निः पादाभ्यां हन्यत इति पद्धतिः॥ ॥ऋचः शे॥ ॥शे इति शस्प्रत्ययस्य सेऽमेकदेशानुकरणमस्य शशब्दस्यासंभवात् ननु च संभवत्ययं
पादे शे तेऽधिकरणे शे इति शिरसि च पादशब्द इति नास्त्यसंभवः नहि कृत्पादे कश्चिच्छेते य एष लोमादिभ्यः शः तस्याप्यसंभव एव लोमादिषु
पादशब्दस्याभावात्॥ ॥वा घोष॥ ॥पन्निष्क इति निष्कशब्दः सुवर्णवचनः पादशब्दः परिमाणवचनः कर्मधारयः समासः १८ ॥

उदकस्य॥ ॥उदमेघ इति षष्ठीसमासः साहचर्यात्पुरुषस्य संज्ञा पितुः प्रसिद्धत्वात्पुत्रेणाभ्यपदेशः उदकं वहतीति कर्मण्यण् उदवाहः क्षीरोद इति व
क्तव्ये हि अत्र केचिदाहुः उदकशब्देन समानार्थ उदशब्दोस्ति तथा चासंज्ञायामपि प्रयुज्यते अप्रमत्तो द इति इदं तु वचनं संज्ञायामुदकशब्दस्य प्र
योगनिवृत्त्यर्थमिति एवं तु वक्ष्यमाणो विकल्पो नर्थकः स्यात्॥ ॥पेषं॥ ॥असंज्ञार्थमिदं उदधिरिति कर्मण्यधिकरणे चेति किः प्रत्ययः वेग
स्विदोदधिः समुद्रः पूर्वेणैव सिद्धः॥ ॥एकहलादौ॥ ॥एको सहाय इति॥ ॥यद्ययमेकशब्दः संख्यावचनः स्यात्तर्ह्येके स्यानर्थकं स्यात् न हि

उदकस्योदः संज्ञायां॥ ॥उदकस्य संज्ञायां विषये उद इत्ययमादेशो भवति। उदमेघो नाम कश्चित् यस्यौदमेघिः पुत्रः उदवा
हो नाम कश्चित् यस्यौदवाहिः। संज्ञायामिति किं उदकगिरिः। संज्ञायामुत्तरपदस्य च उदकशब्दस्य उद इत्ययमादेशो भवतीति व
क्तव्यं। लोहितोदः। नीलोदः। क्षीरोदः॥ ॥पेषंवासवाहनधिषु च॥ ॥पेषंवासवाहनधि इत्येतेषूत्तरपदेषु उदकस्योद इत्ययमा
देशो भवति। उदपेषं पिनष्टि स्नेहने पिष इति णमुल्। वासे। उदकस्य वासः उदवासः। वाहने। उदकस्य वाहनः उदवाहनः। धि। उदकं
धीयतेस्मिन्निति उदधिः॥ ॥एकहलादौ पूरयितव्येन्यतरस्यां॥ ॥एको सहायः तुल्यजातीयेनानंतरेण हल् आदिर्यस्योत्तरप
दस्य तदेकहलादि तस्मिन्नेकहलादौ पूरयितव्यवाचिन्यन्यतरस्यामुदकस्योद इत्ययमादेशो भवति। उदकुंभः। उदककुंभः। उ
दपात्रं। उदकपात्रं। एकहलादाविति किं उदकस्थाली। पूरयितव्य इति किं उदकपर्वतः॥ ॥श्रीः॥ ॥४४४॥ ॥

द्वौ बहवो वा आदिभूताः कश्चित्संभवंति तस्मादसहायवचन एकशब्दः नन्वेवमप्यसंख्यावर्णेन संभवति कथं एकैकवर्णविशब्दत्रिबाहृः यदि
त्यनेकस्य वर्णस्य युगपदुच्चारणं स्यात्तदा स्थालीशब्दोनेकहलादिः यदि वा क्रमेणोच्चारिता अपि वर्णा भवंति क्षेरन् तदापि युगपदुत्पत्तिपोह
पलंभादादित्वं स्यात् यतस्तु नोच्चारणे युगपदुत्पत्तिर्वर्णानां तेनैकपद्यंतस्मादेकस्यैवादित्वमिति न किंचिदेकग्रहणेन प्रयोजनमवच्छेतु एवं तर्हि
कग्रहणसामर्थ्याद्द्वितीयमसहायत्वमाश्रीयते किं पुनस्तत् आनंतर्येण देन शब्दः तुल्यजातीयेनानंतर्येणेति हल्त्वेन तुल्यजातीयत्वं न तुल्या
तादिभिः भिन्नजातीयमव हितेवसहायत्वाप्रसिद्धेरेवमुक्तं॥ ॥

ह्का० ५०१
१३८

मंथौदन॥ ॥एकहलादौ असंयुक्तः सक्तवो मंथः उदकेन मंथ इति तृतीयेति योगविभागात्समासः अथ तु मध्यमत इति मंथ इति क्रियाशब्दः सक्ताः कार्यं करणे
ल्युटा बहुलमिति समासः सक्तौदनाभ्यामन्नेन व्यंजनमिति बिंदुवज्रवीवधेः षष्ठीति भारहारगाहेः कर्मण्यणान्तेन उपपदसमासः इति समासः उदकस्य
वज्र इव वज्रः उपदर्शनात् अन्येषामपि यथासंभवं समासो भवतीत्येवमुदकं वज्रमिव बिभर्ति दानो दूरत्यमसाहिनोदवज्रः॥ ॥इकः॥ ॥ग्रामणीपु
त्र इति सत्ये द्विषेसादिना किं प्रत्यय ग्रामाभ्यां नयते इति णत्वं ग गीपुत्र इति गार्ग्यश ह्याघ ज अज्ञेति रूपं यस्मिन्निति च हल्लन्तद्धित स्य कारीषगंधीपु

मंथौदनसक्तुबिंदुवज्रभारहारवीवधगाहेषु च॥ ॥मंथ ओदन सक्तु बिंदु वज्र भार हार वीवध गाह इत्येतेषु चोत्तरपदेषु उ
दकस्य उद इत्ययमादेशो भवति अन्यतरस्याम्। उदकेन मंथः उदमंथः उदकमंथः। ओदन। उदकेनौदनः उदौदनः उदकौद
नः। सक्तु। उदकेन सक्तुः उदसक्तुः। उदकसक्तुः। बिंदुः उदकस्य बिंदुः उदबिंदुः। उदकबिंदुः वज्र। उदकस्य वज्रः उदवज्रः। भार।
नोस्तुनी।अष्टोपादयस्याइतिबहुव्रीहौपादस्यलोपेकृतेपादोन्तरस्यामितिङीप्।गविचयुक्तेभाषायामप्यष्टनोदीर्घोभवतीति
वक्तव्यं।अष्टागवंशकटं॥ ॥चितेःकपि॥ ॥चितिशब्दस्यकपिपरतोदीर्घोभवति।एकचितीकः।द्विचितीकः त्रिचितीकः॥ ॥
विश्वस्यवसुराटोः॥ ॥विश्वशब्दस्यवसुराटोरुत्तरपदयोर्दीर्घोभवति।विश्वावसुः।विश्वाराट्।राडितिविकारनिर्देशोयत्रास्येत
द्रूपंतत्रयथास्यादिहमाभूत्विश्वराजौविश्वराजइति॥ ॥नरेसंज्ञायां॥ ॥नरउत्तरपदेसंज्ञायांविषयेविश्वस्यदीर्घोभव
ति विश्वानरोनामयस्यवैश्वानरिःपुत्रः।संज्ञायामितिकिं विश्वेनरायस्यसविश्वनरः॥ ॥मित्रेचर्षौ॥ ॥मित्रेचोत्तरपदेऋ
षावभिधेयेविश्वस्यदीर्घोभवति विश्वामित्रऋषिः।ऋषाविति किंविश्वमित्रोमाणवकः॥ ॥मंत्रेसोमाश्वेंद्रियविश्वदेव्य
स्यमतौ॥ ॥मंत्रविषयेसोमअश्वइंद्रियविश्वदेव्यइत्येतेषांमतौपरतोदीर्घोभवति।सोमावती।अश्वावती।इंद्रियावती।
विश्वदेव्यावती॥ ॥ओषधेश्वविभक्तावप्रथमायां॥ ॥ओषधिशब्दस्यविभक्तावप्रथमायांपरतोदीर्घोभवतिमंत्रवि रा॰ष॰

षयेओषधीभिरपातदं।नमः पृथिव्यैनमओषधीभ्यः।विभक्ताविति किं ओषधिपते।अप्रथमायामितिकिं स्थिरेयम १५२

स्त्वोषधिः ३२ ॥ ॥७॥ ॥

र्यमात्वंवारीर्हवेति॥ ॥विश्व॥ ॥विश्वाराडितिविश्वस्मिन्राजतइतिसत्सूद्विषेत्यादिनाक्विप्यत्रास्येतदितिपदसंज्ञाविषयः सूर्थः ३२ ॥

आवि॥ ॥मंत्र इति प्रकृते जग्रहणं मंत्रविशेषप्रतिपत्त्यर्थं ब्र इति स्वरूपग्रहणं नतरप्रमणोः छंदसि विशब्दस्यैव दीर्घदर्शनात् उत वा घा स्यालात् इति भाषे
पाआवा स्याल स्ततः पंचमीतङि· तिथादेशस्य ङि· त्वयप्स ग्रहणमिति लोण्मध्यमपुरुषबहुवचनस्य थस्य लोटो लङ्वत् इति तिङे शेन यस्तादेशस्तस्य ग्रह
ङि· त्वंत स्याग्रहणमित्यर्थः शृणोत ग्रावाणः इति तप्तनप्तनथनाश्च इति तबादेशः अत्र पित्वान् ङि· त्वं नास्तीति ङि· तिप्रत्याहारग्रहणमिति तु हन्तो नक्कापि यां
दृशतेयन्न तत्रोक्तं लोण्मध्यमपुरुषबहुवचनात् अम्प आमहि ङो ङ·कारान्तप्रत्याहार इति तद्युक्तं असंनिविष्टेन प्रत्याहाराग्रोगात् उरुष्याणः इति रुष्य
तिः कंड्वादियगंतो रक्षतिकर्मा लोट् सेहिः अतो हेरिति लुक् नरस्तस्य नग्रधातुस्थोरुषुभ्य इति णत्वं॥ ॥इकः॥ ॥सुञिति निपातस्य ग्रहणं तस्य व

ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणां॥ ॥ऋचि विषये तु नु घ मक्षु तङ् कुत्र उरुष्य इत्येतेषां दीर्घो भवति। तु। आतू न इंद्र वृत्रहन्। नु। नू रणो॥
नूमर्त्तः। घ। उत वा घा स्यालात्। मक्षु। मक्षू गोमंतमीमहे। तङ्। भरता जातवेदसं। तङि· तिथादेशस्य ङि· त्वयप्स ग्रहणं तेनेह न भवति शृ
णोत ग्रावाणः। कु। कूमनत्रा अत्राहो जातवेदसं। उरुष्य। उरुष्याणो अभिशस्तेः॥ इकः सुञि॥ ॥सुञ् निपातो ग्र घतेरंगं तस्य सुञि प
रतो मंत्रविषये दीर्घो भवति। अभीषुणः सखीनां। नेतार ऊषुणः। ऊर्ध्व ऊषुणः। सुञ इति षत्वं नग्रधातुस्थोरुषुभ्य इति णत्वं॥ ॥द्व्यचो
तस्तिङः॥ ॥द्व्यचस्तिङ· तस्य अकारान्तस्य मंत्रविषये दीर्घो भवति। विद्मा हि त्वा सत्पतिं शूरगोनां। विद्मा शतस्य पितरं। द्व्यच इति किं अश्वा
भवत गाजिवः। अत इति किं आ देवान्वक्षियक्षि च॥ ॥निपातस्य च॥ ॥निपातस्य च मंत्रे दीर्घो भवति। एवा ते अच्छा ते॥ ॥

जकारो त्रैव विशेषणार्थः ऊषुणः इति तकारस्य दीर्घः॥ ॥द्व्यचः॥ ॥भवतेति लोण्मध्यमपुरुषबहुवचनात् तस्य आमहि ङो ङ·कारान्तप्रत्याहार इति तद्यु
क्तं असंनिविष्टेन प्रत्याहाराग्रोगात् उरुष्याण इति उरुष्यतिः कंड्वादियगंतो रक्षतिकर्मा लोट् सेहिः अतो हेरिति लुक् नरस्तस्य नग्रधातुस्थोरुषुभ्य इति ण
त्वं॥ ॥इकः सुञिति निपातस्य ग्रहणं तस्य च जकारो त्रैव विशेषणार्थः ऊषुण इति उकारस्य दीर्घः॥ ॥द्व्यचः॥ ॥भवतेति लोण्मध्यमपुरुषबहुवचनं व
शिप् क्षीतिव हेर्यजेश्च लरे सिपू स्विद्धलेले टीस्यं तु विधिर्न भवति बहुलवचनात् बहुलं छंदसीति शपो लुक् वहेर्दलं यजेः षत्वं षढोः कः सि ढलोर पिदे
गनाव हयजं चेत्यग्निं प्रति भरद्वाजस्य वचनं॥ ॥निपातस्य॥ ॥एवशब्द आदिषु यानां निपातः अच्छागसर्थं वदे विति अच्छ इति॥ ॥ ॥

ई.का.प्र.१ ।।अन्येषां।। ।।मंत्रइतिनिवृत्तं केशाकेशीतितत्रतेनेदमितिपादिनाबहुव्रीहिः इच्कर्मव्यतिहारे नलाषाडितिछंदसिसहइतिषिचः सहेस्साडः सइतिषत्वं।
१५२ पुरुषइतिपुरुषशब्दस्याद्यचोदीर्घः शुनोदंतेत्यादितत्रश्वादंष्ट्रइतिबहुव्रीहिरन्यत्रतत्पुरुषोबहुव्रीहिवादंष्ट्रेतिङ्स्यांतस्यग्रहणाद्दीर्घंतिनायंदीर्घोभव
तीसाढः अन्येतुदीर्घंतिप्रेवपठंतोऽविशेषेणेच्छंति।। ।।चौ।। ।।अंच तिर्गृह्यतइतिचवर्गस्यतुग्रहणं नभवतिव्याख्यानात्दधीचइति। ननुचांतरंग
लाघणादेशेनेवप्राप्नभवितव्यंअकारलोपोभस्यविधायतेभसंज्ञाचयकारादावजादौचसंभवतीतिबहिरंगः दीर्घत्वंतुलोपमपेक्षतइतिबहिरंग
अन्येषामपिदृश्यते।। ।।अन्येषामपिदीर्घोदृश्यतेसशिष्टप्रयोगादनुगंतव्यः। केशाकेशि।नलाषाट्।यत्रनविहितंदीर्घत्वंप्रयो
गेचदृश्यतेतदनेनकर्त्तव्यंपुरुषः पुरुषः नारकः नरकः।शुनोदंतदंष्ट्राकर्णकुंदवराहपुच्छपदेषु। श्वादंतः श्वादंष्ट्राश्वाकर्णः श्वाकुं
दः श्वावराहः श्वापुच्छः श्वापदः।। ।।चौ।। ।।चौपरतः पूर्वपदस्यदीर्घोभवति। चाविलुप्तनकारेगृह्यते। दधीचः पश्यद
धीचादधीचेमधुवः पश्यमधूचामधूचे। अंतरंगोपिद्वियणादेशोदीर्घविधानसामर्थ्यान्नप्रवर्त्तते।। ।।संप्रसारणस्य।। ।।उत्तरप
दइतिवर्त्ततेसंप्रसारणांतस्यपूर्वपद [redacted] स्योत्तरपदेदीर्घोभवति। कारीषगंधीपुत्रः कारीषगंधीपतिः कौमुदगं
धी [redacted] पुत्रः कौमुदगंधीपतिः। इकोह्रस्वोङ्योगालवस्येत्यत्रनभवतिव्यवस्थितविभाषाहिसा। अकृतएववादीर्घत्वे
कृतात्भावपक्षेकृतार्थेनापिदीर्घेणपक्षेतरेपरत्वाद्ध्रस्वोबाध्यतेपुनः प्रसंगविज्ञानंचनभवतिमहकृतोविप्रतिषेधेयद्बाधितंतद्बाधितमेवे
ति।। ।।काशिकायांषष्ठस्यतृतीयः ३३ ।। ।।
तरमतआहअंतरंगोपीति।एवंमन्यतेइहदीर्घश्चस्याचश्चेत्युपतिष्ठतेतत्राचापूर्वपदंविशेष्यतेअजंतस्यपूर्वपदस्येतियदिचयणादेशःस्यात्नकाप्यजंतं राम०
पूर्वपदंस्यात्यणावइत्यादाचपिपूर्वमेवसवर्णेदीर्घत्वप्रसंगस्तस्मादंतरंगोपिविधिर्बाध्यतइतिअत्रचलिंगंप्रतीचइतिनिर्देशः।। ।।संप्र।। ।।अकृतएवे १५२
त्यादिकारीषगंधिपुत्रइतिस्थितेह्रस्वत्वंप्राप्नोतिअनेनदीर्घत्वंतस्यावकाशःग्रामणिकुलंह्रस्वाभावपक्षेदीर्घस्यावकाशः यत्रांतरउभयप्रसंगेप
घपिह्रस्वाभावपक्षेसावकाशंदीर्घत्वंतथापितेनपरत्वाद्ध्रस्वोबाध्यते। अथेदानींदीर्घेकृतेपुनः प्रसंगः कस्मान्नभवतितत्राहपुनः प्रसंगविज्ञानंचे
ति।। ।।७।। ।।श्रीहरदत्तमिश्रविरचितायांपदमंजर्यांषष्ठस्याध्यायस्यतृतीयः पादः।।३३ ।।

॥श्रीगणेशाय नमः॥ ॥अङ्गस्य॥ ॥अधिकारोऽयमिति। स्वरितत्वात्। इह केचिन्मन्यन्ते प्रागभ्यासविकारेभ्योऽङ्गाधिकारः एवं हि गुणो यङ्लुकोरित्यत्र लुग्ग्र
हणं न कर्तव्यं भवति कथं प्रत्ययग्रहणे नैव सिद्धं परित्वभ्यासविकारेष्वप्यधिकारः स्यात्ततोऽङ्गाधिकारविहितत्वमिति न लुमताङ्गस्येति प्रतिषेधः स्यादिति। हृति
कारस्तु मन्यते परिप्रागभ्यासविकारेभ्योऽङ्गाधिकारः वचश्चेति ह्वयतेर्लिङ्घ्यभ्यासस्योभयेषामिति रेफस्य संप्रसारणे उरदत्वे हलादिशेषे च कृते चकारस्या
पि संप्रसारणं प्राप्नोतीति तस्य न संप्रसारणे संप्रसारणमिति प्रतिषेधः क्रियते स न प्राप्नोति उरदत्वस्यासंप्रसारणत्वात् न च तस्य स्थानिवत्त्वं अपरनिमित्तत्वात् आ
सप्तमाध्यायपरिसमाप्तेः पुनरङ्गाधिकारे सत्युरदत्वं परनिमित्तं भवति अङ्गेन स्वनिमित्तस्य प्रत्ययस्याक्षेपात्। यदप्युक्तं लुग्ग्रहणं न कर्तव्यं भवतीति तदपि
न नहि तत्राङ्गाधिकारविहितस्यैव प्रतिषेधः किं तर्हि लुमता लुप्ते प्रत्यये वस्तुतो यदङ्गं तस्याप्रसंगे लक्षणमङ्गमतोऽङ्गं चात्र तस्य सर्वस्य प्रतिषेधः तस्मात् सप्तम

श्रीगणेशाय नमः॥ ॥अङ्गस्य॥ ॥अधिकारोऽयमासप्तमाध्यायपरिसमाप्तेः यदित ऊर्ध्वमनुक्रमिष्यामोऽङ्गस्येत्येवं त
द्वेदितव्यं। वक्ष्यति हलः। हूतः जीनः संवीतः। अङ्गस्येति किं निरुतं दुरुतं। नामि दीर्घः अग्नीनां वायूनां अङ्गस्येति किं। क्रिमिणां
पश्य पामनां पश्य। अतो भिस ऐस् वृक्षैः प्लक्षैः॥ अङ्गं॥छ॥ ॥छ॥ ॥श्रीः॥ ॥श्री४॥ ॥श्रीः॥ ॥श्रीः॥
स्येति किं ब्राह्मणभिस्सटा॥

माध्यायपरिसमाप्तेरयमङ्गाधिकारो युक्त इति। हूत इत्यादौ यजादित्वात् संप्रसारणं। जीन इति ज्याहिनेति संप्रसारणं ल्वादिभ्य इति निष्ठानत्वं निरुतं दुरुतमिति
वेञ् तन्तुसंताने अत्राङ्गेनं तत्र भूतिर्यो र्निदुरोरुपधाया इति हलीति दीर्घः पदे दीर्घत्वं न भवति। क्रिमिणामिति क्रिमिपामशब्दाभ्यां मत्वर्थे पामादिभ्यो नः पामनो नलो
पः स्त्रियां टाप् षष्ठी एकवचनं अत्र नामिति समुदायस्य प्रत्ययत्वात् तदपेक्षं पूर्वस्याङ्गत्वमिति न प्रत्ययापेक्षं पाङ्गत्वे विदीर्घत्वं न भवति। पामनामित्यत्र न
लोपे कृते ऽजन्तत्वाद्दीर्घप्रसंगः न च नलोपस्यासिद्धत्वं असुब्विधिस्थानत्वात् नस्थस्यादृष्टायां दीर्घत्वं सुब्विधिर्भवति। अस्तु गुणः सिद्धत्वं नोपधाया इति दीर्घत्व
प्रसंगः भिस्सा ओरनः। भिस्सटा तु दुग्धिका। न तु क्रिमिणामित्यत्र प्रत्ययत्रयस्यार्थवत्त्वेऽपि समुदायो नर्थकः परस्परासंबन्धात् एवं भिस्सा भिस्सटयो
भिस्शब्दः तत्रश्चार्थवद्ग्रहणे नानर्थकस्येत्येव न भविष्यतीति तत्राह॥ ॥छ॥ ॥

अंगाधिकार इत्यादि। सम्प्रसारणादीर्घत्वैत्वं नानादिः॰ यङ् वङ्ङ् इ ह्रस्वत्वतत्वे चांगस्येत्यधिकारो प्रयोजनं सम्प्रसारणादीर्घः प्रयोजनं दधिसनोतीत्यत्र माभूत् सं
प्रसारणादीर्घत्वं निरूतं दुरुतमित्यत्र माभूत् एत्वमेलिङि॰ वामस्य संयोगादेः निर्याया निर्वाया दित्यत्र माभूत्। नानादेः नियानस्य नो मा भूत् जीवतु त्वं
इयङुवङ् अर्थी स्वर्थी इत्यत्र माभूत्। नुट् ह्रस्वनद्यापो नुट् कुमारी आमित्याहेत्यत्र माभूत्। ह्रस्वत्वं केणः कुमारीक स्मे स्पृहयति कुमार्याः कं सुखं कु
मारीकमित्यत्र माभूत्। तत्वं अपो भिन्नतार इत्यत्र माभूत्। तस्मादेवमाद्यर्थो वक्ष्यं कर्त्तव्योंगाधिकारः सोन्यार्थः कृतो नामीत्यत्रापि दीर्घत्वं मवस्था
पयति अभिमते विषये नियमयति। अर्थवद्ग्रहणे परिभाषेति उपलक्षणमेतत् अनेनु कश्माणा इत्यत्र माभूद् कृत्सार्वधातुकयो दीर्घ इति दीर्घपान
मित्यत्र माभूदित्येवमर्थं लक्षणप्रतिपदोक्त परिभाषानजिवपुक्त न्यायश्च नाश्रयितव्यो भवति। षष्ठीस्थानेयोगे तिवचनादंगस्येति स्थानषष्ठी
यं नतश्चातोभिस ऐसित्यत्रानइति यंचमतमंगस्येत्यस्य षष्ठ्यं तस्य सामानाधिकरण्येन विशेषणानोयपघत इमकारमात्रस्य ग्रहणात् ब्राह्मणाभिस्से

अंगाधिकारः कृतो न्यार्थो नामि दीर्घत्वाद्यपि मवस्थापयतीति तदर्थमर्थवद्ग्रहणापरिभाषानाश्रयितव्या भवति॰ अंगस्ये
तिसंबंधसामान्ये षष्ठी यथायोगं विशेषे भवतिष्वतं॰ १ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्री४॥ ॥

णादावपि प्रसंगः। अवयवषष्ठ्यादीनां चाप्रसिद्धिः ततश्च अदुपधायागोहोंगस्येति स्थानषष्ठ्या अंत्येल्गुपसंहाराद्गोहश्चांत्यस्य स्याद्दुपधायाश्चे
तिवचनादुपधामात्रस्यैव। एवं शास इदङ् हलोरित्यादावपीत्याशंकायामाह अंगस्येति संबंधसामान्ये षष्ठीति। अयमभिप्रायः अधिकारोयं सर्वप
रार्थः षष्ठीस्थानेयोगेत्यपि परिभाषापरार्थो विचपरार्थयोः परस्परं संबंधोस्तीत्यथो क्तं गुणानां च परार्थत्वाद्संबंधः समत्वात्स्यादिति। ततश्चांग
स्येति षष्ठीस्वभावप्रयुक्तं संबंधसामान्यमेवार्थमभिधत्त इति। यथायोगमिति। यस्मिन्योगे यस्य संबंधविशेषस्याभिव्यंजकमस्ति तस्मिन्योगे तत्रैव विशे
षे पर्यवस्यतामर्थः। तद्यथा हंतेर्जइत्यादौ स्थानषष्ठी अदुपधायागोहः इत्यवयवषष्ठी युवोरनाकावित्यादौ निमित्तसंबंधषष्ठी लोकवत्तद्यथा लो
के देवदत्तस्येत्यस्मेदेनप्रवृत्ता षष्ठी पुत्रः पाणिः कंबल इति प्रतिनिसंबंधिवशात्तत्रतत्र विशेषे पर्यवस्यति १ ॥ श्री४॥ ॥७॥ ॥७॥

अथवेत्यादि। पूर्वं विवक्षितोपि षष्ठ्यर्थः सामान्यरूपस्तु कस्तदानीं तु प्रयोगसाधुत्वायैव षष्ठ्युच्चार्यते नमर्थविवक्षयेत्युच्यते अवश्यं चैव यया कयाचन वि-
भक्त्या निर्देष्टव्यं षष्ठ्यनुरोधस्तु बाल्येन तदर्थं प्रयोगसमाश्रयणात्। यथायोगं विभक्तिषु विपरिणाम्यत इति। लोकवद्देवदत्तं यथा उच्चानि देवदत्तस्य गृहा-
णि। आद्यो बैषधेयो देवदत्तः आमन्त्रयस्वैनं देवदत्तेन किमनेन नक्तं से देवदत्तेनेति। तेनातो भिस ऐसित्यत्र पञ्चम्या विपरिणामेन भवति अकारान्तादङ्गादिस-
यमर्थो भवति। आदिशब्देन युष्मदस्मद्भ्यां ङसोऽशित्येवमादि परिगृह्यते। अपिशब्देन तदन्तविधिं दर्शयति न केवलं षष्ठ्यर्थस्य तद्विशेषः सिद्ध इत्यपि

अथवा प्रातिपदिकार्थमात्रमविवक्षितविभक्त्यर्थमधिक्रियते तदुत्तरत्र यथायोगं विभक्तिषु विपरिणाम्यते ततोऽकारा-
न्तादङ्गाद्भिस ऐसित्येवमाद्यपि सम्पन्नं भवति॥ ॥हलः॥ ॥अङ्गावयवाद्धलो यदुत्तरं संप्रसारणं तदन्तस्याङ्गस्य दीर्घो
भवति- हूतः जीनः संवीतः हल इति किं उतः उतवान्- अङ्गावयवादिति किं निरुतं दुरुतं- तदन्तस्येति किं विद्धः वि-
चितः॥ ॥श्रीः॥ ॥

तु पञ्चम्यर्थोपीति। पूर्वत्र तु षष्ठ्येऽतो भिस ऐसित्यत्र निमित्तनिमित्तिसंबंधे षष्ठी अङ्गस्य निमित्तं यो भिस अङ्गस्य निमित्तं यस्मिन्नङ्गमित्येतद्भवति क-
स्मिंश्चित्तद्भवति प्रसङ्गे। ॥हलः॥ ॥हल इति किमिति। केनेदानीमुदाहरणेषु दीर्घसिद्धिः एवं मन्यते यथा शेषरति लक्षणं चाधिकारश्च तथा योगस्ये-
तरश्चित्तत्स्था भिमते विषये दीर्घो भविष्यतीति। अतिप्रसङ्ग इति तत्त्वरं विद्धो विचित इति व्यधलोऽनेनैव मार्जीकरणे। ग्रहिज्यादिना संप्रसारणं॥ ॥

॥२ ३॥ ॥२ ३॥ ॥

टीका·प०१
१५४

आण्इत्येवेति हलोपे पूर्वस्य दीर्घो णाइत्यतः। न च तस्यैकः का आड्इती ग्रहणेन विच्छेदः। तत्र हि विरोधाभावादि ग्रहणेनाणेव विशेष्यते रकोणाइति।
अथेदानीं वा वित्यारम्भाणा इत्येवा नवर्णिष्यते नेक इत्यत्र तन्नीयेति वा निपातनादिति। मा नामा माणा इत्येतदनुवृत्तं द्वितीयतृतीयचतुर्थेतियोपे नि
र्दिश्यमाना देव निपातनाद् नणो दीर्घत्वं न भविष्यतीत्यर्थः। न चैकमङ्गग्रहणं प्रकृतं तद्धलोपादि। विशेषणं सा लक्षापित्वमङ्ग स्येह न लभ्यते। ततश्च
विद्ध मित्यादावपि दीर्घः प्रसज्यते। अथ निर्दिश्यते कार्यिनहलः स्याद्विशेषणे। ततो निरूतमित्यादाव पि दीर्घत्वमापतेत्। सकृच्छ्रुतस्यैवैकस्यगुण

॥ अण्इत्येवतृतीयः तृतीयेति वा निपातनात्स्त्रदीर्घाभावः। अङ्गग्रहणमावर्त्तपितव्यं हल्विशेषणार्थमङ्गकार्यप्रतिप
त्त्यर्थं च॥ ॥नामि॥ ॥नामित्येतत्पष्ठीबहुवचनमागतनुट्कं गृह्यते तस्मिन्परतोऽङ्गस्य दीर्घो भवति· अग्नीनां वायूनां
कर्त्तॄणां हर्त्तॄणां॥ अणाइत्येतदत्र निवृत्तं· आगतनुट्कग्रहणमुत्तरार्थं कृतेचनुटि दीर्घप्रतिपत्त्यर्थः २ ॥ ॥

तेनो भयार्थता। अत आह अङ्गग्रहणमित्यादि। आवर्त्तमानं ब स्त्वेकमप्यनेकस्य शेषत्वं भजते भाजनत्वं पञ्चानामसहभोजने॥ ॥नामि॥ ॥नामि
त्येतस्य शास्त्रे क्वचिदप्यविहितत्वान्न सरित्यानार्थी गत्तो नुटानेन आगतो च नुडिन्त दागतनुट्कं। अग्नीनामित्यादि। अकारान्तस्य तु सुपि चेति दीर्घः सिद्धः।
कर्त्तॄणामिति। नन्वणा इति वर्त्तते तत्राह अणाइत्येतदिति। नतिस्रचतसृ इति प्रतिप्रतिषेधादि तिभावः। उत्तरार्थमिति। नोपधाया इति दीर्घत्वं सनु
ट्के आमि यथा स्यात् पञ्चानां सप्तानां षण्णां चतुर्णामित्येवं नुड्। चर्मणामित्यादावनुट्के मा भूदिति। कृते च नुटि दीर्घत्वप्रतिपत्त्यर्थमिति। आगतनुट्क राम०
स्य ग्रहणमित्यनुषङ्गः। २ ॥ १५४

अन्यथा हीसारि यथागतनुकस्य ग्रहणं न क्रियेत ततो ग्निआम् इति स्थिते दीर्घत्वं च प्राप्नोति नुद्धा परो नुट् इति तं दीर्घत्वं कृतेपि नुटि प्राप्नोत्यकृ
तेपि। ततो दीर्घे कृते अकृतत्वान्नुटेव न स्यात्। योयं सिद्धान्ते निमित्तत्वेनोपादानादयत्नेन सिद्धो नुट् स एव न स्यादित्येव शब्दस्यार्थः। ननु चा हवायं
दृष्टान्तान्नुडिति न च नित्यत्वाद्दीर्घे कृते च चिदपि दृष्टान्तमस्तीति न एवं विज्ञास्यामः भूतपूर्वं पदृष्टान्तमिति। न चैवेदं संप्रति दृष्टान्तमस्तीति न तिसृच
तसृ तिसृणां च तसृणां नेतरत्ति। हृत्वा चत्वतसृणामिति षट्चतुर्भ्यश्चेति नुट् सिद्धः तिसृणामित्यत्रापि दृष्टान्तघोपो वुडित्यत्रैव यद्यतत्वे रि
नुड्तैरेव नुट् सिद्धः। यदा तर्हि रुचेति दीर्घत्वमति षेधस्तदास्य वकाशः नवैकमुदाहरणं योगारंभं प्रयोजयति यद्येतावत्प्रयोजनं स्यान्नघा
पो नुडिमेव ब्रूयात्। दृष्टग्रहणान्नु भूतपूर्वगतिर्विज्ञायते पघेव मस्यांट्ख्रोत्र स्थिरधिसध्यमहाणामिसनडि कृतेपि भूतपूर्वमेत दृष्टान्तमिति

अन्यथा हि नुडेव न स्यात् नामि दीर्घश्रामिचेत्स्यात्कृते दीर्घे न नुड्भवेत् वचनाद्यत्र तन्नास्ति नोप
धायाश्च चर्मणां॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥ ॐ ॥ ॥ ॐ ॥

नुट् प्राप्नोतीति तत्र नोपधाया इति दीर्घत्वे नलोपे च अस्यानामिति प्राप्नोति यद्वा। यदा नुड्विधौ भूतपूर्वगतिस्तदा नुगनिलोभवति अन्न ड्नि स
हृति सर्वं नुटि कृते स्यानामिति प्राप्नोति। द्विपदामिसारेण दस्य लोपे कृते नुट्प्रसंगः। एवं पद्न्नोमासित्यत्र पेद्दृष्टान्तस्यादेशास्ते षपि प्रस
गोपोऽपः। तस्मान्न शक्यं भूतपूर्वगतिविज्ञानं। पद्योक्तं त्रेरितप नुड्वत्तेरेव तिसृणामित्यत्र नुट् सिद्ध इति न दृष्टप्रमाणं न हि दृष्टोस्त्यन रस्यवापे हाया
मसत्यां च कारे चाम ति अनुवृत्तिः स्यादेव सामानात्तस्मादन्यथा हि नुडेव न स्यादिति स्थितमेतत्। उक्तार्थसंग्रहश्लोकं पठति नामि दीर्घ इति।
यदि नुटमकृत्वा आमीत्येव सत्वं क्रियेते स्यर्थः। वचनादिति। वचनसामर्थ्याद्भूतपूर्वगतिर्विज्ञायत इति भावः। यत्र तन्नास्तीति। तिसृणामित्यत्र य
त्र दीर्घत्वं नास्ति स त्वनस्यावकाश इत्यर्थः। नोपधायाश्चेति। बशाद्वः समश्चेपे॥ ॥ ॥७॥ ॥७॥ ॥७॥ ॥ ॥

ई का॰ प॰ १
१५५

॥न तिसृचतसृ॥ ॥सूत्रे षष्ठीद्विवचनस्य लुका निर्देशः तिसृणां चतसृणामिति। कथं पुनरत्र दीर्घप्रसंगः यावता जंतस्य दीर्घो नामीति न चात्र जंत-
त्वं भवति कथं तिसृ आम् इति स्थिते नुट् प्राप्नोति अचि र ऋतः इति रादेशश्च परत्वात् रादेशस्तत्राह इदमेवेति॥ ॥छंदसि॥ ॥तिसृचतसृ इत्येतयो-
रिति। अविशेषेण तु विकल्पो दृश्यते। आर्येऽपि तिसृणाम् अग्निः धाताभातसृणामिति नैत्तिरीयके ह्रस्वः। बह्वृचे दीर्घः॥ ॥नृ च॥ ॥केचिदत्रेति। छं-
दस्युभयथेत्यतः। येत्यनुवर्तयंति तेन पूर्वसूत्रे तिसृचतसृग्रहणमनुवर्तयंति॥ ॥नोपधायाः॥ ॥अनजंतार्थ आरंभः। न इति षष्ठ्येकव-

न तिसृचतसृ। तिसृ चतसृ इत्येतयोर्नामि दीर्घो न भवति। तिसृणां चतसृणां। इदमेव नामि दीर्घप्रतिषेधवचनं ज्ञापकमवि-
रऋत इत्येतस्मात्पूर्वविप्रतिषेधेन नुडागमो भवतीति॥ ॥छंदस्युभयथा॥ ॥छंदसि विषये तिसृचतस्रोरुभयथा दृश्यते
दीर्घश्चादीर्घश्च। तिसृणां मध्यंदिने तिसॄणां मध्यंदिने चतसृणां मध्यंदिने चतसॄणां मध्यंदिने॥ ॥नृ च॥ ॥नृ इत्येतस्य
नामि परत उभयथा भवति। त्वं नृणां नृपते त्वं नॄणां नृपते। केचिदत्र छंदसीति नानुवर्तयंति। तेन भाषायामपि विकल्पो
भवति॥ ॥नोपधायाः॥ ॥नांतस्यांगस्योपधाया नामि परतो दीर्घो भवति। पंचानां सप्तानां नवानां दशानां। न इति किं
चतुर्णां। नामीत्येव चर्मणां ३

तनांतं सौत्रत्वान्निर्देशस्य यकारलोपस्यासिद्धत्वमनाश्रित्याहुणः। अपर आह नेत्यविभक्तिको निर्देशः अकारश्चोच्चारणार्थ इति। य-
चा नाम्भिस्यादौ सुब्विधौ नलोपस्यासिद्धत्वान्नांतत्वं। उपधाग्रहणमाद्यचो मा भूत्। नैतदस्ति प्रयोजनं। दीर्घश्रुत्योपस्थापितमचं नाम्परत-
या विशेषयिष्यामः। उत्तरत्र च सर्वनामस्थानपरतया तत्र येन नाव्यवधानमित्येकेन वर्णेन व्यवधाने भविष्यति। उत्तरार्थं तु इन्हन्पूषार्य-
म्णां शा विनत्र दीर्घविधेरुपधानियमार्थमिति वक्ष्यति तदर्थमुपधाग्रहणं ३ ॥ ॥ ॥ ॥ ॥

रा॰ म॰
१५५

सर्वनामस्थाने॥ ॥मज्जनीति विभाषाडि· मृशोरित्सल्लोपाभावपक्षे दीर्घत्वप्रसंगः। एवं चर्मण्वमित्यादावपि प्रसंगः॥ वा षपूर्वस्य॥ ॥अत्र
दीर्घश्रुतोपस्थापितस्याचो विशेषणं मुपधाग्रहणं षपूर्वस्येत्येतदपि तस्यैव विशेषणं तेन पुल्लिंगस्याविरोध इति मन्यमानस्याह षपूर्वस्याच इति।
ऋभुक्षणमिति। ऋभुक्षिं छन्द उणादिषु निपातितः। इतो त्सर्वनामस्थाने इत्यस्य कारः॥ ॥सान्तमहतः॥ ॥सकारेऽकार उच्चारणार्थः।
सान्तोपस्य समासान्तः। सान्तेति पृथक्पदं लुप्तषष्ठीकं संयोगस्य विशेषणं तद्विशिष्टसंयोगो नकारस्य विशेषणं महच्छब्दोपि तस्यैव विशेषणम्

सर्वनामस्थाने चासंबुद्धौ॥ ॥सर्वनामस्थाने च परतोऽसंबुद्धौ नोपधाया दीर्घो भवति· राजा राजानौ राजानः राजानं राजा
नौ· सामानि तिष्ठन्ति सामानि पश्य· सर्वनामस्थान इति किं राजनि सामनि· असंबुद्धाविति किं हे राजन्· हे तक्षन्॥ ॥वा ष
पूर्वस्य निगमे॥ ॥षपूर्वस्याचो नोपधाया निगमविषये सर्वनामस्थाने परतोऽसंबुद्धौ वा दीर्घो भवति· स तक्षाणं निष्टतम
ब्रवीत स तक्षणं निष्टतमब्रवीत्· ऋभुक्षाणमिन्द्रं ऋभुक्षणमिन्द्रं· निगम इति किं तक्षा तक्षाणः॥ ॥सान्तमहतः संयो
गस्य॥ ॥सकारान्तस्य संयोगस्य यो नकारः महतश्च तस्योपधाया दीर्घो भवति सर्वनामस्थाने परतोऽसंबुद्धौ· श्रेयान् श्रेयांसौ
श्रेयांसः श्रेयांसि पयांसि यशांसि· महतः खल्वपि· महान् महान्तौ महान्तः· असंबुद्धाविति किं हे श्रेयन् हे महन्॥ ॥ ॥

र्वनामस्थान इत्यनेनानुवृत्तेन सान्तः संयोगो महच्छब्दश्च विशेष्यते तेन हंसः हंसाविपत्र दीर्घाभावः। महतश्चेति यो नकार इत्यपेक्ष्यते तस्ये
ति। नकारस्य। कः पुनर्नकारस्योपधायाश्च संबंधः यावता षष्ठीनिर्दिष्टमुपधायोः स्यादलः पूर्वः सान्तसंयुपधा सत्ये। इह तु गम्यमानात्सामीप्यल
क्षणः संबंधः नकारसमीपवर्तिन्यास्तमेव नकारान्तं समुदायं प्रत्युपधायात्त्वार्थः। कल्पसूत्रेषु च प्रोरोऽयं व्यवहारः। तद्यथा विसर्जनीयोऽ
नस्य शरोऽपधोऽरिफत इति। श्रेयानिति। प्रशस्यस्य श्रः। उगिदचामिति नुम्। श्रेयांसीति। तत्र शसोः शिः। नपुंसकस्य झलच इति नुम्। महानिति।
। इह महच्छब्दस्य वर्त्तेति वचनादुगिदचामिति नुम्॥ ॥

ईका·प·०१ अप्तना॥ ॥अप इति। अप्शब्दस्य नित्यं बहुवचनान्तत्वाद्द्विवचनैकवचनयोरसंभवः। बह्वर्था पीति। बहुव्रीहिः। अङ्गाधिकारे तस्य च तदुत्तरपदस्य
१५६ चे निति दंतविधिरभ्युपगतः। किं पुनरत्र प्रयोजनं। तावद्बहुकप्रत्ययरितिप्रासस्य समासान्तो नस्याभावस्माह तत्रेष्टि। यस्तु नरेष्वप्ननं तदृशं यति नि समयीति।
कृता कृतप्रसङ्गित्वान्नित्यो नुम्। जनायपञ्चादानीति। न लोकाव्ययनिष्ठाखलर्थतृनामिति षष्ठीप्रतिषेधान्न कर्मणि द्वितीयैव भवति। एतच्च तृन्नन्तत्वा
भिप्रायेणोक्तं। एतेन कटस्येति व्याख्यातं। तुरिष्ठेमेयस्स्विति तृच्छन्दसीति च तृ सामान्यनिर्देशे कर्तृभेदत्र न तृचो भेदेऽभिधानेन प्रयोजनं चिंत्यं॥ अ

अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणां॥ ॥अप्तृनो नप्तृजं तृ स्वसृ नप्तृ नेष्टृ त्वष्टृ क्षत्तृ होतृ पोतृ प्रशास्तृ इत्ये
तेषां चाङ्गानामुपधाया दीर्घो भवति सर्वनामस्थाने परतोऽसंबुद्धौ। अप्तृ आपः। बह्वर्थान्वितरत्रऽन्यानीति केचिदिच्छन्ति। तत्र समासा
न्तविधिरनित्य इति समासान्तो न क्रियते। नित्यमपि च नुमम कृत्वा दीर्घत्वमिष्यते। तृन् कर्तारौ जनापवादान् कर्तारः। तृच् क
र्तारौ कर्तारः। हर्तारौ हर्तारः। कटस्य। स्वसृ स्वसारौ स्वसारः। नप्तृ नप्तारौ नप्तारः। नेष्टृ नेष्टारौ नेष्टारः। त्वष्टृ त्वष्टारौ त्वष्टारः। क्षत्तृ
क्षत्तारौ क्षत्तारः। होतृ होतारौ होतारः। पोतृ पोतारौ पोतारः। प्रशास्तृ प्रशास्तारौ प्रशास्तारः। नप्त्रादीनां ग्रहणमव्युत्पत्तिप
क्षे विध्यर्थं व्युत्पत्तिपक्षे नियमार्थं एवंभूतानामन्येषां संज्ञाशब्दानां दीर्घो मा भूदिति। पितरौ पितरः। मातरौ मातरः। असं
बुद्धाविति किं हे कर्तः हे स्वसः ४ ॥ ॥
अव्युत्पत्तिपक्ष इति। उणादिषु नाव श्यं व्युत्पत्तिकार्यं भवत्येतदतः। हृकमिकंसेत्यत्र कंसग्रहणाल्लभ्यते ज्ञापकादिति भावः। व्युत्पत्तिपक्ष इति। एम॰
नमेस्तृच्चिमकारस्य पकारः। नम्रानयतेस्तृ निषुक् नुत्वष्टानेष्टा विषेरधोपधायाः। त्विषेरिडभावस्तन्विष्टिर्नि क्षत्ता। होता पोता तनेवा प्रपूर्वोऽच्छा १५६
सेस्तृच्च नि तुं च प्रशास्ता। एवंभूतानामिति। अस्येवविवरणं संज्ञाशब्दानामिति ४ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

इन्हन्।। ।।अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति। तिइन्ग्रहणेनान्तदन्तं गृह्यते इतरेभ्योपि केवलेभ्यः शिर्न संभवति कथं
हन्निति हेतेः क्विवन्तस्य ग्रहणं ब्रह्मह्याद्युपपदस्यैव हन्तेः क्विब्विहितः इतरोपि च पुल्लिंगो न तस्मात्तत्रैवेरेव तदन्तविधिर्विज्ञायत इत्याह इन्हन् पूषन्नर्यमन्नित्येव
मन्तानामिति। बहुदंडीनि। नि चैवं षम्प्यपरिहारार्थं यायघयोर्बहुपूर्वयोः। उपन्यासो बहुत्वं च पूर्वाद्योः कालभेदत इति। इहं दंडीनि ब्राह्मणकुलानि ब्रह्म
हाणि ब्राह्मणकुलानि इत्येतेषामिव बहुवृत्रहं स्राघयोरिन हन्नित्येतयोरुदाहरणत्वेनोपन्यासः संभवतीति वोध्यं। वैषम्यपरिहारार्थं तु बहुपूर्व
योरुपन्यास इत्युत्तरं। वृत्रहा इंद्रः। स एकः एवं पूषार्यमणोः तेषां कथं बहुत्वं विशेषणमिति वोध्यं। मन्वन्तरादिकालभेदेनेंद्रादयो भिद्यन्त इत्युत्तरं। पद्य

।।इन्हन्पूषार्यम्णां शौ।। ।।इन् हन् पूषन् अर्यमन् इत्येवमन्तानामंगानां शौ परत उपधाया दीर्घो भवति- बहुदंडीनि बहुछ-
त्रीणि- बहुवृत्रहाणि बहुस्रग्वहाणि बहुपूषाणि बह्वर्यमाणि। सिद्धे सत्यारंभो नियमार्थः इन्हन्पूषार्यम्णामुपधायाः शावेव दी-
र्घो भवति नान्यत्र- दंडिनौ छत्रिणौ- वृत्रहणौ पूषणौ अर्यमणोः।। ।।श्रीः।। ।।श्रीः।। ।।श्रीः।। ।।श्रीः।।

।।छ।। ।।छ।। ।।छ।। ।।छ।। ।।

बहुषु पत्तेष्वाहुः नाइंद्रादयो येन्द्राह्मणकुलेस्मान्नितप्योभ्यंते। ननु च सर्वनामस्थाने चासंबुद्धाविति दीर्घत्वं सिद्धं तत्किमर्थोयमारंभ इति गत्रादीनामु
पधायाः शावेवेति। विपरीतस्तु नियमो न भवति इन्नादीनामेव शाविति सर्वनामस्थानेष्वेकवचने द्विवचने बहुवचनाश्रयेण इति निर्दिशान्त। वृ
त्रहणाविति। नवत्रास्तु सर्वनामस्थाने चासंबुद्धाविति प्राप्तस्य दीर्घस्य नियमेन माहन्त्रिः अनुनासिकस्य क्विझलोः क्ङितीति प्राप्तो दीर्घः कस्मा
न्न भवति न ह्यसौ तस्य नियमः असकृतत्वात् संज्ञाहितत्वाच्चासतः। नियमविधानसामर्थ्यात्तु तस्याप्यनेन निवृत्तिः। अस्त्वेवं सर्वनामस्थाने वि
भक्तौ नरे तु सर्वस्य तु नामिकलक्षणो दीर्घः प्राप्तो मत आह।। ।।छ छ।। ।।छ छ।। ।।०।। ।।०।। ।। ।।

टीका॰ पृ॰ १ दीर्घविधिरिति। पर्युदस्त्राखेरृत्रादीनां दीर्घविधिः नं विनियमतस्य नियमं कृत्वा। कमुटि सर्वनामस्थाने उपलक्षणमेतत् तेन शसादेशोपि शिर्दि
१५७ ष्यते। इति शब्देहेतौ स च भिन्नक्रमः श्लोकांते द्रष्टव्यः। ततः किं कुर्यात् शेषो नियमं पुनर्विदध्यात्। एवकारो भिन्नक्रमो नेत्यस्यानंतरं द्रष्टव्यः। ए
कस्मिन्योगे नियमद्वयस्य कर्तुमशक्यत्वाद्योगविभागः कर्त्तव्य इत्यर्थात् उक्तं भवति। इतुहन्पूषार्यम्णां शिसौ इति योगः। सर्वनामस्थाने इति वर्त्त
ते। इन्नादीनां च सर्वनामस्थाने एव दीर्घो भवतीत्यर्थः। अत्र हन्नमतिरिक्तानां ग्रहणमुत्तरार्थं। ततः शाविति द्वितीयो योगः सर्वनामस्थाने शि
शावेव न सर्वत्र। ततः सौ चेति सूत्रं विशेषार्थं। एवं च योगः। आस्येतिश्चाचार्यस्यार्यमणां हन्नीति। सप्तम्येकवचने विशिष्टो भो ङि इत्योरित्यल्लोपाभावपक्षे
अनुनासिकलक्षणो दीर्घो न भवतीत्यर्थः। सप्तम्येकवचनमुपलक्षणं सर्वत्र दीर्घप्रसंगस्योक्तत्वात्। एवं योगविभागे न चोद्यं यदिह सैकस्मि
दीर्घविधिर्य इहेन्प्रभृतीनां तं विनियम्य सुटीति सुविद्वान्। शेषो नियमं पुनरेव विदध्यात् पूषाहणीति तथा स्यान्नदुष्येत्। शास्मि
निवर्त्य सुटीत्यविशेषे शेषो नियमं कुरुतां यसमीप्स। दीर्घविधेरुपधानियमात् मोहं तिपि दीर्घविधौ च न दोषः ५ ॥
योगे यदिहत्तुमाह शास्मीति। शास्मि उपदिशामितं प्रकारं येनैकयोगेपि दोषाभावः। अत्रापि सुटि इति सर्वनामस्थानं लक्ष्यते। सर्वनामस्थान
ग्रहणं निवर्त्य अनाश्रित सर्वनामस्थानत्वविशेषे प्रत्ययत्वमात्र आश्रये शेषो नियमं कुरुतां एवं वा कुरु पूर्वेक्तं वा प्रकारमित्यर्थः। असत्यपि
शास्त्रीयेधिकारे लौकिकोपेक्षा लक्षणः संबंध इति तत्रेह स्यार्थमाहत्यसमीप्सेति। अयं च लक्षणमपि संबंधमनाश्रित्येत्यर्थः। एवं च
विशेषमनपेक्ष्य शेषो नियमः क्रियमाणः प्रत्ययत्वेन तुल्यजातीये सर्वत्र प्रत्ययांतरे निवृत्तिं करोति। यद्येवं वृत्रहणौ वा चरतीति वृत्रहायतेरिति क्विपि ङि अ
कारे सार्वधातुके यो विसर्गेपि दीर्घ इति स्यादित्यत आह दीर्घविधेरिति। निर्द्धारणे एषा षष्ठी जातावेकवचनं उपधाशब्देन उपधालक्षणं दीर्घत्व रा॰ म॰
मुच्यते। दीर्घविधानं मध्ये उपधालक्षणस्य दीर्घस्य नियमादित्यर्थः। एतच्चोपधाग्रहणमनुवर्त्तते लक्ष्यते। हंतिपः तस्मिन्सौ दीर्घविधिनात्र १५९
नदोष इत्यर्थः। स्वचित्तुहंतेति निपातोभिमुखीकरणार्थः प्रदाते। अत्रापि ग्रहणमुपलक्षणं दंडीभूतं इत्यत्र हो चेत्यपि दीर्घो भवतीति च ५

रदानामसत्यपियोगविभागेसर्वनामस्थानापेक्षायांसत्यामपिनदोषइत्याहसुपीति।अपिशब्दोऽप्रकृतप्रतिषेधइत्यनेनसंबंधनीयः।वाग्रहः
पक्षांतरंद्योतयति।अत्रापिसुटितिसर्वनामस्थानोपलक्षणांतरयमर्थः।अथवासुटिसर्वनामस्थानेप्रकृतेप्रकृतप्रकरणादयेसमासः।एतेन
लौकिकमाधिकारमभ्युपगच्छतिशास्त्रीयस्तुनैवाभ्युपगम्यते।अनवकाशइतिहेतुगर्भंमिदंविशेषणं।यतोनवकाशःशोनियमः।अतोप्रकृतस्या
पनुनासिकदीर्घस्यप्रतिषेधेप्यारब्धेलोकवत्प्रायाणामपिप्रवर्त्तते।कथमनवकाशत्वमतआहयस्यहीति।द्विविधंसर्वनामस्थानंशिःसुटश्च।तत्रशिर्न
पुंसकस्यसंबंधीतत्रएवतस्यविधानात्।सुट्तुस्त्रीपुंसयोःसुडनपुंसकस्येतिवचनात्।ततश्चयस्यनपुंसकस्यसंबंधिनिशोनियमः।क्रियतेसुटिस
र्वनामस्थानसंज्ञकेनैतन्नपुंसकसंभवति।अनपुंसकस्येतिवचनात्।हिशब्दोहेतौ।यस्मादेवंतेनकारणेननतत्रसर्वनामस्थानेसुटिनियंतमंआव

सुघपिवाप्रकृतेनवकाशःशोनियमोऽप्रकृतप्रतिषेधःयस्यहिशोनियमःसुटिनेलत्रेननतत्रभवेदिनिपमंपाहंतेरनुना
सिकस्यक्विझलोःक्ङितीतिपदीर्घत्वंतदपिनियमेनबाध्यतेहत्रहणोभ्रूणहनीति·कथं·योगविभागः।क्रियतेऽह्नन्पूषार्य
म्णां।सर्वनामस्थानएवदीर्घोभवतिनान्यत्रेतिततःशाविति।द्वितीयोनियमः।शावेवसर्वनामस्थानेदीर्घोभवतिनान्यत्रे
ति॥ ॥एमनाम॥ ॥

सेदीर्घत्वंनसंभवतीतिसामर्थ्यादविशेषेणनियमस्याश्रीयतेएतदुक्तंभवति।यदिप्रकरणप्राप्तंसर्वनामस्थानत्वंशेराश्रीयतेतदानपुंस
कसंबंधित्वमप्याश्रयणीयंउभयाश्रयणेवायमर्थोभवति।दन्नादीनांनपुंसकानांशावेवसर्वनामस्थानेदीर्घत्वमितिएवंविधस्यनियम
स्यकिंतुल्पज्ञानीयंआवर्त्तनीयंनपुंसकानामेवैषांसर्वनामस्थानांनरंनचतदस्तीतिनियमविधानसामर्थ्यात्प्रकरणप्राप्तंसर्वनामस्था
नत्वंसामर्थ्याप्राप्तंवनपुंसकत्वंउभयमप्यविशेषात्स्यादिप्रत्ययमात्रेस्त्रीपुंससंबंधिनिदीर्घत्वंआवर्त्ततइति।दिनियमस्यसाधुनियम्यं।
हंतेरनुनासिकस्येत्यादिनाप्रथमश्लोकंमाचष्टे॥ ॥

टीका-प०१
१५८

सर्वनामस्थान इत्यादिना द्वितीयस्य पूर्वार्द्धं यस्त्विसादिना पश्चार्द्धं। अथवेत्यादिना तृतीयश्लोकं। अनुवर्त्तमानेपीति। लौकिकस्तत्रानुवृत्तिर्विवक्षितान
शास्त्रीयाश्चरितत्वनिबंधना। तथाहि सति सामर्थ्यप्राप्तस्य नपुंसकत्वस्यैव परित्यागः स्यात्। नवचनप्राप्तस्य सर्वनामस्थानत्वस्य सामर्थ्यादित्युक्तं त
देवदर्शयति शिशब्दो हीति। अविशेषेणेति। नपुंसकत्वं सर्वनामस्थानत्वं च विशेषमनाश्रित्येत्यर्थः। पूर्वं नपुंसकत्वाप्रसंजनेन केवलसर्वनामस्था
नत्वाश्रयेणानियमे दोषप्रसंगात्। तथा नाश्रीयत इत्याद्ययोः श्लोकयोरुक्तं वृत्तिकारास्तु सर्वनामस्थानत्वपरित्यागेन केवलं नपुंसकत्वाश्रयणमपि
दोषप्रसंगादेव सर्वथा न कार्यमित्याह तत्राचेति। वशब्दोपि शब्दस्यार्थे भिन्नक्रमश्चेतदित्यस्यानंतरं द्रष्टव्यः। तेनैतस्मिन्नियते क्रियमाणे नपुंसक

सर्वनामस्थान इति वा निवृत्तमेतत्। इन्हन्पूषार्यम्णामुपधायाः शावेव दीर्घो भवति नान्यत्रेति। सर्वस्योपधालक्षणस्य दीर्घस्यानि
यमेन निवृत्तिः क्रियते। यस्तु न उपधालक्षणः स भवत्येव। हत्रहायते भ्रूणहायते। अथवानुवर्त्तमानेपि सर्वनामस्थानत्वे ग्रहणे सामर्थ्या
दयमविशेषेण नियमः। शिशब्दो हि सर्वनामस्थानं नपुंसकस्य न तस्यान्यत्। सर्वनामस्थानमस्तीत्यविशेषेण नियमः। तत्र तु नपुंस
कस्येति तन्नाश्रीयते तेनानपुंसकस्यापि दीर्घो न भवति। सर्वनामस्थानसंज्ञाविधाने तु नपुंसकस्याप्यपरोस्तीति तत्र नियमः क्रियमाणे

नपुंसकस्यापि स्यात् ६ ॥ ॥

एतेनेति द्रपि विशेषणेनाश्रीयत इत्यर्थः। किमेवं सति सिद्धं भवतीत्याह दर्शयति तेनेति। तदाश्रयणे हायमर्थः स्यात् इन्नादीनां नपुंसकानां शावेव दीर्घत्व
मिति तत्र श्वभ्रूणहनि ब्रह्महणा कुल इत्यत्र शावेव दीर्घत्वं न स्यात् तत्र लिंगान्तरेण तस्मान्नपुंसकत्वमपि विशेषणं नाश्रयणीयमिति भावः। कथं पुनरयु
क्तस्यासंबद्धस्य नपुंसकत्वस्याश्रयणप्रसंग इत्याह सर्वनामस्थानविधाने त्विति। सर्वनामस्थानमिति तदस्यमुपलक्षणं यदिदं सर्वनामस्थान
शिशब्दः तस्य यद्विधानं जस्शसोः शिरिति तत्रेत्यर्थः। सर्वनामस्थानसंज्ञाविधाने त्विति पाठे योयं सर्वनामस्थानसंज्ञः शिशब्दस्तद्विधान इत्यर्थः।
सर्वनामस्थानसंज्ञाविधाने त्विति पाठे योयं सर्वनामस्थानमिति तेनसंज्ञाविधानं तत्र नपुंसकग्रहणमस्ति। अथ शिशब्दस्य नपुंसकत्वाव्यभिचा
रादर्थान्नपुंसकस्याश्रयणं न स्त्रैव सूत्रे शकारेनैवमुक्तं किमुच्यते संज्ञाविधाने त्विति। अथावश्यमयमेव पाठो योन्यस्तदा ऽः प्रश्लेषः स च यात्वर्था
नुवादी सर्वनामस्थानसंज्ञस्य विधाने सर्वनामस्थाननं तत्रेति। सस्वार्थीयं पूर्वमवोचाम। मुशब्दो हेतौ। अपि स्यादिति संभावनायां यस्मान्नपुंसकादे

वशेर्विधानं तस्मात्तत्र शिशब्दे क्रियमाणस्य नियमस्य नपुंसकविषयताभावमनन्यार्थः ६ ॥ ॥

राम०
१५८

अंत्वसंतस्य॥ ॥अत्रेत्यादि॥ ॥ननु च परत्वान्नित्यत्वान्नित्यत्वाच्च नुमेव पूर्वं प्राप्नोतीति तत्राह परादिहीति। इह दीर्घश्रुत्यावः स्थानित्वं तच्च न स्वरूपेण किं तर्हि
उपधायां इत्यनुवृत्तेरुपधात्वनिबंधनं अत एवाजंतारस्य दीर्घभावः। तस्मात् स्थानिमेवात्र निमित्तशब्दः प्रयुक्तः। पिंड्यग्रमर्मवद् इति। प्रसुप्तसुप्रवदने। व सम्राजो
रने। क्विप् न नु चानर्थकत्वादेवात्र न भविष्यति मूलोदाहरणेषु त्वसुप्रत्ययस्यार्थवत्वात् सिद्धमत आह अनर्थकोपीति। अत्रेवहेतुमाह अनिनस्मन्ग्र
हणानीति। अयमेव धातुप्रतिषेधो ज्ञापयति अस्तीयं परिभाषेति। नेतरस्ति ज्ञापके असार्थमेतत्स्यात् शत्रून स्यतीति क्विप् इति तस्माद्वचनमे

वेच॥ ॥सावसंबुद्धौ परतो ऽन्हन्पूषार्यम्णामुपधाया दीर्घो भवति। दंडी वृत्रहा पूषा अर्यमा। असंबुद्धाविति किं। हे दंडिन्। हे वृत्र
हन्। हे पूषन्। हे अर्यमन्॥ ॥अंत्वसंतस्य चाधातोः॥ ॥अंतु अस् इत्येवमंतस्य अधातो रूपधायाः सावसंबुद्धौ परतो दीर्घो
भवति। भवतु। भवान्। कृतवतु। कृतवान्। मतुप्। गोमान् यवमान्। अत्र कृते दीर्घत्वे नुमागमः कर्तव्यः। परादिहि परत्वान्नित्य
त्वाच्च नुम् स्यात् दीर्घस्य निमित्तमनुपधा हि स्येत। असंतस्य सुपयाः सुयशाः। सुस्रोताः। अधातोरिति किं। पिंड्यग्रसत् इति पिंड
ग्रः। चर्मवस्त इति चर्मवः। अनर्थकोप्यसहजोवीश्यते। अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदंतविधिं प्रयोजयंतीति॥ ॥

वेदं अनुग्रहणेत पर्यवतोतुशब्दस्याभावादेवानर्थकस्य ग्रहणं। अंतग्रहणमनर्थकं केवलयोरत्वसोरभावादेव सिद्धमत आह अंतग्रहणमित्यादि ब
पदेशोलक्षणावाक्यानि गणपाठश्च प्रयुज्यंत इति प्रयोगः उपदेशो प्रयोगउपदेशप्रयोगः उपदेशेपत्ययुज्यते शब्दरूपं तदेकदेशस्याप्यत्वसंतस्य प
रिग्रहार्थमित्यर्थः। असति पुनरंतग्रहणे कस्य ग्रहणं न स्यादित्यत आह इतरथा हीति। तमनुपूर्व ग्रहणमुपलक्षणं कुमुदनड्वेतसेभ्यो ड्मतुप्रत्ययस्या
पि ग्रहणं न स्यात्। किं कारणमित्यत आह उपदेश इति। रूपनिर्ग्रहो रूपनिश्चयः स यद्यपि लोके प्रयोगे भवति अनुबंधयुक्तं तु रूपमुपदेश एव निश्ची
यत इत्युपदेशइत्युक्तं। नायमत्वंत इति यद्यपि नावतो वधेरनुरंतः तथापि न तस्य रउपदेशः यस्य रश्चोपदेशो न सो त्वंतः पकारेतत्वात् ततश्च न तस्य ग्रह
णं न स्यात्॥ ॥छ॥ ॥छ॥ ॥

ई का॰ ५०१ अंतग्रहणमसामर्थ्यात्तु नावतोऽपवर्धेरत्वंतस्य ग्रहणं ॥ ॥ अनुनासिकस्य ॥ ॥ अंगाक्षिप्तस्य प्रत्ययस्य झलादिविशेषणात्तदादिविधिः क्विझलोरिति
१५९ तं भवत्यभिचारणं झलादेरेव विशेषणं। प्रतानित्यादि। तमुकांक्षायां शमु उपशमे दमु इत्यादेः। एतेभ्यः क्विप् मोनोधातोरिति नत्वं। पङ्क्तु गंतारं
मिति। तस्य सार्वधातुकमपिदिति ङित्वं। वस्तु कथनं चैतत् नत्वेन ननिष्ठा शंका वार्यते ङि। तिरवल्पीसुप क्रमात्। किंच निष्ठायामिडभावितस्यैन

अंतग्रहणमुपदेशप्रयोगैकदेशस्याप्यत्वं तस्य परिग्रहणार्थं। अन्यथा हि मनुपोग्रहणं न स्यात। उपदेशोऽरूपनिर्ग्रहे हेतो
नायमत्वंत इति। अर्थं बुद्धाविलेव। हे गोमन्। हे सुपथः ॥ ॥ अनुनासिकस्य क्विझलोः क्ङिति ॥ ॥ अनुनासिकांतस्यांग
स्योपधाया दीर्घो भवति क्वि प्रत्यये परतो झलादौ च क्ङिति। प्रतान्। प्रशान्। प्रदान्। झलादौ क्ङिति। शांतः। शांतवान्। शा
न्तो शांतिः। ङि। तिरवल्पि। शांशांतः। तंतां तः। पङ्क्तु गंतारयंतस्य। अनुनासिकस्येति किं। ओदनपक्। पक्वः पक्ववान्। क्वि
झलोरिति किं। गम्यते रम्यते। क्ङितीति किं। गंता। रंता ॥ ॥ अज्झनगमां सनि ॥ ॥ अजंतानामंगानां हनिगम्योश्च सनि
झलादौ परतो दीर्घो भवति। अजंतानां। चिचीषति। तुष्टूषति। चिकीर्षति। जिहीर्षति। हन्। जिघांसति। गम्। अधिजिगांस
ते ७ ॥ श्रीः ॥ ॥
गोदिलाघस्य विभाषेति निषेधः एकाच इति तत्रानुवृत्तेः ॥ ॥ अज्झनगमां ॥ ॥ अत्रवधुपधायाइत्यनुवर्तते अजंतेषु मंजनस्य दीर्घप्रसंगः तस्मा
न्निवृत्तं। यद्येवं हनिगम्योरल्लोस्य दीर्घप्रसंगः तन्न। अचश्चेत्युपस्थानात्। नचैवमभ्यासस्य प्रसंगः हन् सइति। स्थिते परत्वाद्दीर्घत्वे कृते घुतः एम॰
प्रसंगविस्तानाद्विर्वचनं अस्तु वाभ्यासस्यापि दीर्घः ह्रस्व इति ह्रस्वो भविष्यति। जिघांसतीति। अभ्यासाच्चेति कुत्वं। अधिजिगांसत इति इङः श्वेति १५९
गमिरादेशः ७ ॥ ॥

इह बहुयोगमयः गम्लृ सृप्लृ गतौ विति धातुः गोगमिरबोधने समनिचेती एणादेशः इणाङ्कइङः श्चैकस्वादेशः सदृशोपलक्षते अतो धातुमेकं वर्जयि
त्वा त्रयाणामादेशस्य ग्रहणं तथा च वक्ष्यति अज्झादेशस्य गमेरिति। एवं चेणि कोणादेशस्यापि गमेर्भविकर्मणोणा त्मनेपद इड्भावे झलादौ सनि कि
ति दीर्घो भवत्येवं संजिगांस्यते इति। संजिगंसत इति गमेः समो गम्यृच्छी त्यात्मनेपदं विहितं तत्र वा कर्मकादिति वर्त्तते तेन सकर्मकादपि पूर्ववत्सन इत्या
त्मनेपदं सकर्मकादेव भवति ततश्च मातरमित्ययपाठः मात्रेति तृतीयांतं पठितव्यं संजिगांसते इति संपूर्वादिमः सन्नसकर्मकत्वात्परस्मैपदं छांदस
त्वादिङ्भावः बहुलं छंदसमाश्रीणोमिमप्रभावः प्रायेण तु हन्तो माह्वंपठ्यते। इहेत्यादिना गमेरिङादेशस्येति वक्तव्यमित्येनत्प्रत्याचष्टे कथं पुनः

गमेरिङादेशस्येति वक्तव्यं इह माभूत्। संजिगंसते वत्सो मात्रेति। स्वर्गं लोकं समजिगांसदिति छंदसि यदनिङादेशस्यापि दीर्घ
त्वं दृश्यते तदन्येषामपि दृश्यत इत्येते न भवति। इहाज्ग्रहणं न कर्त्तव्यं सनि दीर्घो भवतीत्येतावदेव सूत्रं कर्त्तव्यं। तत्राचार्यस्य मार्गस्य वि
शेषणे यदि सिद्धमज्झंतस्य दीर्घत्वं तत्किं पुनः प्रवृत्तिभेदेन गमेरपि विशेषणार्थं। अज्झंतस्याङ्गस्य दीर्घो भवति। अज्झादेशस्य गमेरिति तेन
वक्तव्यमेतद्गमेरिङादेशस्येति॥ ॥तनोतेर्विभाषा॥ ॥तनोतेरङ्गस्य झलादौ सनि विभाषा दीर्घो भवति। तितांसति तितंसति। झलीत्ये
व। क्रमित्वा। प्रक्रम्य उपक्रमोति बहिरङ्गोपि ल्यबादेशोंतरङ्गानपि विधीन् बाधत इति पूर्वमेव दीर्घत्वं न प्रवर्त्तते॥ ॥छ॥ ॥

सनि दीर्घ इत्येतावति सूत्रे क्रियमाणे ऽज्झंतस्यैव दीर्घत्वं लभ्यते तत आह तत्राचेत्यादि। सनि दीर्घ इति सूत्रे क्रियमाणे गमेरिति वर्त्तते दीर्घश्रुत्या गावश्चे
त्युपतिष्ठते तत्र विशेषणविशेष्यभावं प्रति कामचारादुच्यते इह निगम्यो दीर्घविधानाद्रूपसामान्यं गमः स्यादिति विशेष्यते न त्वज्झंगेन विशेषणे न तदंतविधि
र्भवती। तेन सिद्धमज्झंतस्य दीर्घत्वं यथा। कृत्सार्वधातुकयोरित्यत्र तस्मादिहाज्ग्रहणं न कर्त्तव्यं किमर्थं तर्हि क्रियत इत्याह तात्क्रियत इति। प्रवृत्तिभेदेन
व्यापारभेदेन। तमेव दर्शयति अज्झंतस्येति। एवं चाज्ग्रहणसामर्थ्यादावर्त्तितं उसुक्तं भवति॥ ॥तनोतेः॥ ॥उपसंख्यानेनेति। तनिपतिदरिद्राणाम्
उपसंख्यानमित्यनेन॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥क्रमश्च॥ ॥अनुनासिकस्याक्विझलोः क्ङितीति नित्यस्य दीर्घस्यापवादोयं विकल्पः। उपधाया इति। यद्यप्युपधाग्रहणं पूर्वमेव निवृत्तं तथाप्यच्चश्चेत्युप-
स्थानात्ल्लस्यचाचोसंभवादेवमुक्तं। क्रमित्वेति। उदितो वेति पक्षे इट्। वहिरंगो पिल्यवादेश इति। एतच्च अदो जग्धिर्ल्यप्ति किती त्यत्र ल्यब्ग्रहणेन ज्ञापितं॥ ॥छ्वोः
शूट्॥ ॥यद्यत्र केवलस्य छस्य ग्रहणं स्यात्तदा प्रछेरूपदेशानन्तरं तु कि कृते मक्प्रत्यये परतः च्छकारमात्रस्य शादेशे षत्वे तु कुष्टुत्वे एट् प्रष्टः स्यात्तनिष्टं हृणं स्यात्तनच
निमित्ताभावे नैमित्तिकस्याप्यभाव इति तु को निवृत्तिः नहीदं वचनं नापि न्यायः नहि कृतस्य निवृत्तौ कश्चिन्न्यायः कथं तर्हि ष्यामे स्यत्र सत्त्वे कृते ष्टुत्वस्य निवृत्तिः
नात्र कृतमेव ष्टुत्वं निवर्त्तते किं तर्हि तस्यासिद्धत्वात्पूर्वमेव सत्त्वं तत्र ष्टुत्वस्य प्राप्त्यभावः। नदेवं वितुक्कस्य ग्रहणे दोषं दृष्ट्वा हृ छ इत्येतत्सतुक्कस्येति। कथंपुन

॥क्रमश्च क्त्वि॥ ॥क्रमेरुपधाया विभाषा दीर्घो भवति क्त्वाप्रत्यये झलादौ परतः। क्रान्त्वा। क्रन्त्वा। झलीत्येव। क्रमित्वा। प्रक्रम्य उपक्रम्येति
बहिरंगोपि ल्यवादेशोन्तरंगान पि विधीन्बाधत इति पूर्वमेव दीर्घत्वं न प्रवर्त्तते॥ ॥च्छ्वोः शूडनुनासिके च॥ ॥छ इत्येतस्य सतुक्कस्य स्थाने
वकारस्य च स्थाने यथासंभवं श ऊठ् इत्येतावादेशौ भवतः अनुनासिकादौ प्रत्यये परतः क्वौ झलादौ च क्ङिति। प्रश्नः। विश्नः। अन्तरंगत्
वाच्छे चेति तुकि कृते सतुक्कस्य शादेशः ८ ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥श्री॥ ॥श्री४॥ ॥छ॥ ॥छ॥

द्योपनेसतुक्कस्य ग्रहणमिति। यज्ञयाचेति नङो ङित्करणात्तद्धि विश्न इत्यत्र गुणो माभूदिति सतुक्कस्य शादेशे लघूपधत्वाद्गुणप्रसंगः वितुक्कस्य तु
शादेशे तकार उपधा ने कारः संयोगे गुर्विति गुरुसंज्ञश्च। पृच्छेस्तु ङित्ति संप्रसारणार्थ नङो ङित्त्वं न भवति प्रश्ने चासन्नकाल इति निपातनात्तस्मात्सतुक्क
स्य ग्रहणं। एवं च ह्लत्वा शब्दप्राति व्रदन इति निर्देशोपपत्तिः ननु सतुक्कस्य ग्रहणे प्यलोन्त्यस्येति छमात्रस्य प्रसंगः नह्यनर्थके लोन्त्यविधिरस्ति। अथ सतुक्केन
छेनांगस्य विशेषणान्तदंतस्यांगस्यालोन्त्यस्य प्रसंगः तदापि निर्दिश्यमानस्यादेशा भवन्तीति सह तुका भविष्यति। अन्तरंगत्वादिति। उपदेशानन्तरं प्रसंगाद
न्तरंगत्वं। ल्यप्तु बहिरंगः कथं उत्पन्ने प्रत्यये अंगसंज्ञा अंगस्य च शादेशः न च वार्णादांगं बलीयः भिन्नकालत्वात् ८ ॥ ॥छ॥ ॥छ॥ ॥ राम०
१९०

ओणादिकेनप्रत्ययइति। स्योनाइति। सिवेरविहितोपिबाहुलकान्नप्रत्ययः लघूपधगुणात्पूर्वं मूठ् क्रियतइति। अंतरंगत्वादिति वक्ष्यमाणो हेतुरिहाप्य
पक्रष्टव्यः गुणो हि वक्ष्यमाणो वहिर्भूतप्रत्ययापेक्ष्य ऊठ् तु विपर्ययादंतरंगः तेन स एव पूर्वं क्रियते तत्र कृतेंतरंगत्वाद्यणादेशः इति। अंतर्भूतोऽत्रयेपेक्ष
लाघवेनांतरंगत्वं गुणस्तु पूर्वं वदेव बहिरंगः। नानाश्रयत्वाच्चेति यत्रैकमेव निमित्तं हल्लोपवर्णयोर्युगपत्प्राप्तिः तत्र वाणादेशोऽन्तरंगो बलीयः यथा श्रेयो
जिगीतेः ऊठ् वकारोगोरिति यणो वकाशो दृष्टांत्रेतिचकारेऽपत्र हलश्च इति स्थिते उभयप्रसंगोऽयमपि इह द्विबाधिलांतरंगत्वादयणादेशो वाणा
देशो बलीयइति वृद्धिर्भवति। शठप्राडिति। प्रच्छादिषत्वं जश्त्वचर्त्वे गोविडिति विच्छग तोऽगां विच्छ्यतीति विग्रहत्र्यादाद्वपआई घातुके वें लाघ

वकारस्य ऊठ्। स्योनः। सिवेरौणादिकेनप्रत्यये लघूपधगुणात्पूर्वमूठ् क्रियते। तत्र कृतेंतरंगत्वाद्यणादेशो नानाश्रयत्वाच्च नवाणा
दंतरंगं बलीयो भवति। छ्वोः शूडनुनासिके च। छस्य। शठप्राट्। क्विब्वचीत्यादिना आणादिकः क्विब्दीर्घश्च। गोविट्। वकारस्य। अक्षद्यूः। हिरण्यष्ठ्यूः। असिद्धं ब
हिरंगमंतरंगइतिनाज्ञानंतर्यइत्यनेनप्रतिषिध्यते। झलो क्ङितिलुप्स्य। पृष्टः। पृष्टवान्। पृष्ट्वा। वकारस्य। द्यूतः। द्यूतवान्। द्यूत्वा॥
क्ङितीत्येव। द्युभ्यां द्युभिः। केचित्तु क्ङितीति नानुवर्त्तयंति॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

प्रत्ययाभावपक्षे क्विप्। अक्षद्यूहिरण्यष्ठ्यूरिति दिवि ष्ठिवि भ्यां क्विप्। मुद्धात्तुष्ठिवुद्धष्वकष्मायतीनांप्रतिषेधइतिमत्वाभावः। ननु वांतरंगे यणि बहिरंगस्यो
ठोसिद्धत्वाद्यणादेशोन नात्र भवितम मतआह असिद्धं बहिरंगमंतरंगइतिनाज्ञानंतर्यइत्यस्यामर्थः यत्रांतरंगो बहिरंगो भवाचोरानंतर्यमाश्रीयते तत्र बहि
रंगपरिभाषा न प्रवर्त्ततइति एतच्च षत्वतुकोरसिद्धइत्यत्र ज्ञापितं। द्युभ्यामिति ऊठो वकारश्च घतः घतवानुत्वस्यावकाशः अहर्विमलद्युंद्युभ्यामित्यादा
वुभयप्रसंगे परत्वादूठ् प्रसंगः तस्मात्क्ङितीत्यत्रानुवर्त्यपि तत्रामितिभावः। केचिदित्यादि। तेषां मते हि दिदिवि प्रभृतीनां यज्ञु गंतानां अभिधियोरीङ् भावपक्षे
उठिसतिदेदिवीतिदेद्योतिदे दिद्यीषि देद्योषीति पूर्वं तत्तु पक्षे वलि लोपे देतिदेदेषीति॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ छ॥ ॥

टीका·प०१
१६१

कथंद्युम्णांद्युभिरिति ऊठि कृते तेरिति क्ङिति नीसस्यानुवृत्तत्वात् अत्रापि परत्वाद् उराभावमं ऊठि वह कृते द्युम्यांद्युभिरिति भवितव्यमिति प्रश्नः दिव उदिति तपरकर
णादित्यादि। अत्र हि तपाकरणं नकर्तव्यं। आन्तर्यतो ऽर्द्धमात्राकालस्यकं न नतस्य मात्राकालो ऽदूस्व एव सिद्धः न क्रियते लक्षणान्तरेणापि दीर्घो मा भूदिति तेन तप
रमप्यूठंबाधित्वादिव उदित्यनेन मात्राकालो भविष्यतीत्यर्थः। अथवा ऊठि कृते तरस्य परेणापरिहारग्रंथेन संबंधः तत्रायमर्थः क्रियतां सामान्येन क्ङितिचान्य
त्र चज ऊठ् कृते तु तस्मिन्नेकदेशविकृतस्यानन्यत्वात् स्थेयोऽठः स्थानेन परत्वान्मात्राकालो भविष्यति। तेषामित्यादि क्ङिद्ग्रहणे हि निवृत्ते सति तज्जा दावपिश
स्यानेन विधानाद् दुम्भ्यादिसूत्रे छ्यग्रहणं न कर्त्तव्यं शाकारस्य षत्वविधानेनैव सर्वस्य सिद्धित्वात् ये तु क्ङिद्ग्रहणमनुवर्त्तयन्ति तेषां तज्जादौ शत्वस्याभावाच्छ्येव ष

कथंद्युम्यांद्युभिरिति ऊठि कृते दिव उदिति तपरकरणान्मात्राकालो भविष्यति। तेषां छ्ड्ःवइत्यत्र छ्य्रग्र
हणं न कर्त्तव्यं। अनेनैव हि सर्वत्र शाकारो विधीयते। ऊठ् इत्करणमित्येध त्यद्दस्वितिविशेषणार्था वा
ह ऊड् इत्ययमपि दिव ९ ॥श्री॥ ॥श्री॥ ॥श्रीकृष्णायानमः॥ ॥श्रीरामनामः॥

त्वविधानत्वं तत्रापि सतुक्कस्यग्रहणं ऊठ्यं यदि दित्स्यादार्घं नौ ठकितावित्यादिः प्रसज्येत अस्तु वकारस्यवालि लोपे सति अक्षद्यूरित्यादि सिद्धं नचवना
मास्येवलि लोप आरभ्यमाण ऊठ् लोपस्य बाधकः स्यादिति शंकनीयं भिन्नजातीयत्वात् ऊठागमः लोप आदेशः न च भिन्नजातीयं बाधकं भवति। नहि
दधिब्राह्मणेभ्यो दीयतां कंबलः कौण्डिन्यायेति दधः कंबलो बाधको भवति। सत्यं। उत्तरसूत्रे त्वागमिभेदाद् वृद्धौ सत्यां एकोवकारस्यैव परउपधायाः
तस्मादूठ् ऋष्टित्वमवयवांगीकर्त्तव्यमिति समसमानस्तदंगीकारणे प्रयोजनमाह ऊठ् ऋष्टित्करणमिति एवं ब्रुवता एत्येधत्यूठ्सिति ठकारस्य वर्णेन निर्देशउ
युक्तं भवति यद्यत्र ठकारेण क्रियते ततो वृद्धिविधावपि नोपादीयेत ततश्च प्रत्रहते प्रोह तरस्यत्रापि स्याद् वाह ऊड् इत्ययमपि ठिदेवेति। अन्यथा तस्य हृद्धि

राम४
१६१

॥ज्वरत्वर॥ ॥ज्वर रोगे। ञित्वरा संभ्रमे। स्रिवु गतिशोषणयोः। अव रक्षणे। मव बंधने। ज्वरत्वरेत्यादिवस्तुकथनं॥ ॥राल्लोपः॥ ॥मुर्छेति मूर्छा मोहसमु
च्छ्राययोः। कुर्छेति कुर्छा कौटिल्ये। ननु च पूर्वत्र सतुक्कस्य छकारस्य ग्रहणं चेत्तुक्कः श्राप्तं तत् कथमत्र लोपः स्यात् राल्लोपः स्यादिति ननु यदि नाम रेफात्परः सतु
क्कश्छकारो न संभवति किमेतावता। प्रकृतस्वाभाविकस्य केवलस्य ग्रहणं भवति तस्मादेवं व्याख्येयं। पूर्वत्र द्विछकारो निर्दिष्टः तत्रैकः सतुक्कोपरस्तु के
वलो गृहीतस्तत्र च राल्लोपे सतुक्कस्य छस्यासंभवात्केवलो गृह्यत इति। यदि द्विछकारेकः पूर्वत्र निर्दिष्टः छ्वोरिति निर्देशो नोपपद्यते कथं समाहारद्वंद्वे

ज्वरत्वरस्रिव्यविमवामुपधायाश्च॥ ॥ज्वर त्वर स्रिवि अव मव इत्येतेषामंगानां वकारस्य उपधायाश्च स्थाने ऊडित्यय
मादेशो भवति क्वौ परतो झलादौ च क्ङिति। जूः। जुरौ। जुरः। जूर्णः। जूर्णवान्। जूर्तिः। त्वर। तूः। तुरौ। तुरः। तूर्णः। तूर्ण
वान्। तूर्तिः। स्रिव। स्रूः। स्रुवौ। स्रुवः। स्रूतः। स्रूतवान्। स्रूतिः। अव। ऊः। उवौ। उवः। ऊतवान्। ऊतिः। मव। मूः। मुवौ। मुवः।
मूतः। मूतवान्। मूतिः। ज्वरत्वरोरुपधाया वकारात् स्रिवमवयोः पूर्वा॥ ॥राल्लोपः॥ ॥रेफादुत्तरयोश्छ्वोर्लोपो भव
ति क्वौ परतो झलादौ च क्ङिति। मुर्छा। मूः। मुरौ। मुरः। मूर्तः। मूर्तः। मूर्तवान्। मूर्तिः। नध्याख्यापृमुर्छिमदामिति निष्ठान
त्वाभावः। कुर्छा। कूः। कुरौ। कुरः। कूर्णः। कूर्णवान्। कूर्तिः। राल्लोपे सतुक्कस्य छकारस्याभावात्केवलो गृह्यते। वकारस्य तुर्वी। तूः।
तुरौ। तुरः। तूर्णः। तूर्णवान्। तूर्तिः। धुर्वी। धूः। धुरौ। धुरः। धूर्णः। धूर्णवान्। धूर्तिः १०

एकवचनप्रसंगः इतरेतरत्र बहुवचनप्रसंगः। नैष दोषः। पूर्वं द्वयोश्छकारयोः समाहारद्वंद्वं कृत्वा पश्चाद्वकारेणेतरेतरयोगे द्वंद्वः करिष्यते। एवमपि द्वंद्वा
त्चुदषहान्तात्समाहारे इति समासान्तः प्राप्नोति। यदि छकारवकारयोः समाहारद्वंद्वं कृत्वा तेन सह सतुक्कस्य छस्येतरेतरयोगे द्वंद्वो भविष्यति यदि पूर्व
त्र विसतुक्को गृह्यते वा छ्वोरिति शत्वं प्राप्नोति इष्टमेवैतत्संगृहीतं वा नूवां शोवांश इत्येव भवितव्यं॥ १० ॥ ॥६ ४॥ ॥४॥

असिद्धवत्॥ ॥आभाद्वारिति निर्देशआकडारादित्सनेनआत्मातः। सिद्धशब्दो निष्पन्नवचनः नसिद्धोऽसिद्धोयः पुनः सिद्धोपिसिद्धकार्यंनकरोतिसतेन
तुल्यंवर्त्तत इति असिद्धवत् किंपुनस्तत्प्राधान्यात्कार्यमितिप्राप्तं शास्त्रंहिकार्यार्थत्वादप्रकृधानं ।कार्यस्यचासिद्धत्वेआदेशलक्षणप्रतिषेधएव
सिध्येत् आगहिजहीतिनत् त्सर्गलक्षणाप्रभावः एधिशाधीति। कार्यस्यासिद्धत्वेसयमर्थः आभाच्छास्त्रीयंकार्यंप्रवृत्तमपिप्रवृत्तकार्यंनक
रोतीति अतः प्रवृत्तकार्यनिबंधनस्येव कार्यस्यप्रतिषेधास्यान्नत्वएधिशाधीत्यत्रएत्वशाभावनिबंधनं किंचित्कार्यंप्राप्नेयस्यप्रतिषेधोविज्ञाये
त आभीयंतुशास्त्रंस्वकार्यंकुर्यादेवअत एत्वशाभावशास्त्राभ्यांस्वकार्ययोरेत्वशाभावयोः प्रवर्तितयोःस्यानिनोरगागमन्निबंधनंधित्वंन
स्यादेव।शास्त्रासिद्धत्वेत्वयमर्थः आभीयंशास्त्रंनिष्पन्नमपिस्वकार्यंनकरोतीति अत एत्वशाभावाशास्त्राभ्यांस्वकार्ययोरेत्वशाभवयोरप्रवृत्त

॥ ॥असिद्धवदत्राभात्॥ ॥असिद्धवदित्ययमधिकारः।यदितऊर्ध्वमनुक्रमिष्यामः
आअध्यायपरिसमाप्तेः तदसिद्धवद्वेदितव्यं ११ ॥ ॥श्री॥ ॥ॐ॥ ॥

त्वादेत्वशाभावयोस्तदसिद्धवत्त्वशास्त्रस्यानिवृत्तिरेववर्त्तत इति तन्निबंधनंकार्यंसिध्यति अतोव्यापकत्वाच्छास्त्रस्येवासिद्धत्वं आभादितिशास्त्रस्येवविषयत्वेन
निर्देशान्नाधयस्यतंत्रोविधिः स्यान्नदाभाद्ग्रहणं विषयनिर्देशार्थंवास्यात् आभाच्छास्त्रेत्रकर्त्तव्येऽसिद्धवदिति। असिद्धवद्भवतोवानिर्देशार्थं अत्रग्रहणंतु
विषयार्थं आभाच्छास्त्रेतदसिद्धवद्भवति अत्रेवाभीयेशास्त्रेकर्त्तव्ये इति तत्राधेयत्वे असिद्धवद्भवतोनिर्देशाभावाधत्किंचनाशाधाधाकार्यंतत्सर्वमाभीये
कर्त्तव्ये असिद्धवत्स्यात् ततश्च धिन्विकृण्व्योरचेत्यस्यासिद्धत्वाद्धिनुतः कृणुतइत्यतोलोपोनस्यात् अत्रग्रहणेवानर्थकं स्यात् अपरिपूर्णत्वादध्याहारेणोवाभा
धतत्रकर्त्तव्ये इत्यर्थलाभात द्वितीयेतुपक्षेसमानाश्रयत्वंविशेषोनलभ्येत श्रूप्रशमय्येतिमितांह्रस्वस्यासिद्धत्वाल्लघुपूर्वोमकारोनभवतीतिल्यपिलघुपूर्वा
दित्ययादेशोनस्यात्। प्रबेभिदय्येतिभिदेर्यङ्ंतात्णिचियस्यहलइतियलोपस्यासिद्धत्वाल्लघुपूर्वोदुत्तरोणिज्भवतियकारेणअवधानादित्ययादेशोनस्या
त्प्रस्तनय्येतिअदंतात्तनशब्दात् इत्यस्मात्णिच्अल्लोपस्यासिद्धत्वाल्लघोरेवपरोणिच नतुलघुपूर्वादित्ययादेशप्राप्तिः पशुंमनोतीतिजनसनखनेतिविड्वि

ततः शासियमुषोनवाजानि स्याशाल्यस्याशानो धातोरिसास्लोपो न स्यात् चाखायितेतिवनेर्यङि द्विर्वचनात्सरूलोपे विभाषे स्यात्वेद्विर्वचने स्व चिन्त्रात्वस्यासि
द्धत्वाघस्महल इति यलोपः स्यात् यपुष इत्यासैच दोषोव स्यते अधिकारे आ भाद्ग्रहणं चानर्थकं स्यात् अधिकारादेव तदर्थलाभात् तथा हि आन्नलोप इत्यत्रासि
नुपास्थिते घ्नति आदुन्नरस्यनकारस्य लोप भवति तस्यासिद्धवद्भावस्य समर्थो भवति एवमनुदात्तोपदेशेस्यासायितन्निकम्यसिद्धवद्भवतीति निर्देशार्थेना भाद्ग्रहणेनन वा
सिद्धवद्भवत इत्यत्रावधारणार्थमाभाद्ग्रहणं अधिकारे ह्यस्मिन्नवस्थानिर्देशाद्घुवोरनाकाविसादीनामपि असिद्धत्वं स्यादिति वाच्यं अप्राप्तिपरिज्ञाप्तिविकल्प
रेणाप्यवधिनिर्देशामधिकारायेरिमारणाद्यगतेः। ननु मत्सा भाद्ग्रहणे अधिकारेऽस्मिन्नसनियत्वेतदधिकारान्तर्गतदेवस्वत्वं तद्धि हितं वा कार्यमत्र ग्रहणेन परामृश्यत असमस
संनिहितस्याभावात् तत्र अन्नलोपादसस्यापमर्थः स्यात् आदुन्नस्यनकारस्य लोपो भवति स चासिद्धवद्भवत्यत्रैव अन्नलोपेकर्तव्य इति एवं सर्वत्र ततश्चविशेषा
गोल्वत्रैवेहृतिसिच्छेदकारितरामितिगतः गत्वानिसादावन्यस्मिन्नाभीयेमस्याभीयस्यासिद्धत्वानायातनाह्नोलोपादिस्यादेवाभाद्ग्रहणेनुक्त्वाविधावाभ्रीयमाणो
नत्वेवसंनिहितस्यात्रग्रहणेनपरामर्शादाभीयमाभीये सिद्धवत्वस्मिन्नस्मिन्वेसमर्थो लभ्यते। उच्यते। अधिकारेऽस्मिन्नसतिअनुदात्तोपदेशेस्यादेतत्रैवक
र्त्तमेतस्येवासिद्धवचनेन किं चित्प्रयोजनमस्तीतितत्कार्यविशेषरूपपरिज्ञानेन इत्यसिद्धवत्त्वमिति अत्र कर्त्तव्ये तेच स्यामान्यरूपेण परामर्शादन्यस्मिन्नन्यस्यासि
द्धत्वे भविष्यतीति द्वेवमाभाद्ग्रहणमतिरिच्यमानं विषयार्थी विज्ञायते अधिकाराच्चासिद्धवद्भवतो व्याप्तिः अत्र ग्रहणं तु समानाश्रयत्वप्रतिपत्त्यर्थं पाघुभे अभ्याभीये
एकमेव निमित्तमाश्रित्य प्राप्नुतः एवमन्योन्यस्मिन्न सिद्धवद्भवति। किमत्रग्रहणमतिरिच्यतइत्यतः समानाश्रयत्वप्रतिपत्तिः नेत्यादि अग्रहणार्थ एवापंनयाहि अनुदात्तो
पदेशेस्यत्रास्मिन्नुपस्थितेसमस्य यसमर्थो भवति अनुदात्तोपदेशानां लोपो भवति झलादौ क्ङितिपरतः स चासिद्धवद्भवति कुत्र कर्त्तव्ये अत्रैव यदाभात्रेति। कोर्थः क्ङित्यनुना
सिकलोपो भवति स्युक्तं अत्रैवच क्ङितिनिमित्ते सतियदाभीयं प्राप्नोतीति तत्र कर्त्तव्ये इति एवं सर्वत्र। एवं च वृत्त्यक्षमत्वेरेव समानाश्रयत्वं प्रतिपादितं भवति। पूर्वपक्षमधि
कारः ततोपन्न्यासोपस्थानं ततएवारभ्य यदाभात्रैव तस्यासिद्धत्वं स्यात्त तु स्यामान्यविधितरेषुपदेशस्यनहिवकाश्यादु चार्थतेन तएवारभ्यमर्यादाभिविधिप्रतिप
त्तिः यथा आपाटलिपुत्राद्वृष्टो देव इति। एवं च घसोरेह्वाविव्याप्यसमर्थो भवति असेर्हिएत्वं सचेत आरभ्य यदाभान्तत्र सिद्धवदितिनित तत्र पूर्वत्रैधित्वे नासिद्धव
त्स्यात् एतं त्रेतुविधौ अत्रैव प्रदेशे आङ् र्थप्रतिपादयन् अतएवारभ्य यदाभात्तदसिद्धवत्त्वत्रैव कर्त्तव्य इति आन्नलोपस्यारभ्य अन्यत्रास्त्वेतेव मंतानां सर्वेषा
मेवान्योन्यस्मिन्नसिद्धत्वमापादयति। उच्यते। द्वौ यशोदाह्याधिकारश्चार्थाधिकारश्च ततश्च शाह्याधिकारेस्यादेषदोषः अर्थाधिकारेत्वस्मिन्नेव प्रदेशे आङ् र्थप्रति
पादयन् पूर्ववत्प्रतिपादयति सत्य प्रतिपादितार्थोन्तरे त्रयतिष्टनेउपस्थितश्चतत्र तत्रोपस्थितेनात्रग्रहणेन विशेष्यतइति सर्वमिष्टं सिद्धं। तदनेनसूत्रेणाघम
र्थः संपादितः आन्नलोपद्स्यारभ्या याद्यरिसमामेयतिसूत्रारीणां स्वमोन्यस्मिन्नसिद्धवद्भवतिनानिचनुल्यनिमित्तानीतितदेतत्सर्वं दर्शितोपव्याख्यानं योऽसं ११

तदाश्रयमेवम्भवतीत्यत्रासिद्धवदितिवदस्माणामयकृष्टम्। विभिन्नाश्रयं चाश्रयं विभिन्ननिमित्तमित्यर्थः। असिद्धवचनमित्यादि। उत्स्य अते आदेशो न निवर्तितद
युत्सर्गः स्थानीमलक्षणं निमित्तं यस्य तदुत्सर्गलक्षणं तस्य भावः प्रवृत्तिर्यथा स्यात्। एतच्च शास्त्रासिद्धत्वाश्रयणात्सम्पतरस्युक्तं। आगहीतिबहुलं छंदसी
ति शपो लुक् अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः जहीनि। हंतेर्जः। अभाजि। तिभंजेश्चिणि अनुनासिकलोपः। रागः रंजेर्घञि भावकरणयोरि
ति अनुनासिकलोपः। अत्रग्रहणं किमिति। यद्यपि समानाश्रयत्वप्रतिपत्त्यर्थमिति पूर्वमेवाचय्याहृणप्रयोजनमुक्तं तथापि समानाश्रयत्वप्रतिपत्तेः किं फलमि
ति प्रश्नावसरोऽस्त्येव। पपुषइत्यादौ अनेआतो लोप इति च। चिच्युषइतिचिनत्वयनेरनेकाचइतियणादेशः। ललुवुषइतिलजृछेदने। कथं पुनरत्र समाश्रयत्वमिसा

आर्धादित्यिविषयनिर्देशः। आभसंशाहृनाघदुच्यतेतत्रकर्तव्ये। अत्रेनिसमानाश्रयत्वप्रतिपत्त्यर्थं तिद्वेदत्रयत्रतदाभात्तशास्त्रीयंविधीयते
तदाश्रयमेवभवति। व्याश्रयंतुनासिद्धवद्भवतीत्यर्थः। असिद्धवचनमुत्सर्गलक्षणभावार्थमादेशलक्षणप्रतिषेधार्थं च पृथि गृह धीत्यत्र ए
त्वप्रतिपत्त्यर्थं। तद्वेदत्रयत्राभावयो। कृतयोर्ल्लक्षणंधित्वं न प्राप्नोति। असिद्धत्वाद्भवति। आगहि जहीत्यत्रानुनासिकलोपे जभावे च कृते
तोहेरिति लुक् प्राप्नोति असिद्धत्वान्न भवति। अभाजीति किं। अभाजि। रागः। अनतउपधाया इति वृद्धौ कर्तव्यायां नलोपो नासिद्धो भवति। अ
त्रग्रहणं किं। पपुषः पश्य। चिच्युषः। लुलुवुषः पश्य। वसुसंप्रसारणमालोपे यणादेशे उवङादेशे च कर्तव्ये नासिद्धं भवति। आलोपादी
निवसौ वसुंतस्य विभक्तौ संप्रसारणमिति समानाश्रयत्वं नास्ति। असिद्धं बहिरंगमंतरंग इति एतदप्यत्र न भवति। किं कारणं एषा परिभाषा
आभाच्छास्त्रीयात स्थाप्रवर्तमानाद्वसुसंप्रसारणादीनामाभाच्छास्त्रीयाणामेवासिद्धत्वादंतरंगबहिरंगयोर्युगपत्समुपस्थानं ना
स्तीतिपरिभाषा न प्रवर्तते १२ ॥श्रीः॥ ॥

थलि च सेटि॥ ॥थलि च सेटि परतो नादेशादेरङ्गस्य एकहल्मध्यगतस्यातः स्थाने एकारः आदेशो भवति अभ्यासलोपश्च। पेचिथ। शेकिथ। नेमिथ। सेटीति किं। पपक्थ। थलग्रहणं विस्पष्टार्थं अकिदर्थमेतद्वचनमिति स्पष्टे टो सम्भवात्। अत इत्येव। दिदिवय। एकहल्मध्यगत इत्येव। ततक्षिथ। ररक्षिथ। अनादेशादेरित्येव। चकणिथ। बभणिथ॥ ॥तॄफलभजत्रपश्च॥ ॥तॄ फल भज त्रप इत्येतेषामङ्गानामत एकारादेशो भवति अभ्यासलोपश्च लिटि किति परतः थलि च सेटि। तेरतुः तेरुः। तेरिथ। फेलतुः। फेलुः। फेलिथ। भेजतुः भेजुः। भेजिथ। त्रेपे त्रेपाते त्रेपिरे। तरतेर्गुणार्थं वचनं। फलिभजोरादेशार्थं। त्रपेरनेकहल्मध्यार्थं श्रन्थेश्चेति वक्तव्यं। श्रेथतुः श्रेथुः। श्रेथिथ॥ ॥राधो हिंसायां॥ ॥राधो हिंसायामर्थे अवर्णस्य एकारादेशो भवति अभ्यासलोपश्च लिटि किति परतः थलि च सेटि। अपरेधतुः। अपरेधुः। अपरेधिथ। हिंसायामिति किं। रराधतुः। रराधुः। रराधिथ। अत इत्येतद्दिहोपस्थितं तत्परत्वकृतमयास्य कालविशेषमसम्भवाद्वर्णमात्रं प्रतिपादयति।

ते किती त्येतदनुनिवर्त्तत इति व्याख्यानमन्तरेणादुर्ज्ञानं तस्माद्विस्पष्टार्थं थलग्रहणं कृतं॥ ॥तॄफल॥ ॥फलनिष्पत्तौ ञिफला विशरणे द्वयोरपि ग्रहणं गुणा
र्थमिति। न शसददवादिगुणानामिति प्रतिषेधं बाधितुमित्यर्थः। श्रेथतुरिति पूर्वविकित्वेन नलोपो॥ ॥राधो॥ ॥अनेकार्थत्वाद्धातूनां राधो हिंसार्थं वृत्तिः ननु वचना
त्रा एवमवर्णग्रहणमस्ति प्रकृतस्य मात्रिकस्य परकरणान्न तत्र यथम वर्णस्यानएत्वं भवति सुक्ष्मत आह॥ ॥छ छ॥ ॥छ॥ ॥छ॥ ॥

अतइत्येत दिति अत इति तावत्खरितत्वाद्धपतिष्ठते तत्रपरत्वकृतस्यकालविशेषस्य मात्रात्मकस्यासंभवात्तमपास्याकार्यमात्रं प्रतिपादयति। अथवेतिपूर्वत्रित्वत
इतिविरोध्युपादानादात इत्यस्यानभिसंबंधः एकहल्मध्येवेति अत आत इति च द्वयमपिमात्रत्वतत एकहल्मध्य इत्यनुवर्तेर्यतश्चद्वाधिकाहारेणास्यालभ्य

अत इत्येत दिहैवायास्थितंतत परत्वकृतस्यास्य कालविशेषस्यासंभवात्स्वर्णमात्रं प्रतिपादयति। अथवा आसन्नयोरातइत्यनुवर्तत इति
वाक्षेपं। एकहल्मध्येगाधः स्थानीभविष्यति॥ ॥वान्त्रश्रमुत्रसां॥ ॥त्रसश्रमुत्रसइत्येतेषामंगानामातः स्थानेवाएकारादेशोभ
वति अभ्यासलोपश्च लिटि क्ङिति परतस्थालिचसेटि। जेरतुः। जेरुः। जेरिथ जिजरतुः। जजरुः। जजरिथ। श्रेमतुः श्रेमुः श्रेमिथ। ब
भ्रमतुः बभ्रमुः। बभ्रमिथ। त्रेसतुः। त्रेसुः। त्रेसिथ। तत्रसतुः। तत्रसुः। तत्रसिथ॥ ॥फणांचसप्तानां॥ ॥फणादीनांचसप्तानांधातू
नामवर्णस्यस्थाने वा एकारादेशोभवति अभ्यासलोपश्च लिटि क्ङितिपरतः थलिचसेटि। फेणतुः। फेणुः फेणिथ। पफणतुः। पफणुः
।पफणिथ। रेजतुः रेजिथ। रराजतुः। रराजुः। रराजिथ। भ्रेजे। भ्रेजाते। भ्रेजिरे। बभ्राजे। बभ्राजाते। बभ्राजिरे। भ्रेशे। भ्रेशाते। भ्रेशिरे।
बभ्राशे बभ्राशाते। बभ्राशिरे। भ्लेशे। भ्लेशाते। बभ्लाशिरे। भ्लेशे। भ्लेशाते। भ्लेशिरे। बभ्लाशे। बभ्लाशाते। बभ्लाशिरे। स्येमतुः। स्येमुः। स्ये
मिथ। सस्यमतुः। सस्यमुः। सस्यमिथ। स्वेनतुः। स्वेनुः। स्वेनिथ। सस्वनतुः। सस्वनुः। सस्वनिथ। सप्तानामिति किं। दध्वनतुः। दध्वनुः। दध्वनि
थ॥ ॥३८॥ ॥श्रीः॥ ॥७॥ ॥

तइत्यर्थः॥ ॥फणांच॥ ॥बहुवचननिर्देशाद्दाघर्थोगम्यतइत्याह फणादीनामिति फणतोराजभ्राजद्भासौ भ्रास्टु भ्राशृ भ्लाशृदीप्तौ स्यमुस्वन
ध्वनशब्दे अत्र सर्वजफणादयः सप्त अत्र राजप्रभृतीनामप्येत्वमवर्णस्य भवति उक्तोत्रस्यापि योगाधोहिंसामित्यत्र ३८ ॥ ॥७॥ ॥७॥ ॥

द्का०प०१ नशम॥ ॥अत्र वस्तुतो योगुणसंज्ञको कारस्तत्रैव परिप्रतिषेधयोरेकविषयत्वादिकल्पः स्यात ततश्चवाञ्छ भमुत्र स्यामितियद्वाग्रहणंतदेवादितःपाठं स्यात तस्मा गुण
१९१ ग्रहणेन तच्छद्व दूषितस्य तद्भावितस्य ग्रहणमित्याह गुण इत्येवमभिनिर्वृत्तस्य चेति तत्सम्बंधीयो कारस्तस्यार्थः। संबंधित्वं मपि तस्य तत्स्थानिकत्वा त्तस्य च यत्स्था
नेप्रथायोगं वेदितव्यं। शशास तुरिति शासु हिंसायां दृ दृ दाने अनुदात्ते ता दुवम उद्गिरणे। विशशारतुरिति श्रृ हिंसायां ऋच्छत्यृता मिति गुणः। यदुक्तं गुण इत्ये
वमभिनिर्वृत्तस्येति नदृ दाहरणे दर्शयति गुण शब्दाभिनिर्वृत्तस्येति उरण्रपर इत्यत्र अपि हितु प्रसंगे रपरत्वादि तिवचनाद् गुणो भवन्नेव रेफशिरस्को भिनिर्वर्त्तते इ

नशासदद्वादिगुणानां॥ ॥शासदद इत्येतयोर्वकारादीनां च धातूनां गुण इत्येवमभिनिर्वृत्तस्य च यो कारस्तस्य स्थाने एकारादेशो न भवति
अभ्यासलोपश्च। विशशासतुः। विशशासुः। विशशासिथ। ददृदे। ददृदाते। ददृदिरे। वादीनां। ववमतुः। ववमुः। ववमिथ। गुणस्य। विशश
रतुः। विशशरुः। विशशरिथ। लुलविथ। पपविथ। गुणशब्दाभिनिर्वृत्तस्य रशब्दस्य ओकारस्यावयवस्याकारस्य ग्रहणे त्वं प्रतिषिध्यते॥ ॥अर्व
णस्त्रसावनञः॥ ॥अर्वन्नित्येतस्यांगस्य तृ इत्ययमादेशो भवति सुश्चेत्ततः परो न भवति स च नञ उत्तरो न भवति। अर्वंतौ। अर्वंतः।
अर्वंतं। अर्वंतौ। अर्वतः। अर्वता। अर्वद्भ्यां। अर्वद्भिः। अर्वति। आर्वतं। असाविति किं। अर्वा। अनञ इति किं। अनर्वाणौ। अनर्वाणः।
अनर्वाणं वृषभं मंद्रजिह्वं॥ ॥श्रीकृष्णायानमः॥ ॥

वमभिनिर्वृत्तस्यारशब्दस्यावयवो कारः लुलविथेत्यत्र तु अभिनिर्वृत्तस्यो कारस्य स्थाने वादेशस्तस्यावयवो कारः। कश्चित्प्रत्येते गुणशब्देनात्र शासादीनां ग्रहण
सामर्थ्याल्लिङ्भावितन्तद्ग्रहणमित्यकारमात्रस्य हि ग्रहणे शासिददधोर्वकारादीनां च ग्रहणमनर्थकं स्यादिति किल तस्यार्थः॥ ॥अर्वणः॥ ॥अकार उगित्का ए म०
र्यार्थः तेन सर्वनामस्थाने नुम भवति। स च नञ उत्तरो न भवतीति वेदितव्यनुषंगः। अर्वतीति उगित्वान्ङीप्। आर्वतमिति तद्धिते पि भवति अ १९१
साविति प्रसज्य प्रतिषेधो न पर्युदासस्तेन नञिव युक्तन्यायाभावाद्भिन्नकेरेव ग्रहणं न भवति तथा च सुश्चेत्परो न भवतीति। प्रथमैकवचनस्य वात्र ग्रहणं
न समम मीव द्वुवषन स्यमारमानात्॥ ॥छ॥ ॥

॥मघवा॥ ॥मघवेति षष्ठ्यर्थे प्रथमा। मघोनः तिश्वयुवमघोनामिति निर्देशात् सम्प्रसारणं प्रवर्तिमान्गुणाः। ननु च मघमस्यास्तीति मघवान् मघमिति धननाम छन्दसि
वनिपोवन्त्मान्वावितिवनिपः सम्प्रसारणोऽन्यते पूर्वस्य मर्त्तापांचस्येति लोपप्रसंगः। व्याश्रयत्वान्सिद्धत्वमपि नाशंकनीयं कृषितं सम्प्रसारणं सम्प्रसारणपस्येति
लोपः एवं तर्हि मदेवे दम्मुतन्त्रं नविध्यनितथा चेत्तस्य भाषायां प्रयोगउपपद्यते। यथा तु भाष्यं तथा न केवलमस्येव अर्वाणोपि भाषायामसाधुः प्रयोगः।
आहहि अर्वणस्त्रसावनञ इति छन्दोदंसं हि तत्। मतुवन्तो विधानात् छन्दस्युभयदर्शनात्। अधात्वोर्वन्निपि गुणो चक्रते अर्वन्निति ह्वतस्मादि विम
तुपि अर्वता वित्यादि सिद्धं भवति वनिप्यन्नर्वाणावित्यादि मघशब्दादपि प्रत्ययद्वयेपि सिद्धं भवति नार्थः सूत्रद्वयेन सर्वथः। मघोनइत्यादौ तु पस्येति लोपाभाव

मघवाबहुलं॥ ॥मघवान्नित्येतस्यांगस्य बहुलं तृ इत्ययमादेशो भवति। मघवान्। मघवन्तौ। मघवन्तः। मघवन्तं। मघवन्तौ। मघवतः। म
घवता। मघवद्भ्यां। मघवद्भिः। मघवती। माघवतं। न च भवति मघवा। मघवानौ। मघवानः। मघवानं। मघवानौ। मघोनः। मघोना। मघवभ्यां। म
घवभिः मघोनी। माघवनं॥ ॥भस्य॥ ॥भस्येत्ययमधिकार आध्यायपरिसमाप्तेः। यदित ऊर्ध्वमनुक्रमिष्यामो भस्येत्येवं तद्वेदितव्यं। व
क्ष्यति पादः पत्। द्विपदः। पश्यद्द्विपदा कृतं। भस्येति किं। द्विपाद्भ्यां द्विपादः॥ ॥पादः पत्॥ ॥पादिति पादशब्दो लुप्ताकारो गृह्यते त
स्मिन् पादः पत्। द्विपदः। पश्यद्द्विपदा कृतं तस्य भसंज्ञस्य सपरिमपमी देशो भवति सन्निदिश्यमानस्यादेशा भवन्तीति पान्तशब्दस्यैव भवति तत्तर्दं तस्य सर्वस्य। द्विपदः पश्य द्विप
दे। द्विपदे। द्विपदिकां ददाति। वैयाघ्रपद्यः ३९ ॥
प्रत्ययं दत्त्वा देवान्मानवनमिति अन्यितिप्रकृतिभावः॥ ॥पादः पत्॥ ॥पादिति पादशब्दो लुप्ताकारो गृह्यते तत्र तिपादयतेः क्विवन्तस्यापत्रयहणमिति
येन विधिस्तदन्तस्येत्यत्र भाष्यकारेणोक्तं तस्मात् पिशब्दाध्याहारेण यथाग्रंथो योज्यः लुप्ताकारः पादशब्दो पिगृह्यते पादयतिः। क्विवन्तोपि अंगाधिका
रेतस्य च तदुत्तरपदस्य चेति वचनात्तदन्तस्यांगस्येत्यत्रापि तस्यांगस्येति द्रष्टव्यं तदन्तेन तु च क्रममस्ति। तितस्येव प्राधान्येनोपमासः। तदर्शयति सचे
ति। यद्यपि याच्छब्देनतदन्तः समुदायः प्रत्याप्यते तथापि विशेषणत्वेन योनिर्दिश्यते तत्रापि यतः षष्ठी श्रूयते तस्यैवादेशः न प्रतीयमानस्य समुदाय
स्येत्यर्थः। द्विपद इति। द्वौ पादावस्येति बहुव्रीहिः संख्यासुपूर्वस्येत्यन्तलोपः। द्विपदिकामिति पादशतस्य संख्यादेरिति वुन्लोपश्च। माघ्रपाच्छब्दो ग

टिका· ५०१
॥वसोः॥ ॥पेचुषः इति पचेः क्वसुः एत्वाभ्यासलोपौ कथं पुनरत्र नुमधकस्यकसोर्ग्रहणमित्याह वसुग्रहणमिति। एतच्च शत्रादेशस्य वसोः हकारानुबंधकस्याल्ल
१९२ भ्यते तस्य ह्येतदेव प्रयोजनं इह माभूत् ग्रहणं पश्यामिति अगित्कार्यस्य यानिबद्धावेनैव सिद्धत्वात्॥ ॥वाहः॥ ॥वाह इति वहे र्ण्विप्रत्ययांतस्य ग्रहणं णिवश्च
सोपपदाद्विहित इति सामर्थ्योत् तदंतविधिरित्याह ऊठ्सेवं मतस्येति। संप्रसारणं भवतीति संप्रसारणग्रहणानुवृत्तिं दर्शयति तेन वकारस्य स्थाने भवति अ

वसोः संप्रसारणं॥ ॥वस्वंतस्य भस्य संप्रसारणं भवति विदुषः पश्य विदुषा विदुषे पेचुषः पश्य पेचुषा पेचुषे पपुषः पश्य आ
तोलोपे कृते मेव मुसंप्रसारणस्य माश्रयत्वात् सिद्धत्वेन भवति वसुसंप्रसारणे क्वसोरपि ग्रहणमिष्यते॥ ॥वाह ऊठ्॥ ॥वाह
इत्येवमंतस्य भस्य ऊठ् इत्येतत् संप्रसारणं भवति· प्रष्ठौहः प्रष्ठौहा प्रष्ठौहे दित्यौहः दित्यौहा दित्यौहे एत्येधत्यूठ्सु इति वृद्धिः अथ किम
र्थम् ऊठ् क्रियते न संप्रसारणमेव लभ्यतेगुणे च वृद्धिरेवेति वृद्धौ सत्यां सिद्धं रूपं भवति प्रष्ठौह इति अनकारांते चोपपदे वहे र्ण्विर्न दृश्यते·
ज्ञापकार्थमेतत् ज्ञापयति भवति एषा परिभाषा असिद्धं बहिरंगमंतरंगे इति तस्याहि सत्यां बहिरंगस्य संप्रसारणस्यासिद्धत्वादंतरं
गो गुणो न स्यात्· ॥ ॥छ॥ ॥
र्यांतस्य स्यात् उदाहरणेषु छंदसि सहः वहश्चेति ण्विः अर्थे स्यादिवाह इत्येतावता प्रकृतं संप्रसारणमेव विधेयमिति प्रश्नः कारूपसिद्धिरित्याह संप्रसारणे
कृते नरति गुणे च कृते इत्यनुषंगः ण्विप्रत्ययमपेक्ष्य प्रत्ययलक्षणेन गुणः नन्वेवं शालान्वह तीत्यादावनकारांत उपपदे शाल्वह इति नसिध्यति तत्राह अ
न कारांते वे ति चकारांतकारांत उपसर्गे पीति द्रष्टव्यमनेन प्रोह इत्यादावेति· पररूपप्रसंग इति न चोदनीयं। ज्ञापनार्थमिति। कथमेतज्ज्ञापकमित्याह तस्यां रा·म·
हि सत्यामिति बहिरंगस्य बहिरंगत्वं बहिर्भूतान्नादिप्रत्ययापेक्षत्वात् अंतर्भूतण्यपेक्षत्वाद्गुणोंतरंगः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ १९२

॥म्घयुवा॥ ॥शौवमिति नस्तद्धित इति टिलोपः। यौवनमिति यूनो भाव इति हायनान्तयुवादिभ्योऽण्। अन्निति प्रकृतिभावः। यद्वा श्वन्नास्यमाघवनः आतिप
दिकग्रहणे लिंगविशिष्टस्यापि ग्रहणाद्युवतिशब्दस्यापि संप्रसारणप्रसंगस्तथा मघवतः इत्यादौ मघवा बहुलमिति त्रादेशे कृते एकदेशविकृतस्यानन्यत्वा
त्प्रसंगः इत्याह श्वादीनामित्यादि कथमेतल्लभ्यत इत्याह एतदर्थमिति। अन इत्युभयोः शेष इति न त्वनंतरस्यैव योगविभागसामर्थ्यात्। न चैवमपि मघव

श्वयुवमघोनामतद्धिते॥ ॥श्वन् युवन् मघवन् इत्येतेषामंगानामतद्धिते प्रत्यये परतः संप्रसारणं भवति। शुनः शुना शुने यू
नः यूना यूने मघोनः मघोना मघोने। अतद्धित इति किं शौवं मांसं यौवनं वर्त्तते माघवनः स्थालीपाकः। शुनो विकारे प्राणिरजता
दिभ्योऽञ् द्वारादित्वादैजागमः। श्वादीनामेतत्संप्रसारणमनकारान्तानामिष्यते इह न भवति युवतीः पश्य मघवतः मघवनाम
घवते तदर्थमुत्तरत्र योगविभागं कुर्वंत अल्लोपः अनः। अन इत्युभयोः शेष इति॥ ॥अल्लोपोऽनः॥ ॥अङ्गित्येवमंतस्य भस्य
अकारस्य लोपो भवति। राज्ञः पश्य राज्ञा राज्ञे तक्ष्णः पश्य तक्ष्णा तक्ष्णे। अनो नकारान्तस्यायं लोप इष्यते इह न भवति सज्ञकीय
मिति ५० ॥श्री४॥ ॥६॥ ॥

त्यादावेकदेशविकृतस्यानन्यत्वात्प्रसंगः सामान्यातिदेशो विशेषानतिदेशात्॥ ॥अल्लोपोऽनः॥ ॥अदिति पृथक्पदं लुप्तविभक्तिकं तेनातो
धातोरित्यादौ केवलस्य लोपशब्दस्य संबंधः। राजकीयमिति गर्त्तोत्तरपदाच्छ इत्यधिकारे राज्ञः क चेति छः ककारश्चान्तादेशः अत्रैकदेशविकृतस्या
नन्यत्वात्प्रसंगः ५० ॥७॥ ॥

टीका·प०१
१९३

षपूर्वहन् ॥ ॥किमिदं नियमार्थमाहोस्विद्विध्यर्थं कथं चैवं नियमार्थं कथं वा विध्यर्थं यद्यत्रेति प्रकृतिभावो नान्तरस्यैव टिलोपस्य तदाल्लोपस्य प्रकृतिभावेना
निवर्त्तितत्वात् षपूर्वादीनामेव सिद्धे नियमार्थं अथाविशेषेणाल्लोपटिलोपयोर्द्वयोरपि प्रकृतिभावस्ततो विध्यर्थो तत्रापि नियमपक्षे यदि तावदेवं नियमः षपूर्वादी
नामण्येवेति भवेत् इह न स्यात् ताक्षण्यः सामनो वैमनः इति तु प्रसंगः ॥ अथाप्येवं नियमः षपूर्वादीनामेवाणीति भवेत् इह न स्यात् सामनो वैमनः ताक्षण्य इत्यत्र तु
प्रसंगः ॥ अथाप्युभयथा नियमः स्यात् षपूर्वादीनामेवाणि षपूर्वादीनामण्येवेति एवमपि सामनो वैमन इत्याक्षण्य इति सिद्धं सामसु साधुः सामन्योऽत्र प्राप्नोतीत्यतस्मा

षपूर्वहन्धृतराज्ञामणि ॥ ॥षकारपूर्वो योऽन् हन्धृतराज्ञ् इत्येतस्य भस्याकारलोपो भवत्यणि परतः औक्ष्णः ताक्ष्णः भ्रौणघ्नः
वार्त्रघ्नः वार्त्रघ्नः धार्तराज्ञः षपूर्वहन्धृतराज्ञामिति किं सामनः वैमनः अणीति प्रकृतिभावेनाल्लोपटिलोपावुभावपि न भवतः अणी
तिकिं ताक्षण्यः ॥ ॥विभाषा ङिश्योः ॥ ॥ङौ परतः शीशब्दे च अनो विभाषा अकारलोपो भवति राज्ञि राजनि साम्नि सामनि साम्नी
सामनी ॥ ॥न संयोगाद्वमन्तात् ॥ ॥वकारमकारान्तात्संयोगादुत्तरस्यानोऽकारस्य लोपो न भवति पर्वणा पर्वणो अथर्वणा
अथर्वणो चर्मणा चर्मणो संयोगादिति किं प्रतिदीव्ना प्रतिदीव्ने साम्ना साम्ने वमन्तादिति किं तक्ष्णा तक्ष्णो ॥ ॥छ॥

दुभयोः प्रकृतिभावस्तथापि स्वविध्यर्थमिदमित्याह तस्याकारस्य लोपो भवतीति ताक्षण्य इतीदमर्थं यगानपत्ये तु कार्यलक्षणोऽण्योभवति उभावपि न भवत
इति टिलोपमात्रस्य प्रतिषेधे नापि सिध्यति तत्र क्रमेति वचनाल्लोपे प्राप्ते हि भयोरपि ॥ ॥विभाषा ॥ ॥जसः शी औङ आपः नपुंसकाच्चेति यो यः शीश एम०
ब्दस्तस्येह ग्रहणं न जश्शसोः शिरित्यस्य लुप्तस्य तु भसंज्ञाया अभावात् ॥ ॥न संयोगात् ॥ ॥स्यादकारमकाराभ्यां संयोगस्य विशेषणात् तदन्तवि १९३
धिस्त्रेति विस्पष्टार्थं यमन्तवाक् ॥ ॥छ॥ ॥छ॥ ॥

अचरुत्त्वयमंचतिर्लुप्तनकारोग्रस्यतइति। प्रसाहास्यग्रहणंत्तुनभवतियदिस्यादजंतस्यांगस्यलोपोभवतीत्यर्थः स्यात्तत्रश्चातोधातोरित्येतदर्थकंस्यात्। पञ्चप्रभा
गवागुरुकूप्रतीचोपदितिनिर्दिशितियच्चवाविसाहततोज्ञाएतंचतेरेवाग्रग्रहणमिति। एतेनपवाधचोप्यग्रहणं॥ ॥आतोधातोः॥ ॥एवमादिसिद्धंभव
तीतिस्त्राद्धहिरंस्मरादिप्रयोगोपीतिभावः स्त्रेत्तुसोत्रोनिर्देशःएवसिद्धं॥ ॥मंत्रेष्वाङ्यादेः॥ ॥आङि तिपूर्वाचार्यप्रक्रियया तृतीयैकवचनस्यग्रहणं
आङोमत्रापिदृश्यतइतितस्माटाङीतिनवक्तव्यमित्यर्थः॥ आत्तइत्यनुवृत्त्वेरादेरीत्यपिशक्यमकर्तुं। त्मत्येतिसम्यकवचनस्ययाङाद्आदेशः॥ ॥तिविंश

॥अचरुत्त्वयमंवतिर्लुप्तनकारोग्रद्यते। तदंतस्यभस्यअकारस्यलोपोभवति। दधीचः पश्य। दधीचा। दधीचे। मध्वचः पश्यमध्
वा। मधूचे॥ ॥उदईत्॥ ॥उदउत्तरस्याचइकारादेशोभवति। उदीचः। उदीचा। उदीचे॥ ॥आतोधातोः॥ ॥आकांतस्यधातोर्भस्य
लोपोभवति। कीलालपः पश्य। कीलालया। कीलालये। शुभंयः पश्य। शुभंया। शुभंये। आतइतिकिं। नियः। नियो धातोरितिकिं।
खट्वाः पश्य। मालाः पश्य। आत इतियोगविभागः। तेनक्त्वोयक्। हलः श्रः शानजि। मेवमादिसिद्धंभवति॥ ॥मंत्रेष्वाङ्यादेरात्मनः॥
॥मंत्रेषुआङि परतआत्मनआदेर्लोपोभवति। त्मनादेवेभ्यः। त्मनासोमे मंत्रेष्विति किं। आत्मनाकृतं। आङीति किं। यद्धात्मन
स्तदेवोचरिष्ठं। आङोन्यत्रापिलोपोदृश्यते। त्मन्यासमंजन्देवानां॥ ॥तिविंशतेर्डिति॥ ॥भस्यविंशतेस्तिशब्दस्यडिति परेलोप
इतीलोयोभवति। विंशत्याक्रीतः विंशकः। विंशकं। विंशतेः प्ररणोविंशः। एकविंशः॥ डितीतिकिं। विंशत्या ४१ ॥ ॥ ॥

तेः॥ ॥तियहणंकिंश्रत्सस्यमाभूत सिद्धांतस्यलोपउत्तरस्यत्रेरासिद्धसत्त्वारंभोनियार्थः स्यात्डित्येवयथासादत्त्वत्रयस्येतिलोयोमाभूदितिश्रयापिति
धिरितियमर्यभवेविधेरेवज्ञायत्सत्वरुवत्त्वंएवप्रप्यारंभसामर्थ्यादलोंत्यस्येत्येतस्मिन्बाधितेसमुदायस्यैवषष्ठीनिर्दिष्टस्यलोपप्रसंगः नतत्त्वसंख्ये
तस्यतिशब्दस्यलोपः सिध्यतीति ग्रहणोतुसतितत्सामर्थ्यादलोंत्यस्येत्यस्यानुपस्थानात्सर्वस्यतिशब्दस्यभवति। विंशं विंशकमित्यादौतिलोपेकृतेत्र
तोगुणोयरस्यत्वयस्येतिलोपस्तुनभवति। तलोपस्यासिद्धत्वात् ४१ ॥

टि॰का॰पृ॰१ ।टेः॥ ॥ङित्प्रभस्यापीति। श्रवणार्थस्तुडकारेणभवति भ्रातुपितावद्देशोतन्मान्त्रीतिवर्त्तीतेनचउकारवताप्रत्ययेनतन्नामागम्यतेटेशः। उपिभ्राहृटक्षारत्कालदि
१९४ गोत्रइतिनिर्दिष्टत्वान्नश्रवणार्थोङकारः॥ मंडुरजइतित्यापो: संज्ञाछंदसोर्बहुलमितिह्रस्वः॥ ॥नस्तद्धिते॥ ॥नेषामन्निति प्रकृतिभावः प्राप्त इत्यनुषंगः॥

ठेः॥ ॥टिसंज्ञकस्यटि तिप्रत्ययेपरतोलोपोभवति। कुमुद्वान्। नडून्। वेतस्वान्। उपसरजः। मंडुरजः। त्रिंशताक्रीतास्त्रिंशकः।
ङित्प्रभस्याप्यनुबंधकरणसामर्थ्यादिलोपोभवति॥ ॥नस्तद्धिते॥ ॥नकारांतस्यभस्यटेर्लोपोभवतितद्धितेपरतः। अग्निशर्मिः।
औडुलोमिः। वाक्कादित्वादिञ्प्रत्ययः। नइतिकिं। सात्वतः। तद्धितइतिकिं। शर्मणः। शर्मणा। शर्मणे। नकारांतस्यटिलोपेप्राप्ते ब्रह्मचारि
पीठसर्पिकलापिकुथुमितैतिलिजाजलिलांगलिशिलालिशिखंडिसूकरसद्मसुपर्वणामुपसंख्यानं कर्त्तव्यं। अत्रयेइन्नंतास्तेषामि
नणपत्यइतिप्रकृतिभावः प्राप्तः। येत्वन्नंतास्तेषामन्निति। सब्रह्मचारिणइमेसाब्रह्मचाराः। पीठसर्पिणःपैठसर्पाः। कलापिनाप्रो
क्तमधीयतेकालापाः। कुथुमिनः कौथुमाः। तैतिलिजाजलिनावाचार्यौतिन्मतोग्रंथउपचारात्तैतिलिजाजलिशब्दाभ्यामभिधीयतेतं
ग्रंथमधीयतेतैतिलाः। जाजलाः॥ ॥श्रीः॥ ॥

पीठेनसर्पतीतिपीठसर्पी। कलापिशब्दात्प्रोक्तार्थेकलापिनोणछुरो ब्राह्मणानिचतद्विषयाणितदधीतइत्यण्प्रोक्ताल्लुक्कालापाः। एवंकौथुमाः। किं राम॰
पुनः कारणमुपचारआश्रीयतेनपुनस्तेरवार्थेवृत्तिःप्रोक्तेतेनग्रोक्तमित्यर्थेण्प्रयतइत्यतआह॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ ॥ १९४

शैषिके विति के चिन्नित लिशब्दं पठंति निलानां तलं तितलं एषोदरादिः तदस्यास्तीति तितली । एवं लांगला इत्युपचारादिति सर्वमनिरिङ्गति । उत्तरेषु सुद्धिविद प्रयोगाद एवमाद्यमनरस्य तत्रापि चार्मरसत्रविकारे चामेराश्मतत्रे दमेर्थविकारेपि को स्यादत्त्वत्र । शौव इतितस्य दमित्यस्यात्र परत्वाह्द्दि प्राप्नोद्यादिलात्रत्व तिषेधे पेजागमेवद्धते टिलोपः । शौवनोस्य इति विकाराव यव योस्तु प्राणित्वाटञ्जिप्रकृतिभावाभावाच्छौवस्य वभवति । कें पुनरिति प्रतीयादिकिगरोपा ठाभावात्मश्रः । स्वादिस्त्राद्यस्य प्रकार च च नवासा प्रकृतिगणोपमिसु तारस्य सांप्रातिक इति यथा कथं चिलाल त्रतेर पि भवती सुल्के लाकाल समुदाये पि

शैषिके ष्यर्थेषु तुक् इत्वादस्त्रच्छ प्राप्नोति । एवं लांगल्याः शैलालाः । शिखंडिनः शैखंडाः । सकास्य ग्रनः सौकासम्याः । सुपर्वणः सौपर्वाः । अश्मनो विकार उपसंख्यानं । अश्मनो विकार आश्मः । आश्मनोन्यः । चर्मणः कोशः उपसंख्यानं । चार्मः कोशः । चार्मणोन्यः । श्वनः संकोच उपसंख्यानं । शौवः संकोचः । शौवनोन्यः । अव्ययानां च सायंप्रातिकाद्यर्थमुपसंख्यानं । केपुनः सायंप्रातिकादयः । येषामव्ययानामवि हितष्टिलोपः प्रयोगे च दृश्यते ते सायंप्रातिकप्रकारा गृहीतव्याः । सायंप्रातर्भवः सायंप्रातिकः । पौनःपुनिकः । बासः । कौतस्कुतः । काला द्वञिति ठञ्प्रत्ययः घघुलो तु न भवेत्ते । आरातीयः शाश्वतिकः शाश्वतमित्येवमादिषु न दृश्यते टिलोपः ॥ ॥ अङ्कय स्वोरेव ॥ ॥ अहन् इ त्येतस्य टखोरेव परतष्टिलोपो भवति । द्वे अहनी समाहृते द्व्यहः । त्र्यहः । द्वे अहनी अधीष्टो भृतो भूतो भावी वा द्व्यहीनः । त्र्यहीनः । अह्नां समू हः क्रतुरहीनः । अह्नः समूहे खो वक्तव्यः । सिद्धे सत्यारंभो नियमार्थः इह माभूत् अह्ना निर्वृत्तमाह्निकं । एवकारकरणं विस्पष्टार्थं अह्नस्य टखोरिस्येवं नियमो न भविष्यति । आत्माध्वानौ खे इति प्रकृतिभाववि धानात् ४२ ॥

ठञ् भवति येषां च विरोधः शाश्वतिक इति निर्देशादिसुत्कालाल इति कादेशाभावः । शाश्वतमिति भाष्यकारवचनात् ठञ्प्रत्ययः ॥ ॥ अह्नष्टखोः ॥ ॥ अह इति नसंख्यादेः समाहार इति अह्नादेशः यस्येति निषेधः । अहीन इति तद्धितार्थे द्विगुः समासः खः द्विगोर्वा इत्यह्नः संख्यादश्चेति सः आह्निकमिति आह्नि यष्टक् एवकारकरणं विस्पष्टार्थमिति । विपरीतनियमनिरासार्थं तु न भवती साह्नस्य टखोरेवेति विपरीते हि नियमे अन्य स्येव टिलोपप्रसंगात् आत्माध्वानौ ख

९४

ईका॰स॰४

१९५

ओर्गुणः॥ ॥बाभ्रव्य आदेशो गोत्रे यञ्। शंकम्बादेः प्राक्क्रीतीयष्ठ गवादिभ्योयत्। ओपगवादीवयत्स्वरेण। संज्ञापूर्वकत्वादिति सादेरीभाष्येनुक्रमणियप्रयोगवाहु
ल्यादुक्तं। तद्धितस्य भिवचोत्तो गुणरावचनात यत्नेन। ॥टेलोपे॥ मद्रबाहु शब्दाद्धाकृते। तास्यं चाशामित्युद्। कद्रुःशदादिषिक द्रुकमंडल्वो श्छन्दसि संज्ञायामित्य
द्रू। ताभ्यामपत्येस्त्रीभ्योढक्। अन्यत्र चतुष्पाद्भ्यो ढञ्। कमंडलुपदस्य आर्षीते तिवक्तव्यत्वाल्लक्षणा। स्रगालोजंबुः शिवाजंबुजंबुकः॥ ॥यस्येतिच॥ ॥

ओर्गुणः॥ ॥उवर्णांतस्य भस्य गुणो भवति तद्धिते परतः। बाभ्रव्यः। मांडव्यः। शांकव्ये दाहः। षिवव्यः कार्प्यामः। कमंड
लव्या मृत्तिका। परशव्यमयः। ओपगवः। कापटवः। ओरोदितिवक्तव्ये गुणग्रहणं संज्ञापूर्वको विधिरनित्य इत्यत्र निसोपथा
स्यात्तेन स्वायंभुव इति सिद्धं भवति॥ ॥टेलोपोकद्र्वाः॥ ॥ढे परत उवर्णांतस्य भस्य कद्रुवा लोपो भवति। कामंडलेयः। शैति
बाहेयः। जांबेयः। माद्रबाहेयः। अकद्र्वा इति किं। काद्रवेयो मंत्रमपश्यत्॥ ॥यस्येतिच॥ ॥इवर्णांतस्य अवर्णांतस्य च
भस्य ईकारे परतस्तद्धिते च लोपो भवति। इवर्णांतस्य ईकारे। दाक्षी। प्लाक्षी। सखी॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

इश्च अश्च य्यांसमाहारद्वंद्वे द्वंद्वेद्वि अजाद्यदंतं विप्रतिषेधेनेति अशब्दस्य पूर्वनिपातः सोत्र तात्र भवति यशब्दस्य तु यहणं न भवति लिंगात यस्येत्यंशि
शब्दस्य यजिकुमारस्य वृत्स्य वद्री। पिलोयं निर्दिशतीत्योतो गार्ग्यस्य कुमार्यो विपसीति। अत एव निर्देशादकारेलावकुत्स्य संग्रहणं तत्ताहवर्यादिकारे
पिकार्यं तु दीर्घस्यापि भवति सवर्णग्रहणात्। दाक्षीति। इलो मनुष्यजानेरितिङीषा। मविशड्डादिपिसरक्ष शिष्यभाषायामिति। सर्वत्र सवर्णदीर्घ एम॰ १९५
त्वेन रूपं सिध्यति किं लोपेन तत्राह॥ ॥छ॥ ॥

सवर्णदीर्घत्वे हीति। अतिसखेरिति। अतिक्रान्तः सखीमिति तत्पुरुषे लिंगविशिष्टपरिभाषया ग्राह्यः सखिम्प्रष्ट जातिरेवं न भवति तस्यानिसत्वात्।
तत उपसर्जनह्रस्वत्वं। एकादेशस्येति ङीषा सह कृतस्य। असखीति प्रतिषेधः स्यादिति। कथं पुनः सखिशब्दस्यो अमानो ति सखिशब्दस्य प्रतिषेधः स्या
त्। नदं तविधिना ग्रहणं वत्ता प्रातिपदिकेन तदन्तविधिर्नास्ति। एवं मन्यते कार्यकाले संज्ञापरिभाषमिति यसे वेङि. नीयत्र घिसंज्ञाया उपस्थानात् संज्ञा

सवर्णदीर्घत्वे हि सत्यतिसखेरागच्छतीत्यत्र एकादेशस्यान्तादिवत्त्वात् असखीति घिसंज्ञायाः प्रतिषेधः स्यात्। इवर्णान्तस्य तद्धिते।
दुलि। दौलेयः। बलि। बालेयः। अत्रि। आत्रेयः। अवर्णान्तस्य ईकारो। कुमारी। गौरी। शार्ङ्ग. खी। अवर्णान्तस्य तद्धिते। दाक्षिः। प्ला
क्षिः। चौडिः। बालाकिः। सौमित्रिः। यस्येतोङः इणां प्रतिषेधो वक्तव्यः। कौञे कुञ्जे। सौर्ये हिमवतः शृंगे। औङः शीभावे ल
तेयस्येति चेति सूर्यतिष्यागस्त्यमत्स्यानां य उपधाया इति यलोपः प्राप्नोति। इयङुवङौ लोपो भवति विप्रतिषेधेन। वत्सा
ग्नीणातिवत्सप्रीः तस्यापत्यं वात्सप्रेयः। चतुष्पाद्भ्यो ढञ् इति ढञ्प्रत्ययः। लेखाभ्रूः शुभ्रादिः तस्यापत्यं लैखाभ्रेयः ४२
॥ ४३ ॥ ४३ ॥ ॥

घिकारेतस्य च तदुत्तरपदस्य चेत्यत्र तदन्तविधिरिति। यद्वा शेषस्येकारोकारमात्रस्य घिसंज्ञा न तदन्तस्य ततः किं असखीत्यपि सखिशब्दे कारस्य प्रतिषेधो न स
खिशब्दस्य एकादेशे च सखिशब्दे कार एवायमिति तदन्तेऽपि प्रतिषेधः स्यादेव। लोपे तु सत्यपि यद्युपसर्जनह्रस्वत्वे कृते रूपमविशिष्टं तथापि तस्य लाह
णिकलोऽन्न भवति प्रतिषेधः। दौलेय इत्यादौ इतश्चानिञ इति ढक्। बलाका सुमित्रा शब्दौ बाह्वादी। सौर्य इति तेनैव कृतिरित्यण्। एतच्च सूर्यागस्त्ययो
श्छे च ङ्यां चेत्यनवेक्ष्योदाहृतं। इयङुवङ्भ्यामिति इयङुवङोरवकाशः श्रियौ भ्रुवौ लोपस्यावकाशः दौलेयः कामण्डलेयः ४३ ४३ ४३ ॥

द्वि॰का॰प॰५
१९६

सूर्या॥ ॥पक्षत्रयमतेन सूर्यादयो विशेष्यन्ते सूर्यादीनां भसंज्ञानामिति ततः सूर्यस्य स्त्री सूरी आगस्त्यस्य आगस्ती सौरीपत्र सूर्याद्येव भसंज्ञकं तत्रैव स्थानेसौ
रीबलाकेत्यत्र तु नस्यात् नक्षत्रसूर्यशब्द इति भसंज्ञकः किं तर्ह्यणन्तं तस्मान्नाश्रितस्य यस्य भमावमिति तथा दर्शयति आपत्यस्येति लोपइति। व्याख्या
त्रस्य लोपेन संबन्धः सूर्यादिभिर्यकारो विशेष्यत इति दर्शयन्नाह सूर्यतिष्यागस्त्यमत्स्य इत्येतेषामिति भसंज्ञकस्य यो यकार उपधा तस्य लोपो भवति सचे

सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः॥ ॥सूर्यतिष्यअगस्त्यमत्स्य इत्येतेषां यकारस्य उपधाया भस्य लो
पो भवति ईति परतस्तद्धिते च। सूर्येणैकदिक्सौरी बलाका। आपत्यस्येति लोपस्त्वसिद्धत्वं नास्ति
व्याश्रयत्वात्। ईकारे तु यस्यासिद्धत्वादुपधायकारो भस्याणन्तस्य सूर्यसंबन्धीति लुप्यते। तिष्येण युक्तमहः।
तैषीरात्रिः। अगस्त्यस्यापत्यं स्त्री आगस्ती। आगस्तीयः। मत्स्या गौरादित्वान्ङीष्। मत्सी। उपधाया इति किं। म
त्स्यचरी। ॥श्रीकृष्णाय नमः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥

त्सूर्यादीनां संबन्धी सम्यर्थः। सौरीति अत्र ईति परतो भसंज्ञकमणमणन्तं तस्य यकारस्य उपधाया लोपो भवति तथा दर्शयति आपत्यस्येति लोपइति व्याश्रयत्वादि — रामः॰
ति। आपत्यस्येति लोपः ईति यलोपइति व्याश्रयत्वं। ईकारे तु यइति लोपइत्यपेक्ष्यते तस्याणन्तस्येति भसंज्ञकस्याणन्तस्य यकार उपधा भवतीत्यर्थः। स्था — १९६
निवद्भावस्तु द्वयोरपि यस्येति लोपयोर्यलोपविधिं प्रति प्रतिषिद्धः। मत्स्यचरीति मत्सी भूतपूर्वेति चरट् तसिलादिष्विति पुंवद्भावः टित्वान्ङीप्। भवमत्र
मत्स्यचरशब्द इति भसंज्ञकः मत्स्यसंबन्धी यकारो न तत्वसौ भसंज्ञकस्योपधेति लोपाभावः।

यग्रहणमुत्तरार्थमितिः इह तु सूर्यादिसंबंधी मत्संज्ञक स्योपधाया काऱ एव न वर्णांतरामेति नार्थस्तेन। सौरीय इति सौर्यशब्दाद्दहाच्छः एवमागस्तीयः। अं
आगस्त्यस्यापत्ये ऋष्यण्। तिष्यपुष्ययोरिति तिष्यपुष्यनक्षत्रेणेव ग्रामेन नक्षत्राणि नियमः पुष्यस्याप्राप्ते विधिः। सूत्रे तत्वर्थग्रहणो मिथ्यस्यापि ग्रहणं। अं
तिकस्य सादिच्छंदस्येत दिष्यते। ककारादेः शब्दस्येति ककारस्य वाकारस्य चेत्यर्थः। आद्युदात्तस्त्वेति प्रत्ययस्वरस्यापवादः। अंतित इति अपादाने चाहीय रु

यग्रहणमुत्तरार्थं। विषयेणेत्यनमत्रकर्तव्यं मत्स्यस्य ड्यामिति वक्तव्यं। इह माभूत। मत्स्यस्येदं मांसं मत्स्यस्य मयोश्च हेव यांचा। सौ
रीयः। सौरी। आगस्तीयः। आगस्ती। इह माभूत। सौर्यं चरुं निर्वपेत। आगस्त्यः। तिष्यपुष्ययोर्नक्षत्राणि। तिष्येणानक्षत्रेण युक्तः
कालः तैषः पौषः। अंतिकस्य तसि कादिलोप आद्युदात्तत्वंच। अंतिकशब्दस्य तसिप्रत्यये परतः ककारादिशब्दस्य लोपो वक्तव्य
आद्युदात्तत्वंचा अंतितो न दूरात्। तमे तादेश्च। तमप्रत्यये अंतिकशब्दस्य तकारादेः ककारादेश्च लोपो वक्तव्यः। तत्रातादिलो
पे अंतमः। कादिलोपे अंतितमः। कादिलोपे बहुलमिति वक्तव्यं। अन्यत्रापि हि दृश्यते। अंति के सीदतीति अंतिषत। पूर्वपदादि
तिषत्वं। येच। अंतियः॥ ॥हलस्तद्धितस्य॥ ॥हल उत्तरस्य तद्धितयकारस्य उपधायाईति परतो लोपो भवति। गार्गी। वात्सी
।हल इति किं। कारिकेयी। तद्धितस्येति किं। वैश्यस्य भार्या वैश्यी ५५ ॥

होरिति नसिः। तादेश्चेति तिकशब्दस्येत्यर्थः। अंतिषदिति सदन्तर्ह्विषेसादि नाक्रि प्राप्तव्यमानसु व्यस्तमधीयते। येचेति दृश्यन्तरस्य पेत्रतो अंतिय
इति भवेच्छंदसीतियः। कादिलोपस्यासिद्धत्वाद्यस्येति लोपाभावः॥ ॥हलः॥ ॥तद्धित इति निर्दिश्यते उत्तरसूत्रे पुनस्तद्धितग्रहणात्त्वे
नायमीत्येव विधिः॥ ५५ ॥ ॥

कौ·प·१ आपत्यस्य च ॥ ॥गार्गिकमिति गोत्रे ॥ श्लोष्ठ्रसारिनावज्। संकाशादिभ्यो ण्य इति वुञ्छुणादि सूत्रेण चातुरर्थिकः ततो यञ्जोपधाद्वुञिति ज्ञातात्ताद्भावर्थे।
१९७ तद्धितग्रहणमिसादिसोमो देवतास्य सोमा घ्यण् ।टिलात् पश्चात्रपरतो नापत्यस्य यकारस्याप्यस्य हल स्तद्धितस्येति लोपो यथा सादिस्येव मर्थमिह तद्धितग्रहणोऽन्य
न्यथा हि प्रकृतं तद्धितग्रहणमिहानुवर्त्तनीयं तस्मिंश्चानुवर्त्तमाने तत्संबध्नीति सपि संबध्येत न चोभयमिह संबध्यमानं पूर्व सूत्रेपि संबध्येत ततश्च
सर्वे लोपविधि सस्तु भयत्र तद्धित ईति वक्ष्यमाणं विज्ञायेत आपत्यस्येवा नाकारादौ तद्धिते ईति चेतितलो यथा तद्धिते नापत्यस्य न भवति सांकाश्यक
इत्यादौ तथा ईत्यपि न स्यात् सोमी इष्टिरिति तद्धितग्रहणे तु सति तेन पूर्वयोगे तद्धितस्यानिवृत्तिराख्याता सापत्यस्यानापत्यस्य योरीईयोरपि पूर्वेण लोपो

आपत्यस्य च तद्धितेनाति ॥ ॥आपत्ययकारस्य हलनुत्तरस्य तद्धिते अनाकारादौ परतो लोपो भवति गार्गाणां समूहो गार्गकं।
वात्सकं। आपत्यस्येति किं। सांकाश्यकः। कांपिल्यकः। तद्धितग्रहणमीत्यनापत्यस्यापि लोपार्थं सोमी इष्टिः। अनातीति
किं। गार्ग्यायणः। वात्स्यायनः। हल इत्येव। कारिकेयस्यापत्यं कारिकेयिः॥ ॥श्रीः॥ ॥श्रीः॥ ॥

विधीयत इति सोमी इष्टिरित्यत्रापि यलोपः सिध्यतीस तत्तद्धितग्रहणं ननु च यद्युभयस्यायं नियमः स्याद्योगविभागोऽनर्थकः स्यादलमापत्यस्य त
द्धितस्यानातीत्येकमेव योगं कुर्यात् ततो योगविभागात् सूत्रस्यैवानुवृत्तिः तत्राप्यनातीति वचनात् तद्धितस्यैव एवमपि दोषो नापत्यस्य तद्धिते पि प्रा
प्नोमि कथं आपत्यस्य पदिभवज्यनाकारादावेवेति नियमसंभवात् सांकाश्यकादौ लोपः स्यात् अपापत्यस्यैवानाकारादाविति नियमः ततश्चाका रम०
रादावापत्यानीयस्य योरीईयोरपि लोपप्रसंगः यद्यनापत्यस्याकारादौ सं भवति। अथ न संभवति तदा न कश्चिद्दोषः आपत्यस्यैव तद्धिते तत्राप्यना १९७
कारादावेवेति नियमद्वयाश्रयणात्॥ ॥

।कचछोश्च॥ ॥गार्गीयतीतिमचिचेतीत्वं।गार्गायतीतिक्यचिवे इतिऋक त्सार्वधानुकयोर्दीर्घः।क्यषस्त्वायत्यादसंभवः।गार्गीभूतइतिअस्य
च्वावितीत्वं॥ ॥बिल्वकादिभ्यः॥ ॥बिल्वकादीनामस्मिन्प्रदेशप्राप्तिपरिक्रमशोयाठाभावात्मत्वाग्निर्वान्तार्थमाह नडादिष्विति।नडादिषुबिल्वा
दयस्तावत्पठ्यंते।तत्रकुकिकृतेपदृष्टं ककारान्तंनदिहानुकृतं।बिल्वकुब्जादियेषामितिविग्रहसमासः जश्त्वंचानुक्रियमाणरूपविनाशप्रस

कचछोश्च॥ ॥काच्चिवृत्तेलयोश्चपरतआपत्ययकारस्यहलउत्तरस्यलोपोभवति।गार्गीयति।वात्सीयति।गार्गीय
ते।वात्सायते।च्वौ।गार्गीभूतः।वात्सीभूतः।आयत्सस्येयेव।सौकाश्यायते।सौकाश्यीभूतः।हलइत्येव।कारिकेयीय
ति।कारिकेयीभूतः॥ ॥बिल्वकादिभ्यश्छस्यलुक्॥ ॥नडादिषुबिल्वादयः पठ्यंते।नडादीनांकुक्चेतिकृतकुगा
गमाबिल्वकादयोभवंति।तेभ्यउत्तरस्यछस्यभस्यतद्धितेपरतोलुग्भवति।बिल्वायस्यांसंतिबिल्वकीयातस्यांभवा
बैल्वकाः।वेणुकीयावैणुकाः।वेत्रकीयावैत्रकाः।वेतसकीयावैतसकाः।तृणकीयातार्णकाः।इक्षुकीयाऐक्षुकाः।काष्ठकीयाका
ष्ठकाः।कपोतकीयाकापोतकाः।कुञ्चाह्रस्वत्वंचाकुंचकीयाक्रौंचकाः।छग्रहणंकिं।छमात्रस्यलुग्यथास्यात्कुकोनिवृत्ति
र्माभूदिति।अन्यथाहिसंनियोगशिष्टानामन्यतरापायेउभयोरप्यभावइतिकुगपिनिवर्तेत।लुग्ग्रहणंसर्वलोपोयथास्यान्तय
कारमात्रस्यमाभूत् ४५ ॥ ॥

गान्नकृतमिसर्थीः।तेनबिल्वकुब्जादियेषामितिअन्नादिषुयःकृतदंतानांग्रहणंनाशंकनीयंपाठाभावात्।छग्रहणंकिमितिकृतकुगागमे
भ्यः परस्यादन्योनसंभवतीप्रश्नः।कथंपुनःकुकोनिहान्तिप्रसंगइत्याह अन्यथाहीति इदमेवछग्रहणंकिमितिकृतकुगागमेभ्यः परस्या
दन्योनसंभवतीप्रश्नः।कथंपुनःकुकोनिवृत्तिप्रसंगइत्याह अन्यथाहीति इदमेवछग्रहणंज्ञापकमन्येषापरिभाषेति।यकारमात्रस्ये

टीका·प·१ तुरिष्टे॥ ॥रोहायमीत्यत्र ह्रस्वादीनामसिद्धत्वात्पूर्वं तत्र शाह्रस्वलोपे कृते पश्चान्निमित्ताभावात्तेषामभावः। लोपो भवतीत्युक्तं तत्रांसस्य प्राप्तो
१९८ त्यत आह सर्वत्रेति कारणमाह अंसस्य हीति। नन्वेवमनंतरो लुगेव विधेयः एवं सुखमेव सर्वस्य निवृत्तिर्लभ्यते तत आह लुगिस्येतत्त्विति कः पुनस्त

॥ तुरिष्ठेमेयस्सु॥ ॥इष्टन् इमन् ईयसुन् इत्येतेषु परतस्तृशब्दस्य लोपो भवति। आसुतिं करिष्ठः। विजयिष्ठः। रोहीयसी धेनुः। सर्वस्य तृशब्दस्य लोपार्थं च वचनं। अंसस्य हि टेरित्येव सिद्धेः। लुगिस्येतदत्रानुवर्त्तते तथा हि सति न लुमतांगस्येति प्रतिषेधाद्गुणो न स्यात्। इमनि ग्रहणमुत्तरार्थं। इतरौ तु नुष्ठेरसीति भवतः॥ ॥श्रीकृष्णायानमः॥

इनुहत्तोरोषं स्यादत आह तथा हीति। न च पूर्वमेव गुणो भवति अंतरंगात्वपि विधीन्बहिरंगो लुग्बाधत इति वचनात् इमनिग्रहणमुत्तरार्थ रामरामं
मिति तेह्यर्थं तृशब्दांतस्यासंभवात् न चेदमेव कल्पकं भवितुमर्हति उत्तरार्थतयाप्युपपत्तेः। न चैवमजादीगुणाद्वचनादेवेति नियमाट्टिलोपसुनो १९८
इष्टिन्संभवो तत आह इतरौ त्विति॥ ॥छ॥ ॥रामः॥

।।टेः।। ।।णाविष्ठवदिति सप्तमी समर्थाद्धेतिः णाविति प्रतियोगिनि सप्तमी निर्द्दिष्टात्तत्तेनेष्ठनि यत्कार्यं तदत्र तिदिश्यते न त्विष्ठनो यत्कार्यं तदपि नेन बहू-
नाचष्टे बहयती सत्रेष्ठस्यापिडेति णौ यिराण भवति तदभावेन तस्मिन्नियोगशिष्टो भूभावो पि न भवति। केचित्तु भूभावमुदाहरंति भावयतीति टिलोपाजिटे
ष्ठेनैवमस्मिन्नियोगशिष्टत्वान्न कार्यनिहत्तावपि सिद्धायां पुंवद्वचनं सन्नियोगशिष्टयोर्भाषया अनित्यत्वज्ञापनार्थमिति नश्येनेयः एनेयद्दसादिसि-
द्धं भवति। अपरस्त्वाह दुविडमाचष्टे दुविडयति दरदमाचष्टे दारदयती सेवमादौ पुंवद्भावातिदेशार्थं पुंवद्वचनमिति। ननु चे दुविडादीनामिष्ठनि पुं-

टेः भस्य टेर्लोपो भवति इष्ठेमेयस्सु परतः। पटु। पटिष्ठः। पटिमा। पटीयान्। लघु। लघिष्ठः। लघिमा। लघीयान्। णावि
ष्ठवत्प्रातिपदिकस्य कार्यं भवतीति वक्तव्यं। किं प्रयोजनं। पुंवद्भाव रभाव टिलोप यणादिपरार्थं। पुंवद्भावः। एनीमाचष्टे एत
यति। श्येतयति। तसिलादिष्वाकृत्वसुचः इति इष्ठे पुंवद्भाव उक्तः। रभावः। पृथुमाचष्टे प्रथयति। म्रदयति। टिलोपः। पटु
माचष्टे पटयति। लघयति। यणादिपरं। स्थूलमाचष्टे स्थवयति। दवयति। भारद्वाजीयास्तु पठंति। णाविष्ठवत्प्रातिपदि
कस्य पुंवद्भाव रभाव टिलोप यणादिपर विन्मतोर्लुक्त्यर्थमिति। स्रग्विणमाचष्टे स्रजयति। वसुमंतमाचष्टे वसयति। यु
वानमाचष्टे यवयति। कनयति। एतदुभयमप्युदाहरणमात्रं न परिगणनं। आदयोपि हि दृश्यंते। प्रियमाचष्टे प्रापयति॥

वद्भावो न प्राप्नोति न स्वतंत्राणां संभवात्। नेष्ठनि दृष्टस्याति देशः किं तर्हि संभावितस्य अश्मथा अतिराजयती सादौ टिलोपो न स्यात्। प्रातिपदिक
ग्रहणं प्रकृतिमात्रोपलक्षणं उक्तं हि प्राकृयथा कथंचित्प्रातिपदिकग्रहणे लिंगविशिष्टस्य ग्रहणमिति स्थवयतीत्यादावत उपधायाः इति वृद्धिर्न
भवति अंगवृत्तेपुनर्वृत्तावविधिर्निष्ठितस्येति वचनात्। अस्यार्थः। अंगाधिकारविहितेक स्मिं श्चित्कार्येऽवृत्ते पुनः कार्यांतरस्य वृत्तौ प्राप्ता
यामविधिस्तस्य कार्यस्य तत्रैवेदं निष्ठितं भवति प्रयोगार्हं भवतीत्यत्र तन्निष्ठितमंगं तत्र भवत्येव वृत्तिः प्रापयति स्थापयतीति। कर्त्रीमाचष्टे

प्रादीनज्ञापनार्थं तु इष्ठेमेयः स्विति लोपो भवति न वेति चिंत्यं॥ ॥

दे॰का॰प॰४
१९९

॥स्थूलदूर॰॥ ॥यद्यपि प्रकृतौ लोपशब्दो भावसाधनः तथापीह कर्मसाधनो विज्ञायते यणादिपरं लोप इति सामानाधिकरण्येन निर्देशात् तदाह यणादिपरं लुप्यत इति। पूर्वग्रहणं विस्पष्टार्थमिति। इको गुणवृद्धी इति वचनात् लुप्तावशिष्टस्य यदङ्गस्य गुणो भविष्यतीति भावः। अत एव वचनात् ज्ञातो

॥स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः॥ ॥स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्र इत्येतेषां यणादिपरं लुप्यते इष्ठेमेयस्सु परतः पूर्वस्य च गुणो भवति। स्थूल। स्थविष्ठः। स्थवीयान्। दूर। दविष्ठः। दवीयान्। युवन्। यविष्ठः। यवीयान्। ह्रस्व। ह्रसिष्ठः। ह्रसीयान्। ह्रसिमा। क्षिप्र। क्षेपिष्ठः। क्षेपीयान्। क्षेपिमा। ह्रस्वक्षिप्रक्षुद्राः पृथ्वादिषु पठ्यन्ते। क्षुद्र। क्षोदिष्ठः। क्षोदीयान्। पराग्रहणं किम्। यविष्ठः। यवीयान्। ह्रसिष्ठः। ह्रसीयान्। इत्यत्र पूर्वस्य यणादेर्लोपो मा भूत्। पूर्वग्रहणं विस्पष्टार्थम् ४८ ॥प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रप्द्राघिवृन्दाः॥ ॥प्रियस्थिरस्फिरउरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारक इत्येतेषां प्रस्थस्फवर्बंहिगर्वर्षित्रप्द्राघिवृन्द इत्येते यथासंख्यमादेशा भवन्ति इष्ठेमेयस्सु परतः। प्रिय। प्रेष्ठः। प्रेमा। प्रेयान्। स्थिर। स्थेष्ठः। स्थेयान्। स्थेमा। स्फिर। स्फेष्ठः। स्फेयान्। उरु। वरिष्ठः। वरिमा। वरीयान्। बहुल। बंहिष्ठः। बंहीयान्। बंहिमा। गुरु। गरिष्ठः। गरीयान्। गरिमा। वृद्ध। वर्षिष्ठः। वर्षीयान्। तृप्र। त्रपिष्ठः। त्रपीयान्। दीर्घ। द्राघिष्ठः। द्राघीयान्। द्राघिमा। वृन्दारक। वृन्दिष्ठः। वृन्दीयान्। प्रियस्थिरोरुगुरुबहुलदीर्घाः पृथ्वादिषु पठ्यन्ते तेनान्येषामिमनिज्नोदाह्रियते॥

प्रत्ययो भवत इति। इमनिच् पृथ्वादिषु पठितेभ्यो न भवत्यनभिधानात् ४९ प्रियस्थिर॰॥ ॥प्रियस्थिरोरुगुरुबहुलदीर्घाः पृथ्वादिषु पठ्यन्ते तेनैतेभ्य इम- रा॰म॰
निजनुवर्तते श्वालार्थवृद्धादिभ्यो इमनिचः कल्पकयेन दर्शनं न भवति तदाह तेनान्येषामिति॥ ॥छ छ॥ ॥छ छ॥ ॥ ॥ १९९

बहोर्लोपः ॥ ॥ भूयानिति आदेः परस्येत्यादेर्लोपः। अन्यथा हीति। यदि पुनर्बहोरिति नोच्येत तदा यथा लोपः प्रत्ययानां भवति तथा भूभावोपि ते-
षामेव स्यात् पर्यायेण तत्र लोपस्यादेर्भूभावः सर्वस्य शक्यते वक्तुं। इष्ठश्च ईयसुनां न भविष्यति अन्यथा भूर्लोपो बहोरिति ब्रूयात् एवं च लु-
लोपस्य दभ्रीति निर्दिश्युपयघतश्रुति॥ ॥ इष्ठस्य॥ ॥ लोपापवादो यिडागमः इति नाप्राप्ते तस्मिन्नारम्भात्। नन्वित्वेति लोपापवाद भुलेपदि

बहोर्लोपो भू च बहोः॥ ॥ बहोः परयोरिष्ठेमेयसां लोपो भवति तस्य च बहोः स्थाने भू इत्ययमादेशो भवति। भूयान्। भूमा॥
॥ बहुशब्दः पृथ्वादिषु पठ्यते। बहोरिति पुनर्ग्रहणं स्थानित्वप्रतिपत्त्यर्थं। अन्यथा हि प्रत्ययानामेव भूभावः स्यात्॥ ॥ इष्ठस्य
यिट् च॥ ॥ बहोः परस्येष्ठस्य यिडागमो भवति। बहोश्च भूरादेशः। भूयिष्ठः। लोपापवादो यिडागमः। तस्मिन्निकार उच्चारणार्थः।
॥ ज्यादादीयसः॥ ॥ ज्यादुत्तरस्येयस आकार आदेशो भवति। ज्यायान्॥ लोपस्यापि हाव्यवहितत्वादादिरुच्यते। लोपे हि
सति अलघुकार इति दीर्घत्वे न स्यात् ज्यायानिति सिध्यति॥ ॥ र ऋतो हलादेर्लघोः॥ ॥ रेफ आदेशो भवति ऋकारस्य हलादेर्ल-
घोरिष्ठेमेयस्सु परतः। प्रथिष्ठः। प्रथीयान्। प्रथिमा। म्रदिष्ठः। म्रदीयान्। म्रदिमा। ऋत इति किं। पटिष्ठः। पटिमा। पटीयान्। ह-
लादेरिति किं। ऋजिमा। ऋजीयान्। लघोरिति किं। कृष्णिष्ठः। कृष्णिमा। परिगणनमत्र कर्त्तव्यं। पृथुं मृदुं भृशं चैव कृशं च दृढ-
मेव च। परिपूर्वं वृढं चैव षडेतान्रविधौ स्मरेत्। तत इह न भवति। कृतमाचष्टे कृतयति। मातरमाचष्टे मातयति। भ्रातयति॥
॥ विभाषर्जोश्छन्दसि॥ ॥ ऋजु इत्येतस्य ऋतः स्थाने विभाषा रेफ आदेशो भवति इष्ठेमेयस्सु परतः छन्दसि विषये। रजिष्ठमे-

वुलोपोऽप्यनुलक्ष्य विधीयते तदा उकारो नोच्चारणार्थः॥ ॥ ज्यादात्॥ ॥ लोपस्येति यदि लोपो यिटा न व्यवहितः स्यात्तर्हि नैव ज्यायानिति सिध्यतीति
ह्रस्वा आदिति न वक्तव्यं स्यादिति भावः। कथं पुनर्लोपे सिद्धिरित्याह लोपे हीति अलघुकार इत्यत्र क्ङितीति नानुवर्त्तत इति भावः। उरुपेसादौ छांदसत्वा
दीर्घीभावः॥ ॥ र ऋतः॥ ॥ परिगणनं कर्त्तव्यमिति एवं च हलादेर्लघोरिति न वक्तव्यो मातयतीति उकारादीनामनुलग्नत्वात् तु इष्ठेमेयस्विति

६का०पृ०४ प्रकृत्यैकाच्॥ ॥इष्ठेमेयस्सु परत इति परिभाषितिष्ठादीनामिहानुवृत्तिर्नस्यात्तदा प्रियेहि नं प्राक्क्रीताच्छः श्रीपंज्ञो देवनासज्ञः स्यालीयाकरस्तत्रयस्मे
१०० तिलोपो न स्यात् ततश्च श्रीयमित्यत्रेयङादेशः स्यात् न स्मात् नुवर्सो इष्ठादयः स्रग्विष्ठ इति अथ प्रादयः किमित्युपेहिताः प्रेष्ठः प्रेयान् स्थेष्ठः स्थेपा
नितिप्रसिद्धत्वात्प्रादीनां टिलोपो यस्येति लोपश्च न भविष्यति। इह तर्हि श्रेष्ठः श्रेयानिति अकारोच्चारणसामर्थ्याल्लोपो न भविष्यति तस्माट्टिमतो
लुके वास्योदाहरणासंभवः। यद्येवं नाप्राप्ते टिलोपे आरम्यमाणो विन्मतोर्लुक् लोपं बाधिष्यते स त्वं विन्नंतस्य मत्वं तस्य बाधि लोपः प्राप्तस्तं बाध

प्रकृत्यैकाच्॥ ॥एकाच् यद्भसंज्ञकं तदिष्ठेमेयस्सु परतः प्रकृत्या भवति स्रग्विन्नित्येतस्य विन्नंत
स्य स्रजिष्ठः स्रजीयान् स्रजयति स्रुग्वदित्येतस्य मतं तस्य स्रुविष्ठः स्रुवीयान् स्रुवयति एकाजिति
किं वसुमदित्येतस्य वसिष्ठः प्रकृत्याके राजन्यमनुष्ययुवानः अके प्रत्यये परतो राजन्यमनुष्ययुव
त्रित्येते प्रकृत्या भवंति राजन्यानां समूहो राजन्यकं मनुष्याणां समूहो मानुष्यकं आपैत्यस्यचैं

तेपरस्तुतयोर्लुकि कृते अवशिष्टस्य टिलोपः प्राप्नोतीति तस्य कथं बाधकः स्यात् तस्मिन्नप्राप्ते वेन्मतोर्लुगारभ्यते अवनुपंचेत देवं विज्ञेयं अवशिष्टस्य
यष्टिलोपः तं न बाधत इति अन्यथा यत्रावशिष्टमनेकाच् तत्रापि टिलोपो न स्यात् ततश्च वसिष्ठः वसीयानिति प्रसुदाहरणं नोपपद्यते एवं चातिशये राम०
न वह्नवान् वह्निष्ठः अवशिष्टस्य न काट्टिम इति टिलोपो भवति बह्वृचत्रा सलणं चतस्मा ह्लणं ब्रह्मिष्ठं कुर्वीतेति तथातिशये न यय स्वीयपिष्ठ इति १००
भवतिनतुयपसिष्ठ इति। अपरत्र्याह इष्ठेमेयस्सु नेकाचोप्यवशिष्टस्य नेष्यते। टिलोपो भाष्यकारेण प्रवृत्ते विन्मतोर्लुकीति। प्रकृत्येसादिराज्ञोय
लं राजन्यः राजश्वशुराद्यत् मनोरपत्यं मनुष्यः मनोर्जातावञ्यतौ षुक् ताभ्यां समूहे गोत्रोक्षो ष्ट्रेत्यादिना वुञ्॥ ॥७॥ ॥७॥ ॥ ॥

आपत्यस्य चेत्यादि एतच्चानयोरपत्यगाधिलमंगीकृत्योक्तं परान्तु ज्ञातिमात्रमुभयत्र शब्दार्थः अपत्यार्थस्तु नास्त्येवेति पक्षस्तदानापत्यत्वादेवलोपस्याप्रसंगात्स्वार्थः प्रकृतिभावेन ॥ ॥इनण्य ॥ ॥सांकूटिनमिति कूटदाहेरीव्रीपिधः अभिविधौ भाव इनुण् आणिनुणः ॥ ॥गाथि ॥ ॥

आपत्यस्य च तद्धिते नातीति यलोपः प्रकृतिभावेन न भवति । पुनोभावः पौवनिकामनोज्ञादित्वाद्वुञ् तत्र नस्तद्धिते इति टिलोपो न भवति ॥ ॥इनण्यनपत्ये ॥ ॥इन्नन्तमनपत्ये अर्थे अणि परतः प्रकृत्या भवति सांकूटिनं सांराविणं सामार्जिनं स्राविणः इदं स्राविणं आणीति किं दंडिनां समूहो दांडं अनुदात्तादेरञिति अञ् प्रत्ययः अनपत्य इति किं मेधाविनोपत्यं मैधावः ॥ ॥गाथिविदथिकेशिगणिपणिनश्च ॥ ॥गाथिन् विदथिन् केशिन् गणिन् पणिन् इत्येते अणि प्रकृत्या भवन्ति गाथिनोपत्यं गाथिनः वैदथिनः कैशिनः गाणिनः पाणिनः अपत्यार्थोयमारंभः ॥ ॥संयोगादिश्च ॥ ॥संयोगादिश्च इन् अणि प्रकृत्या भवति । शांखिनोपत्यं शांखिनः माद्रिणः वाज्रिणः चाक्रिणः ॥ ॥अन् ॥ ॥अन्नन्तमणि प्रकृत्या भवति अपत्ये चानपत्ये च सामनो वैमनः सौत्वनः जैत्वनः ॥ ॥ये चाभावकर्मणोः यकारादौ च तद्धिते भावकर्मणोरर्थयोरन् प्रकृत्या भवति साम्नि साधुः सामान्यः वैमन्यः ब्रह्मण्यः अभावकर्मणोरिति किं राज्ञो भावः कर्म वा राज्यं राजन्यस्य इति पुरोहितादिषु यक् तेन तत्रोयं यक् प्रत्ययः ॥ ॥आत्माध्वानौ खे ॥ ॥आत्मन् अध्वन् इत्येतौ खे परतः प्रकृत्या भवतः आत्मने हितः आत्मनीनः अध्वानमलंगामी अध्वनीनः ख इति किं प्रत्यात्मं प्राध्वं प्रत्यात्ममित्यव्ययीभावे अन्नश्चेति समासान्तष्टच् प्रत्ययः प्राध्वमिति सुपसर्गाद्ध्वन इति अच् प्रत्ययः ॥ ॥न मपूर्वोपत्येवर्मणः ॥ ॥मपूर्वोन् अवर्मणो णिपरतो पत्ये अर्थे न प्रकृत्या भवति । सुषाम्नोपत्यं सौषामः चान्द्रसामः मपूर्व इति किं सौत्वनः अपत्य इति किं चर्मणा परिवृतो रथः चार्मणः अवर्मण इति किं चक्रवर्मणोपत्यं चाक्रवर्मणः मपूर्वप्रतिषेधे वामत्वर्थीये नान्ताः एते गाथाशब्दो व्रीह्यादिः विदथो पत्तः ॥ ॥संयोगादिश्च ॥ ॥अपमपत्यार्थ आरंभः ॥ ॥अन् ॥ ॥अनपत्य इति निदर्शनं सामनो वैमन इति तत्र सेदमित्येण् सुपर्ज्जो दुः तिप्रकृत्स्व स्यतुकृ सुलातस्यापत्यं सौत्वनः ४८ ॥ ॥छ ॥ ॥छ ॥ ॥श्रीरामाय ॥

ब्राह्मोऽजातौ॥ ॥योगविभागोऽत्र क्रियत इति पदेन क्रियेत तदा पत्य इत्यनुवर्त्तते वा न वा न वात्र त्रानुवृत्त्या वनंतर सूत्रेणाप्रकृतिभावप्रतिषेधात्रस्त
द्धितइत्येव टिलोपस्य सिद्धत्वान्नियमार्थमेतद्भवति अजातावेवापत्य इति तत्रापत्येऽपि इमिष्टं ब्राह्मो नारदः ब्राह्मणो जातिरिति अनपत्येऽनुजाताव
जातौ च न कश्चिट्टिलोपः स्याद्ब्राह्मी ओषधिर्ब्राह्मं हविरिति। अनन्तरश्चोऽनुविधिनियमसंभवे विधिरेवेत्यापाद्यतीति अनपत्ये अन्नितिप्रकृतिभावे प्रा

॥ब्राह्मोऽजातौ॥ ॥योगविभागोऽत्र क्रियते ब्राह्म इत्येतदपत्याधिकारेऽपि सामर्थ्यादपत्यादन्यत्राणि टेर्लो
पार्थं निपात्यते। ब्राह्मो गर्भः ब्राह्ममस्त्रं ब्राह्मं हविः ततो जातौ अपत्य इत्येव अपत्य जातावणि ब्रह्मणष्टिलो
पो न भवति ब्रह्मणोऽपत्यं ब्राह्मणाः। अपत्य इत्येव ब्राह्मी ओषधिः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥

प्त्ये अजातौ टिलोपार्थं विध्यर्थमेतद्भवति तत्र ब्राह्मं हविरित्यादि सिद्धं ब्राह्मी ओषधिरिति न सिध्यति अजातावित्ति प्रतिषेधात् ब्राह्मणी ओष
धिरिति प्राप्नोति अपत्ये च जातौ ब्राह्मणा इति न सिध्यति पूर्वसूत्रेणाप्रकृतिभावे प्रतिषिद्धे टिलोपप्रसंगादिति भावः। विभक्तस्यार्थमाह ब्राह्म इ
त्येतदिति सामर्थ्यादिति अपत्ये पूर्वेणैव टिलोपस्य सिद्धत्वात् ब्राह्म इत्येतावता नियमस्य कर्तुमशक्यत्वाच्च ततत्रापत्येऽपि ब्राह्मो नारद इति परत्वा रा.म.
दनेनैव टिलोपः अपत्य इत्येवेति अन्यथा अनपत्ये वापत्ये च जातौ प्रतिषेधः स्यात्। प्रसज्यप्रतिषेधश्चायमित्याह अपत्ये जातावित्ति॥ ॥ १०१
॥३२॥ ॥३३॥ ॥

॥कार्मः॥ ॥यद्येवमितिपरिहारप्रसयोयमित्यर्थः नस्तद्धित इति टिलोपः सिद्ध इति अणि हि प्रकृतिभावः ज्ञापनार्थमिति एवं च छत्रादि

॥कार्मस्ताच्छील्ये॥ ॥कार्म इति ताच्छील्ये टिलोपो निपात्यते कर्मशीलः कार्मः शीलं छत्रादिभ्यो ण इति
णप्रत्ययः यद्येवं किमर्थमिदं नस्तद्धित इत्येव टिलोपः सिद्धः सत्यमेतत् ज्ञापकार्थं तु एतज्ज्ञापयति ता
च्छीलिके णेऽप्यण्कृतानि भवन्तीति तेन चौरी तापसीति अणन्तात् ङीप् सिद्धो भवति ताच्छील्य इ
ति किं कर्मणा इदं कार्मणं॥ ॥औक्षमनपत्ये॥ ॥औक्षमिति अनपत्ये अणि टिलोपो निपात्यते औक्षं
इदं अनपत्य इति किं उक्ष्णोऽपत्यमौक्ष्णः षष्टर्वहन्स्तराज्ञामणीसल्लोपः ४९ ॥ श्रीकृष्णायनमः॥

ण्योरिति लाघवाय कर्तव्यं अणवचने प्रयोजनाभावात् ताच्छीलिक इति तुल्यजातीयविषयत्वाज्ज्ञापनस्येतल्लभ्यते तेन तदस्यां प्रहरणमस्य
ष्णाश्चहार्वसादिकेणोऽङीब्भवति ४९ ॥ ॥छ॥ ॥

ष्ठे॥•ष्ठ्य्ट्ठ

दे•प• २०२ दाण्डिनायन॥ ॥उपचारादितिमुख्यस्याध्ययनासंभवउपचारेहेतुः श्रौणहत्येति निपातनानर्थकं हनस्तोचिण्णलोरितितकारस्यसिद्धत्वान्नचनास्ति
हितइतिटिलोपप्रसंगः उभयोरनिसयोः परत्वान्नस्येवभावादतआह हनस्तोचिण्णलोरितिधातुस्वरूपग्रहणेतत्प्रत्ययेधातोरिस्येवंविहितेप्रत्ययेतत्र
यकार्यंविज्ञायतेनचण्यजेवंविहितः किंतर्हिब्राह्मणादिकादिकोस्येवंतेनात्रतोनिपात्यते• कथंपुनर्ज्ञायतेधातोः स्वरूपग्रहणेतत्प्रत्ययेकार्यंविज्ञाय

दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि॥ ॥दाण्डिना
यन• हास्तिनायन• आथर्वणिक• जैह्माशिनेय• वाशिनायनि• भ्रौणहत्य• धैवत्य• सारव• ऐक्ष्वाक• मैत्रेय• हिरण्मयइत्येतानिनिपा
त्यंते• दण्डिन्हस्तिन्इत्येताभ्यांनडादिषुपठ्यतेताभ्यांफकिपरतः प्रकृतिभावोनिपात्यते• केषांचित्तुहस्तिन्नितिनडादिषुनपठ्यतेते
षामतएवनिपातनात्फगपिभवति• दण्डिनोपत्यंदाण्डिनायनः हस्तिनोपत्यंहास्तिनायनः अथर्वन्नितिवसंतादिषुपठ्यतेअ
थर्वणाप्रोक्तोग्रंथोप्युपचारादथर्वन्नित्युच्यतेनमधीतेयः सआथर्वणिकः इकेप्रकृतिभावोनिपात्यते• जिह्माशिन्नितिशुभ्रा
दिषुपठ्यतेतस्यढकिपरतः प्रकृतिभावोनिपात्यतेजिह्माशिनोपत्यंजैह्माशिनेयः वाशिनोपत्यंउदीचांवृद्धादगोत्रादितिफिञ्तत्रप्रकृ
तिभावोनिपात्यतेवाशिनायनिः भ्रूणहन्धीवन्इत्येतयोः ष्यञिपरतस्तकारादेशोनिपात्यतेभ्रूणघ्नोभावः भ्रौणहत्यंधीव्नोभावः
धैवत्यंहनस्तोचिण्णलोरितियत्तत्वंतद्धातुप्रत्ययएवेतिभ्रौणघ्नोवात्रघ्नइत्यत्रनभवत्यतोभ्रौणहत्येतत्वंनिपात्यते• सारवइतिष
रयूइत्येतस्याणिपरतः अपूर्वाह्लोपोनिपात्यतेसरय्वांभवंसारवमुदकंऐक्ष्वाकइतिस्वरसर्वनाम्नाएकश्रुत्यापठ्यतेनतोयमाधुरा
नोत्रोदात्तश्चनिपात्यतेइक्ष्वाकोरपत्यंजनपदशब्दात्क्षत्रियादञितिअञ्तत्रउकारलोपोनिपात्यतेऐक्ष्वाकः इक्ष्वाकुषुजनपदेषुभवःको
पधादणित्यणः• ऐक्ष्वाकः मैत्रेयइतिमित्रयुशब्दोगृष्ट्यादिषुपठ्यतेततोढञिकृतेयादेरियादेशःप्राप्तःयुशब्दलोपोनिपात्यतेमित्रयो
रपत्यंमैत्रेयः अथकिमर्थंमित्रयुशब्दोबिदादिष्वेवनपठ्यतेतत्राञिकृतेयादेरितियादेशेनेवसिद्धं एवंचलोपार्थंनि
पातनंमत
तदर्थंतआतएवनिपातनात्• एवंतर्हिकृत्वनिर्हृस्वार्थंनिपातनं•मेवंएवंतर्हिनिष्कादेरिसत्रभ्राणघ्नः ष्यञीस्यवसत• अतस्तत्वार्थमपिनिपातनंमत
ज्ञापकमेव• ऐक्ष्वाकशब्देपयाधुरानोत्रोदात्तश्चेष्यतेतत्रान्यतरस्यपाठइत्यस्योकारलोपोनसिध्यतीत्यत्राह• स्वरसर्वनाम्नेति• उदात्तादीनामविभागेना ॥ राम• २०२

दृ०का०पु०१ सर्वनामवत्सर्वनामयथैवहिलस्यापत्यमित्यादौउपगुप्रभृतीन्विशेषान्सर्वनामप्रतिपादयतितथैकश्रुतिरप्युदात्तादात्तादीनवरविशेषानितिस्तद्वेकश्रु
तेः सर्वनामत्वं। इयादेशापवादः इति· केकयादिसूत्रेणाप्राप्तस्यादेशः इह मित्रयुशब्दस्य चतुर्थ्याहणंक्रियतेगृष्ट्यादिषुप्रत्ययसिद्ध्यर्थं यस्कादिषुलुग
२०३ र्थं केकयादिसूत्रे इयादेशार्थं इहं चतुर्थ्यां लोपार्थं तत्र द्विर्ग्रहणमकर्त्तुं शक्यमित्यभिप्रायेणाह· अथ किमर्थमिति· लुगर्थः पाठेन कर्त्तव्य इति यञञोरिमे
व सिद्धत्वात्· परिहरति नैतदस्तीति· अपत्यप्राप्नोतीति: यदि तु संघांकलक्षणो घित्यस्यानंतरं नमैत्रेयादिषुच्येत तदा त्रीणिग्रहणानि नार्थो निपातने
नैतदस्ति· मित्रयूणांसंघ इत्यत्र गोत्रचरणाद्वुञं बाधित्वा मैत्रेयकः संघ इत्यत्र संघांकलक्षणो घञप्यनिज्ञामगोत्यणप्राप्नोति· हिर
ण्मयमिति हिरण्यस्य मयट्यादिलोपो निपात्यते हिरण्यस्य विकारः हिरण्मयः ॥ ॥ अनत्यवास्त्यवास्त्वमाध्वीहिरण्ययानिछं
दसि ॥ ॥ अन्त्यः वास्त्यः वास्त्व· माध्वी· हिरण्यय इत्येतानि निपात्यंते छंदसि विषये· अनु वास्तु इत्येतयोर्यतियणादेशो
निपात्यते अनतोभवं अन्त्यं वास्तोभवं वास्त्वं· वस्तु शब्दस्याणियणादेशो निपात्यते वस्तुनि भवो वास्त्वः मधुशब्दस्याणि स्त्रियां
यणादेशो निपात्यते माध्वीर्नः संत्वोषधीः हिरण्यशब्दाद्विहितस्य मयटो मशब्दस्य लोपो निपात्यते हिरण्ययं ॥ ॥ इत्युपाध्या
य श्री वामनकृतायां काशिकाख्यां जौ षष्ठस्याध्यायस्य चतुर्थः पादः समाप्तः समोप्तश्चायं षष्ठोध्यायः ५० ॥ श्रीः ॥ ॥
नायकारलोप इति· यशब्दलोप इत्यर्थः ॥ ॥ अन्त्य ॥ ॥ मशब्दलोपो निपात्यत इति· तस्यासिद्धत्वाद्घसेति लोपाभावः एवमप्यकृत्सार्वधातुकयोर्दीर्घ
इति दीर्घः प्राप्नोति· अगत्यर्थे यु नर्हंत्रावितिवचनान्नभविष्यति· क्वचित्तु मकारलोप इति पठंति· तत्र यस्येति लोपे कृते मस्य मकारस्य श्रवणं ॥ ॥ इति रा०म०
हरदत्त मिश्र विरचितायां पदमंजर्यां षष्ठस्याध्यायस्य चतुर्थः पादः समाप्तश्चायमध्यायः ५० ॥ श्री रामचंद्राय नमो नमः ॥ ॥ श्रीः ॥ ॥ २०३
संवत १८२६ समये सावनमासे शुक्लपक्षे त्रेदशी बासरे ॥ ॥

कासक पत्रे [illegible] संडन
श्री चद बडिम